NATIONAL ARCHIVES OF INDIA

THE
ASIATIC SOCIETY OF BOMBAY
TOWN HALL, BOMBAY-400 001.

NATIONAL ARCHIVES OF INDIA

Digitized with financial assistance from
NSDL
Technology, Trust & Reach
on 16 November, 2018

NATIONAL ARCHIVES OF INDIA

00049372

NATIONAL ARCHIVES OF INDIA

CALCUTTA ORIENTAL SERIES.

No. 5.

MUKTA-PHALAM

(मुक्ताफलम्)

BY

VOPADEVA

WITH THE COMMENTARY OF

HEMADRI.

49372

EDITED

BY

PANDIT ISVARA CHANDRA SASTRI
SANKHYA-VEDANTA-NYAYA-DARSANA-TIRTHA.
AND
PANDIT HARIDASA VIDYABAGISA.

CALCUTTA.
Printed by Sukhamoy Mitra
At the "New Arya Mission Press."
9, Sibnarain Dass Lane.

1920.

All rights reserved.] [Rs. 2.

NATIONAL ARCHIVES OF INDIA

ORI
294.554
Vop
47.72.

Copyright
by
Narendra Nath Law.
Calcutta.

19372

CALCUTTA ORIENTAL SERIES.

No. 1.	Yukti-kalpa-Taru	Rs.	2 8 0
No. 2.	Chanakya-Rajaniti Sastram ...		0 14 0
No. 3.	Harilila by Vopadeva.		1 4 0
No. 4.	Inter-state Relations in Ancient India, Part I.		

Chanakya Katha (in the press)

प्राप्तिस्थानम् ।

संस्कृतयन्त्र-पुस्तकालय, २० कर्णओयालिस ष्ट्रीट्

कलिकाता ।

Published by Baidya Nath Dutt,
26, Vidyasagar Street, Calcutta.

NATIONAL ARCHIVES OF INDIA

This work edited for the first time from manuscripts was beyond the easy reach of scholars as well as *Vaishnavas* inspite of its acknowledged importance. The body of the treatise is a compilation of about 1000 slokas culled out from among the 18000 slokas of the *Bhagavata* executed in such a way as to bring out, establish, explain, and illustrate in its several chapters those subjects that were calculated as important by Vopadeva from the Vaishnava standpoint. There are topics in the treatise touched in other Vaishnava works, but the elicitation of those topics from the scattered verses of the Bhagavata, which hardly strike a reader as pointing to a definite conclusion, or forming part of a co-ordinate whole, imparts much interest to the chapters. There are again topics which are treated nowhere at all in *Vaishnava* literature, or so well treated as in this work e. g. the subject-matter of chapter VII, or that of chapter XI. A rearrangmenet of the slokas of the *Bhagavata* may appear at first sight to be an easy task, but it is really such as could only be effected by a scholar combining in himself the genius and intellectual calibre of the grammarian Vopadeva with his devotional depth as a *Vaishnavite.*

The commentary *Kaivalya-dipika* of Hemadri, the famous author of the encyclopedic treatise *Chaturvarga-chintamani.* and the Chief Secretary of the Yadava kings of Devagiri, is a brilliant exposition of the aforesaid slokas of the *Bhagavata* arranged by Vopadeva.

It is not intended at present to speak in further details either of Vopadeva or of Hemadri, the characteristics of their writings generally, or their performance in the present instance nor to put before the reader the principles of *Vaishnavism,* a knowledge of which is essential to a clear realization of the meaning, bearing, or importance of the subjects dealt with in this work. These details will be handled in connection with the second part of this treatise.

NATIONAL ARCHIVES OF INDIA

सूचीपत्रम् ।

विषयः	अध्यायः	पृष्ठा
विष्णुलक्षणभेदः	१	१
विष्णुरूपम्	२	२८
विष्णोरवतारूपम्	३	४८
विष्णोरधिष्ठानरूपम्	४	७७
विष्णुभक्तेर्लक्षणं भेदाश्च	५	८४
विष्णुभक्तेरधिकारिभेदः	,,	१०३
विष्णुभक्तिमहिमा	६	१०७
विष्णुभक्त्यङ्गवर्गप्रकरणम्	७	१३०
विष्णुश्रवणम्	८	१६०
विष्णुकीर्त्तनम्	,,	१६६
विष्णुस्मरणम्	९	१७४
विष्णुश्रवणकीर्त्तने	१०	१७७
विष्णुस्मरणकीर्त्तने	,,	१७८
विष्णुभक्तस्य लक्षणं भेदाश्च	११	१८२
सम्भोगशृङ्गारः	,,	१९२

NATIONAL ARCHIVES OF INDIA

सटीक-मुक्ताफलम् ।

विष्णुं पद्मात्मसम्बन्धे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥१॥

यज्ज्योतिरुन्मिषतिचेतसिधर्म्ममेघ-
मातस्थुषामतिवशे परिकर्म्ममुख्यैः ।
तच्छुद्धसत्वमुकुर-प्रतिबिम्बभावात्,
कृष्णाभिधामुपगतं भुवि भावयेम ॥१॥
समूलघातं प्रणिहत्य योऽस्मम्,
मृणालिनीं चेतयते मनीषाम् ।
त्पाद सङ्गायज्जगती कृतार्था,
गुरुं विवस्वन्तमिहानुवे तम् ॥२॥
श्रीवोपदेवस्य निधेर्गुणानाम्,
जयन्ति ते ते भुवि वाग्विलासाः ।
विकुण्ठ्र येषु स्वयमीश्वरोऽपि,
सर्वज्ञशब्दं स्व (स) मवैति रूढ़म् ॥३॥
अस्मिन् समस्मिन्नपि वाङ्मयाब्धा-
वपार-पारीण-मनीषयोच्चैः ।
विज्ञप्तवश्चिज्जड़-वस्तु-भेदम्,
गुणागणैया भुवि नास्य कैःकैः ॥४॥

NATIONAL ARCHIVES OF INDIA

विष्णुप्रीत्यै चतुर्वर्गचिन्तामण्यामजीगणत् ।
भेदान् व्रतानां दानानां तीर्थानां मोक्षवर्त्मनाम् ॥२॥

असुथवैदग्ध्यनिधेर्हृदिस्पृशो-
मुदं ददन्तेऽत्र नकस्य सूक्तयः ।
मुक्ताम्रुषाद्वेषि-मनांस्यनारतम्,
वियोगि-हृन्दीव कलाः कलानिधेः ॥५॥
तेन मुक्ताफलं तेने यल्लोकमनुरञ्जता ।
तच्च टीकां यथाबुद्धि कुर्वे कैवल्यदीपिकाम् ॥६॥
सृष्टां त्रिलोकगुरुणार्द्धमिवेन्दुलेखाम्,
सर्वज्ञमण्डनकरीमकलङ्क-शङ्काम् ।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा,
कुर्य्यामिमां तदिह यान्तु बुधाः प्रसादम् ॥७॥

इह मुमुक्षूपकाराय रुचिर-प्रकरणं चिकीर्षुराचार्यः तस्य परिसमाप्तिप्रचयपरिपन्थि-विघ्नविघाताय शिष्टाचारपरिपालनाय च समुचितेष्टदेवतां वक्ष्यमानस्तत्प्रतिपाद्यमर्थं श्रोतृ-प्रवृत्त्यङ्गतया संक्षिप्याह,—विष्णुमित्यादि ।

पञ्च आत्मानः उपाधिभिन्नानि स्वरूपाणि यस्य स तथा । पञ्चस्वपि विष्णुशब्दोव्याप्तिविवक्षया मङ्गलार्थत्वाच्च प्रागुक्तः । तं वन्दे नमस्कुर्वे । भक्त्येति । अष्टादशभेदया भक्त्या भक्तैराश्रितमित्युत्तरेणान्वयः । अष्टादशत्वेऽपि तच्चैविध्यानतिक्रम इति भावः । साङ्गेति । अङ्गानामसङ्ख्यत्वादीनां वर्गाः समूहाः अङ्गवर्गाः तेषामूनविंशतिरङ्गवर्गोनविंशतिः तया सह वर्त्तत इति साङ्गवर्गोनविंशतिः तया । भक्तिविशेषणञ्चैतत् । ननु समैर्वर्ग इति समसमूहे सङ्घेतितोवर्गशब्दः कथमिह तद् वैपरीत्ये प्रयुज्यते ? इति सत्यं, किन्तु

NATIONAL ARCHIVES OF INDIA

मूर्त्तिप्रासादपूजानां हेमाद्रिर्गणकायणीः ।
विष्णुभक्ताङ्गभक्तानां गणयत्युक्तसारधीः ॥२॥

जातिसाम्यं तत्र विवक्षितं न तु संख्यासाम्यं त्रिवर्ग इत्यादि स्वयमुक्तेः । यद्यपि ऊनविंशतिरित्यविशेषेणोक्तं तथापि प्रत्यासत्तेर्लोकरूढेश्चैकोनविंशतित्वं ज्ञेयम् । भक्तैर्नवभिरिति । वक्ष्यमाण गोप्यादिभूयस्त्वेऽपि हास्यादिनवरसावच्छिन्नत्वेन नवत्वं, नवोपाध्यवच्छिन्नत्वात् । नवैव द्व्याणीतिवत् नवभिरित्युक्तं नवविधैरित्यर्थः । तदेवमुपास्यं स साधनोपास्तिरुपासकश्चेति त्रयं प्रकरणार्थ इत्युक्तम् । अयमेव पादचतुष्टयार्थः क्रमात् प्रकरणचतुष्केणाभिधास्यते । एतावानेव भागवते ऽनुष्ठेयोऽर्थः । फलन्त्वत्रैवोक्तमिति न पृथग् दर्शितम् । महाप्रयोजनादयस्तु 'धर्म्मः प्रोज्झित' इत्यत्र टीकायामुक्ता इहानुसन्धेयाः । तत्र कैवल्यलाभः प्रयोजनम् । भक्तियोगोऽभिधेयः । निर्मत्सरत्वविशिष्टसत्वमधिकारिविशेषणम् । न वर्णाश्रमादि । मत्सरः परोत्कर्षासहनम् । सत्वमास्तिकत्वमिति । मूले विप्रकीर्णानामुपास्यादीनां प्रसङ्गान्तराऽसङ्करेण विविक्ततयैकत्र प्रतिपत्तिरिहाबान्तरप्रयोजनम् । अतएवेदं प्रकरणमित्याख्यायते । यथाहुः "शास्त्रैकदेशसम्बद्धं शास्त्रकार्य्यान्तरस्थितम् । आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः" इति । इह च स्वकर्त्तृकत्वेऽपि यदुराजमहामन्त्रिणा हेमाद्रिणाऽभ्यर्थितस्तत्कर्त्तृकत्वं ख्यापितवान् ॥१॥

तदेवाह विष्णित्यादि । चतुर्णां धर्म्मादीनामवर्गश्चतुर्व्वर्गः तत्रेष्टसमर्पको ग्रन्थश्चिन्तामणिः । "मणिर्द्वयोरि"त्यभिधानात् स्त्रीत्वम् । तस्यां हेमाद्रिर्व्रतादिभेदानजीगणत् । गणेर्णिजन्ताद्धेतुमस्मिच् । विदङ्गिर्गणयामासेत्यर्थः । अन्यत्रस्थितानां व्रतादिवाक्यानां युक्त्याऽर्थैकत्रलेखनं नतु स्वयं निष्पादनमिति गणयतेरर्थः । व्रतादि-

NATIONAL ARCHIVES OF INDIA

मुक्ताफलेन ग्रन्थेन सद्भागवत-शुक्तिमा ।
भक्तिस्वात्यम्बुना मुग्धमार्कण्डेयशिशुश्रिया ॥४॥

भेदांश्च क्रमाद्व्रतदान तीर्थ-मोक्ष-परिशेषपूर्वेषु पञ्चसु खण्डेषु मोक्ष-वर्त्मानि मोक्षोपायाः ॥२॥

मूर्त्तयः प्रतिमाः । प्रासादादेवकुलानि । गणकायणीः षुगणके देशकोपयोरायव्ययौ लिखत्सु अग्रणीर्मुख्यः । विष्ण्वादीनाञ्चतुर्णां इन्द्रस्तेषां भेदानित्येव । ननु तादृग्नि लक्षत्रयसम्मिते ग्रन्थे कृतेऽपि किमपरमवशिष्टं यदर्थमस्यारम्भ इति तत्राह । उक्त सारधोरिति । उक्तेभ्यो व्रतादिभ्यः सारे श्रेष्ठे विष्णादिविषये धौर्यस्य स तथा । "आम्र-नास्तोरमन्दारकुसुमोत्करवीचिषु । अ-काशगङ्गास्रोतःसुदि क्षागमदगन्धिषु" (१) "नेयङ्वङ्स्थाना"वित्यादि (२) दर्शनाद्यधि-करणेऽपि बहुव्रीहिः । अग्रमर्थः प्रथमं भगवत्प्रीत्यर्थसुच्चावचानि क्लेशभूयिष्ठानि सोपायानि अनैकान्तिकानि बहिरङ्गानि व्रतदाना-दीनि तत्र गणितानि । ततस्तेषु अतुष्टस्तद्विलक्षणं मोक्षैकफलमुग्रायं प्रकटयितुमिदमचीकरत् ॥३॥

ननु व्रतादिभेदाश्चिन्तामणिनागणिता विष्णादिभेदाः पुनः केनेति तत्राह ग्रन्थनं ग्रन्थः सन्दर्भः सोऽस्मिन्नस्तीति ग्रन्थं प्रकरणम् "अर्शआदिभ्यादच्" (३) यत्राभिन्नरूपेण शब्देन तद्वतोऽ-भिधानं तत्सर्व्वमिहेति हि वृत्तिकारः । यद्वा ग्रन्थशब्दो नपुंसके-ऽप्यस्ति तथाहि पाणिनिना स्वकीये लिङ्गानुशासने "थोपधय" (४) इत्यधिकृत्य काष्ठ-पृष्ठरित्योत्यानि नपुंसके, तीर्थ प्रोथ यूथ-ग्रन्थानि नपुंसकेचेत्युक्तम् । मुक्तानाम वल्ली तस्याः फलं तेन, "गतः सकालो

---

(१) कुमारसम्भवः ६।५ श्लोः । (२) पाणिनिः १।३।२४६ सूः । (३) पाणिनिः ४।२। १२० सूः । (४) पाणिनि-लिङ्गानुशासनम् २।३६ सूः ।

NATIONAL ARCHIVES OF INDIA

मुक्ताफलं सुखचितस्फुटभक्तिभेद-
प्रत्यक्षराजितलसत्पदपद्मरागम्।

यत्रासौन्मुक्तानां जन्मबल्लीषु। वर्त्तते साम्प्रतं तासां हेतवः शुक्तिसम्पुटाः॥" इत्यादि दर्शनाद् बल्लीजमप्यस्ति मौक्तिकम्। यद्वा मुक्तास्फोटो मुक्ता तदीयं फलं चतुर्थादनजातौ चेत्युत्तरपदलोपो भीमादिवत्। ग्रन्थपक्षे तु मुक्तानां अफलं प्राप्तोपेयत्वात्। ग्रन्थः संजल्पः काक्वाव्यञ्जनीयः। अर्थान्मुक्त्यर्थिनां फलदम्। यद्वा मुचां भावो मुक्ता साफलं यत्र ग्रन्थे तत्तथा। तर्व्वथा मुमुक्षूणां फलदमित्यर्थः। ग्रन्थरत्नयोः साधर्म्यमाह सदिति। सती प्रशस्ता भागवतमेव शुक्तिर्जन्मस्थानं यस्य तत्तथा तेन। भक्तिर्भजनं कर्त्तुरनुरागः स एव स्वात्यम्बु यस्य तत्तथा तेन। यथादेशविशेषे स्वातिपयः शुक्तिसम्पुटेषु मूर्च्छितं मौक्तिकं भवति (५) तथानुराग एवास्य ग्रन्थाकारेण परिणत इत्यर्थः। कः पुनरस्यालङ्कार्य इति तमाह मुग्धेति मुग्धो भ्रान्तः मार्कण्डेयो यस्मिन् शिशौ शिशुरूपे विष्णौ स तथा। तस्य श्रीः शोभा यस्मात्तत्तथा तेन। भाषितपुंस्कत्वादिभाषापुम्बद्भावः। मार्कण्डेयो हि हिमवति पुष्पभद्रातीरे भगवन्मायां दिदृक्षुरतिदीर्घं तपस्तप्यमानः कदाचित् प्रसन्नेन भगवता प्रकटितायां मायायां निखिललोकसंप्लवोदके मुहुर्म्मज्जनोन्मज्जनादिभजन् अकस्माद्वटपत्रसंपुटे शयानमतिसुन्दरं भगवद्बालमालोक्य प्रमुमोह। योहि मुनिः पुञ्जिकस्थल्यादिविभ्रमेषु न वभ्राम सोऽप्यत्र मुग्ध इति शिशोः सुन्दरत्वमुक्तम्। तस्याप्येतदलङ्कारइत्यतिशयः। एकञ्च मुक्ताफलं प्रायेण बालमलङ्करोतीति भङ्गिविशेषोक्तिः। यथा मौक्तिकं करकलितं हृदयार्पितं वा सर्वस्यात्मप्रसाधनाय तथेदमपीति रूपकार्थः॥४॥

---

(५) "स्वात्यम्बु शुक्तिकुहरे पतदेवमुक्ताफलं वपङ्कजदले नरजः सु किञ्चित्।" उद्भटः। अन्यद् युक्तिकल्पतरौ मुक्ताप्रकरणेऽस्ति।

NATIONAL ARCHIVES OF INDIA

हेमाद्रिसम्भवसुवर्णनिवेशरम्यं,
कण्ठे कुरुध्वमवरुन्धमपूर्वलक्ष्मीम् ॥५॥

नन्वेवमप्यन्येषु ग्रन्थेषु रत्नेषु च सत्सु किमनेनेति तत्राह। मुक्तेति। सुष्ठु खचिताः सम्बद्धाः स्फुटभक्ति भेदाः प्रत्यक्षराजिताः लसत्पदाः पद्मरागाः शोणरत्नानि यस्मिन् तत्तथा। स्फुटः स्पष्टो भक्तिभेदो रचनाविशेषो येषां पद्मरागाणां ते तथा। प्रत्यक्षा राजिताः सौन्दर्यं येषां ते तथा। राजितेतिक्तान्तं वा। अत्यन्तकान्तिमन्त इत्यर्थः। तथा लसत्शोभमानं पदं स्थानमाश्रयो येभ्यस्ते तथा। हेमाद्रिर्मेरुस्तत्सम्भवं यत् सुवर्णं कनकं तस्य निवेशो निक्षेपः, तेन रम्यमपूर्वं, हेमाद्रिसम्भवत्वेन कनकस्य सुजातत्वमुक्तम्। तदेतदत्युज्ज्वलं सुखचितपद्मराग जाम्बुनदमौक्तिकं भगवता प्रसादीकृतमिव कण्ठे कुरुध्वम्। कर्तुः क्रियासासान्यवाचित्वादात्मनेपद्ध्वम्। हे कुशला इति शेषः। आत्मनेपदाच्च क्रियाफलस्य कर्तृगामित्वम्। तदाह। अवेति अवरुन्धं आवृणुध्वम्। लक्ष्मीं शोभामपूर्वाम्। रत्नान्तरसम्बन्धादननुभूताम्। अन्यच्च तु सुखेन अप्रयासेन चितैः सङ्गतैः स्फुटैः परस्परविविक्तैः भक्तेर्भेदैः विहितावहितादिभिः प्रत्यक्षरम्। अक्षरे अक्षरे अजितस्य विष्णोः लसतोः शोभमानयोः पदपद्मयोश्चरणाम्बुजयोः रागोरतिर्यस्मिन् ग्रन्थे तत्तथा। विश्लिष्टं प्रदर्शितैर्भक्त्यादिभेदैरिह प्रत्यक्षरमोङ्कराकारामतिर्भवतीत्यर्थः। हेमाद्रिःपुरुषविशेषः। ततसम्भवानि तेनोच्चरितानि सुरेखानि यानि वर्णानि अक्षराणि तेषां निवेशनेन तत्र तत्रोचितस्थानेषु न्यासेन रम्यम् सुश्लिष्टम्, वर्णैश्च हीनं स्ववाक्यानां श्लोकत्वमुक्तम्। तत्कण्ठे कुरुध्वम्। कण्ठस्थं यथास्यात्तथाऽभ्यस्यध्वमित्यर्थः। लक्ष्मीमात्मप्रसादरूपां शोभां अपूर्वां ग्रन्थान्तरैरलब्धाम् ॥५॥

NATIONAL ARCHIVES OF INDIA

तत्रादौ विष्णुप्रकरणम्। तत्र विष्णोर्लक्षणं भेदाश्च।

अहमेवासमेवाग्रे नान्यद्यत्सदसत् परम्।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥६॥

एवं श्लोकचतुष्केण पूर्वं रङ्गं विधाय प्रस्तुतमारभ्यते। तत्रेति। तत्र ग्रन्थे। आदौ उद्दिष्टक्रमानुरोधात्। विष्णुप्रकरणे च विष्णुप्रतिपाद्यः। स च सामान्यविशेषावष्टब्धत्वाद् द्वेधा। तत्र सामान्यपूर्विका विशेषप्रतिपत्तिरिति सामान्यलक्षणं वक्तुमाह। तत्रेति। भेदा विशेषाः। अहमित्यादि। अहमेवेतिकर्तृन्तरस्य व्यावृत्तिः। आसमेवेति क्रियान्तरस्य। अग्रे मायासम्बन्धात् प्राक्। मायासम्बन्धेऽपि यत् सत्कार्यं असत्कारणं यच्च परं ताभ्यां परं प्रधानम् तन्न मदन्यत्। मायासम्बन्धादस्त्येव त्रिधा विभक्त इत्यर्थः। पश्चान्मायावियोगादनन्तरमप्यहमेव। प्रपञ्चस्यादिमध्यावसानेष्वहमित्यर्थः। यच्चैतत्प्रपञ्चरूपत्तदप्यहम्। अन्यत्र सिद्धं मयि आरोपितम्। यथाऽन्यत्र सिद्धः सर्पोरज्जौ। एवम्बिधे वञ्चनाङ्गमे निवृत्ते योऽवशिष्येत सोऽहमस्मि। इदन्तयास्वरूपस्य निर्देष्टुमशक्यत्वात् एवमुच्यते, (१) एतेन यथा कटकादिष्ववस्थाचयेऽपि सुवर्णत्वमेव सत्यं तथा जगदादिमध्यान्तेष्वनुस्यूतं सत्तामात्रं भगवत्स्वरूपमिति लक्षणार्थ इत्युक्तम्। न तावदस्यासम्भवः। "स देव सोम्येदमि"त्यादि श्रुतिसिद्धत्वात् (२)। न च कालाकाशादिष्वति व्याप्तिः। तदुत्पत्तेः श्रुतत्वात्; विमतमनित्यं बाध्यत्वात् शुक्तिरूप्यवदित्यनुमानाच्च (३)। नापि साकारेषु चतुर्षु तिव्याप्तिः। तेषामाकारतिरोहितत्वात्। तस्मान्निर्दोषं लक्षणम्। २।८।३२। (६)।

---

(१) भामती—१।१।४ सूः (वेदान्ते)। (२) छान्दोग्योपनिषद्—६।२।१।

(३) अद्वैतसिद्धौ प्रयोग एवमस्ति।

NATIONAL ARCHIVES OF INDIA

सद्वैधानिराकारःसाकारश्च । अनवच्छिन्नं चैतन्यं निराकारः । सत्तावच्छिन्नं चैतन्यं साकारः । स च चतुर्द्वारजस्तमोभ्यां युक्ते सत्वे पुरुषः । रजसा ब्रह्मा । तमसा रुद्रः ॥

अत्र च प्रथमयावक्तुर्निर्देशः । द्वितीयया श्रोतुः । विष्णुर्ब्रह्माणम् । इह च श्लोकानां स्व स्व स्कन्धाध्याययोर्न्यूनाधिक्यमादङ्न्यासः । (२।८।३२। (६)। एवं सामान्यलक्षणमुक्त्वा विशेषां लक्षयितुमाह । सद्वैधेति । द्वैधात्वमेवाह निरेति । अनवच्छिन्ने वस्तुन्यवच्छेदक उपाधिराकारः । तेन रहितो निराकारः । तत्सहितोऽन्यः । तत्राद्यं लक्षयति अनवच्छिन्नेति । सत्वेति । द्वितीयं लक्षयति । अस्यैव भेदानाह । स चेति ।

स साकारः । तत्राद्यं भेदमाह । रजस्तमोभ्यामिति । तुल्याभ्यां रजस्तमोभ्यां युक्ते सत्वे प्रतिफलितं चैतन्यं पुरुषशब्दार्थ इति पूरणीयम् । एवमुत्तरत्र । रजस्तमोभ्यामिति तृतीयया तयोरप्राधान्यम् "सहयुक्तेऽप्रधाने" इति (१) स्मरणात् । तेन पुरुषे सत्वं बहुलं रजस्तमश्च तदपेक्षयान्यूनमित्यर्थः । न तु त्रीणि समान्येव । त्रिसाम्यस्य प्रकृतिलक्षणात् । स्तोकाधिक्यभावश्चैषां कार्य्यगम्यो न तु मानादिमूर्त्तद्रव्यवत् प्रत्यक्षः । युक्तग्रहणं द्वयोर्वर्त्तते । सत्वग्रहणं त्रिषु, भेदमाह रजसेति । रजसा युक्ते सत्वे ब्रह्मा । अत्र च मात्रया विद्यमानमपि तमो रजसः प्राधान्यं वक्तुं नोक्तम् । नतु (नु) तत्रास्त्येव तत्कार्य्यस्योपलम्भात् । तृतीया तु प्राग्वत् । तेन ब्रह्मणि तमस्तोकं तदपेक्षया हेयत्वात् । तुर्य्यप्रकरणानुरोधाच्च । तृतीयं भेदमाह । तमसेति । अत्र रजोमात्रानुरोधादिकं प्राग्वत् ॥

---

(१) पाणिनिः २।३।४६ सूः ।

शुद्धे विष्णुरेव। अगोचरस्य गोचरत्वे हेतुः प्रकृतिगुणःसत्वम्। गोचरस्य बद्धरूपत्वेरजः। बद्धरूपस्य तिरोहितत्वेतमः। तथा परस्परमुदासीनत्वे सत्वम्॥

चतुर्थमाह। शुद्धे विष्णुरिति। शुद्धे रजस्तमोभ्यामस्पृष्टे सत्वे विष्णुरेव। विष्णुसंज्ञयैव क्रियते। न तु तन्त्रान्तरवत्संज्ञान्तरं इत्येव शब्दार्थः। तथाहि—"तमेनं विशुद्धोज्झितसत्वाकारं सदाशिव" इत्याचक्षते शैवाः। "पशुपतिरिति" पाशुपताः। "पुरुषोत्तम" इति पाञ्चरात्राः। "आदिविद्वान् सिद्ध" इति सांख्याः। "ईश्वर" इति पातञ्जलाः (१)। इह तु तस्य विष्णुसंज्ञयैव। यद्वा "विष्णुं पञ्चात्मक" मित्यत्र पञ्चानामपि विष्णुसंज्ञामुक्त्वा चतुर्णां संज्ञान्तरमप्युक्तम्। शुद्धसत्वोपाधिस्तु विष्णुसंज्ञयेवेत्येव शब्दार्थः। ते च ब्रह्मविष्णुरुद्राः प्रत्येकं आधिदैविकादिभेदात्त्रेधा। एवमुपाधिसंभेदात् पञ्चरूपता मुक्त्वा इदानीमनुसंहितोपाधेरुपहितप्रत्ययायोगात् उपाधीन् लक्षयति। अगोचरेति। अगोचरस्याविषयभूतस्य वस्तुनो गोचरत्वे विषयीभावे हेतुर्यः प्रकृतिगुणः तत्सत्वमित्यर्थः। हेतुः प्रकृतिगुण इत्युत्तरत्र पञ्चस्वनुवर्त्तते। गोचरस्य सतो यत्सम्बन्धाज्ज्ञानात्वं तद्रजः। तस्यैवतिरोहितत्वे कारणात्मनाऽवस्थाने हेतुस्तमइत्यर्थः। विनाग्रे इत्यनुक्त्वा सत्कार्य्यपक्षाश्रयणात् तिरोहितत्वे इत्युक्तम्। एवमाधिदैविकोपाधिस्वरूपमाह तथेति। अयमर्थः। परस्परमुदासीनमित्रद्विषत्सु उदासीनत्वे हेतुः सत्वम्।

---

(१) कुसुमाञ्जलिः (न्याय) १।५ श्लोः। शिवसूत्र-व्यासभाष्य-सांख्यदर्शन-नारदपञ्चरात्रेषु च।

उपकारित्वे रजः अपकारित्वे तमः । गोचरत्वादीनि स्थितिसृष्टिसंहाराः । उदासीनत्वादीनि तु ॥

इतरे सृष्टे । आधिदैवाध्यात्मिकोपाधिलक्षणादधिभूतोपाधिस्वरूपमविलक्षितम् । येन हि एकस्मिन् वस्तुनि द्विरूपोविच्छेदः असावाधिभौतिकः । तदुक्तं "योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः ।

यस्त्वोभयविच्छेदः सस्मृतोह्याधिभौतिकः (१) ॥"

ततश्च परिशेषे सिद्धमिति नेहोक्तमिति भावः । उक्तान् गोचरत्वादीन् उपाधीनुन्मीलयितुमाह । गोचरेति । गोचरत्वबहुरूपत्व तिरोहितत्वानि क्रमात्स्थित्यादिशब्दैरुच्यन्त इत्यर्थः । नचैवं सृष्ट्यनन्तरं स्थितिरिति विरुद्धत्वं शक्यम् । स्थितिपूर्व्वकत्वात्सृष्टेः । स्थिताहि सृदादयोघटाद्यात्मनासृज्यन्ते नास्थिता इति । अतएवोक्तं "सत्वं त्रिलोकस्थितये स्व मायया, विभर्षि शुक्लं खलुवर्णमात्मनः । सर्गायरक्तं रजसोपबृंहितम्, कृष्णञ्चवर्णं तमसा जनात्यये" (२) । इत्येवमाध्यात्मिकेष्वपीत्याह । उदासीनेति । अयमर्थः यदिदं चैत्रादेरुपकारापकारवैधुर्य्येणावस्थानं सा स्थितिः । उपकारकत्वेन सृष्टिः, अपकारकत्वेन तु संहारः । ततश्च जगत् स्थित्यादिहेतवः आधिदैविकाः अन्येत्वाध्यात्मिकाः सुरनरादयः । अवतारास्च सर्व्वे विना कृष्णम् । स तु पुरुषः त्रिविक्रमावतारत्वाद् यथोक्तं "तयोर्व्वां पुनरेवाहरदित्यामास कश्यपात् । उपेन्द्र इति विख्यातावामनत्वाच्च वामनः" (३)

---

(१) भागवतं २।१०।८ श्लोः ।

(२) „ १०।३।२० „ ।

(३) „ १०।३।४२ „ ।

NATIONAL ARCHIVES OF INDIA

तेषु विष्णुब्रह्मरुद्रा निमित्तं पुरुष उपादानम्,

इति। अतएव तत्र तत्र विश्वरूपप्रकटनं पूर्व्वावतारदेश वात्सल्यञ्च, दृश्यतेचाद्यापि कुशस्थलीमूर्त्तौ त्रैविक्रमं चिह्नं कृष्णाव्यपदेशश्च। अतएव प्रह्लादसंहितायां द्वारकामाहात्म्ये तृतीयेऽध्याये (४) वैकुण्ठमलङ्करिष्यताभगवता सकलं निजं तेजस्तस्यां मूर्त्तौ विन्यस्तमिति दर्शितम्। तथाहि-"यत्र त्रैविक्रमो मूर्त्तिर्व्वर्हते यत्र गोमती। नरा मुक्तिंप्रयास्यन्ति चक्रतीर्थेन सङ्गताः। कलेवरंपरित्यक्तं प्रभासेहरिणा तदा। कलाभिः सहितं तेजस्तस्यां मूर्त्तौ निवेशितम्। तस्मात् कलियुगे विप्राः! नान्यत्र प्राप्यतेहरिः। यदि कार्य्यं हि कृष्णेन तत्र गच्छत माचिरम्" (५) इति। तथाच "आदौ त्रिविक्रम इति ख्यातिरासीन्महीतले। कृष्णस्य तु कलान्यासात् कृष्णइत्यभिधीयते" (६) इति। यत्तुसत्वंविशुद्धमित्यादिना शुद्धसत्वतासंकीर्त्तनं, तत्सत्वभूयस्त्वविषयम्। ननु यथाश्रुतमेव गुणान्तरकार्य्यस्याप्युपलम्भात्। तत्र तदसत्यमन्यत्र तु वास्तवमिति तु भक्तिमात्रम्। तस्मात् पुरुषएवायमिति सन्तोष्टव्यं निष्कृष्टव्यश्चेदमुपरिष्टात्। यथाचैता ब्रह्मादिमूर्त्तयोगुणमूलाः तथा हास्यादयोरसाश्च तन्मूलाएवेत्युपरिष्टात् प्रवेदयिष्यामः। किम्बहुना तत्तितय तारतम्यवैचित्राक्रान्तमिदंविश्वम्। तदुक्तं "न तदस्ति पृथिव्यांवा दिविदेवेषु वा पुनः। सत्वं प्रकृतिजैर्मुक्तं यदेभिःस्यात्त्रिभिर्गुणै"रिति (७)।

---

(४) प्रह्लादसंहिता द्वारकामाहात्म्ये स्कान्दं।

(५) स्कन्दपुराणीय प्रभासखण्डस्य, हिमवत्खण्डं, ५८ योगिगीतत्वं ४४।२। कूर्म्म पुः-२४।४१।

(६) नृसिंहपुराणं २५।२०।

(७) गीता १८।४० श्लोः।

गोचरत्वेतु चैतन्यम्, एवं पञ्चभेदाः। तत्र निराकारः॥

न यत्रकालोऽनिमिषां परः प्रभुः,
कुतोऽनुदेवा जगतां य ईशिरे।
न यत्रसत्वं न रजस्तमश्च,
नवैविकारी न महान् प्रधानम् ॥७॥

एवमुपाधिस्वरूपं निर्द्धार्य्योपहितेषु संख्याविशेषस्योपयोगमाह—तेष्विति। तेषु स्थितिसृष्टिसंहारेषु विष्ण्वादयः क्रमान्निमित्तम्। कुलाल इव घटस्य, पुरुष उपादानं समवायिकारणं घटस्येव मृत्। दृष्टा च कारणद्वयपूर्विका कार्य्यप्रकृतिः। असमवायिकारणन्तु निमित्तान्तरगतमेवेति पृथङ्नोक्तम्। अतएव "अन्वयादितरत्रचे"(२)ति प्रथमश्लोके इयमेवोपात्तम्। गोचरत्वे प्रतीतिविषयत्वे तु निर्विशेषचैतन्यं हेतुः। "तस्य भासासर्वमिदं विभाति" (३) इति श्रुतेः। तच्च स्थित्यादिनिमित्तार्थं त्रयः उपादानार्थञ्चैकः, गोचरत्वार्थमन्यश्चेति। "विष्णुं पञ्चात्मकं" इत्यत्रत्रयश्चैवोक्ता न न्यूनाधिका इत्यभिप्रेत्याह, एवमिति। नचैवमेकः सामान्यात्मा विशेषरूपाश्च पञ्चेति षट्कमाशङ्क्य विशेषपरिहारे सामान्यस्यानवस्थानात्। एवं तावत् पञ्चवस्तूनि स्वयं लक्षयित्वा तदेव ग्रन्थारूढेन लक्षणेन द्रढ़यितुमाह, तत्रेति। निराकार इति। निराकारस्य लक्षणं कथ्यत इत्यर्थः॥

---

(१) भागवतं १।१।१ श्लोः।

(२) मुण्डकोपनिषद २।१० श्लोः।

NATIONAL ARCHIVES OF INDIA

परं पदं वैष्णवमामनन्तितत्,
यन्नेति नेतीत्यतदुत्सिसृक्षवः।
विसृज्यदौरात्म्य मनन्य सौहृदा,
हृदोपगूह्यार्ह-पदं पदे पदे ॥८॥

तत्रापि न यत्रेति तटस्थस्य, परं पदमिति स्वरूपस्य, तत्परं पदं वैष्णवं आमनन्ति। विष्णुनाधिष्ठितेन राजाधिष्ठितवत्। ब्रह्मादिपदानामपि विष्णुनाधिष्ठितत्वात् परमित्युक्तं विष्णुनैवाधिष्ठितमित्यर्थः। यत्र पदे कालो नास्ति यः अनिमिषां ब्रह्मादीनाम्परः प्रभुः संहर्त्ता महाप्रलयेऽपि नाशो नास्त्येवेत्यर्थः। अतएव कालाभावे किं पुनर्न्यायेन देवा अपि तत्र न सन्तीत्याह, कुतोऽन्विति। तथा देवाभावे जीवा अपि न सन्तीत्याह जगतामिति। ये देवा जगतामुच्चावचां गतिङ्गच्छतां जीवानामीशाः। तेषां वार्त्ता तत् कुतविघ्नगन्धोऽपि नास्तीत्याह। ईशीरे इत्यनित्यत्वद्योतनार्थं लिट्प्रयोगः।

यत्र च पदे सत्वादिर्नास्ति सत्वमिन्द्रियदेवतारूपं, रज इन्द्रियं, तम इन्द्रियार्थरूपं, निराकारोऽहङ्कारस्तेषां 'त्रयाणां कारणं महान् बुद्धितत्वं तदहङ्कारस्य, प्रधानमव्यक्तं तन्महतः, सत्वाद्यभावादेतत् प्राप्तबतां पुनर्ज्जन्मादिशङ्कावीजलेशोऽपि नास्तीत्यर्थः॥ २।२।१७।(७)। एवं दुःखं नास्तीत्युक्त्वा सुखमस्तीत्याह, यत्रेतीति। यद् विष्णुपदं हृदा मनसा उपगूह्याश्लिष्य अनन्यसौहृदा भवन्ति अन्यत्र विषये प्रीतिं परित्यजन्ति तादृक् सुखाभावात्। तद्धि पदे पदे क्षणे क्षणे अर्हपदं अर्हणस्यादरस्य स्थानं उत्तरोत्तरचमत्करणीयत्वात्। दौरात्म्यं विसृज्यानादिदुर्वासनावासितत्वं त्यक्त्वा विषयान्तरस्मृतिरपि (ति) नास्तीत्यर्थः। "नेति नेती"त्युपनिषदुपदेशविश्वासबलात्

NATIONAL ARCHIVES OF INDIA

इत्थं मुनिस्तूपरमेद्व्यवस्थितो-
विज्ञानदृग्वीर्यसुरन्धिताशयः ॥९॥
पुरुषः। भूतैर्यदा पञ्चभिरात्मसृष्टैः,
पुरं विराजं विरचय्य तस्मिन्।
स्वांशेन विष्टः पुरुषाभिधान-
मवाप नारायण आदिदेवः ॥१०॥

---

(१)। अतत् विष्णुपदादन्यत्। उत्सिसृक्षवः स्रेक्ष्यैवोत्सृष्टवन्तः। नित्यनिरतिशयसुखानुभवरूपेऽनुभविता अनुभवनमनुभवनीय इति कर्तृ-करण-कर्माणि अतच्छब्दे नोच्यन्ते। तानि ह्यनुभवार्थमुपादीयन्ते, सत्यनुभवे तु त्यज्यन्ते असत्यत्वादन्तरायत्वाच्च ॥२। २।१८। (८)।

एवमस्य द्विविधं लक्षणमुक्त्वाऽधिकारिणमाह, इत्थमिति। इत्थं व्यवस्थितः अनेन प्रकारेण व्यवस्थामापन्नो मुनिरुपरमेद् न किञ्चित्कुर्य्यात्। यतो विज्ञानस्य विशुद्धज्ञानरूपस्य विष्णोर्दृग्-दर्शनं साक्षात्कारः। तस्य वीर्य्यं बलं तेन सुरन्धितो यथा पुनर्नोदेति तथा हिंसित आशयो जीवत्वोपाधिर्येन स तथा। अयमर्थः। वक्ष्यमाण-भूमिकोपासनाक्रमबलात् सत्वपुरुषान्यताख्यातिमापन्नस्तामपि सायुज्यार्थी निरोद्धुकाम इत्येतामवस्थामापन्नो मुनिः अत्राधिक्रियते नान्यः (२)। अवश्यञ्चाधिकारि-निर्द्धारणार्थमित्थमित्यादि ज्ञेयम्। अन्यथास्योद्धरणं निष्प्रयोजनं स्यात्। शुकः राजानं प्रति ॥ २।२। १८। (९)। पुरुषलक्षणमाह भूतैरित्यादि। आत्मसृष्टैः आत्मना प्रकृतिमधिष्ठाय सृष्टैः पुरं देहं विराजं ब्रह्माण्डं विरचय्य निष्पाद्य-

---

(१) बृहदारण्यकोपनिषद् २।३।६। (२) योगदर्शनभाष्यं १।३-४।

NATIONAL ARCHIVES OF INDIA

यत्काय एष भुवनत्रय सन्निवेशो-
यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि ।
ज्ञानं स्वतः श्वसनतो बलमोजईहा,
सत्वादिभिः स्थितिलयोद्भव आदिकर्त्ता ॥११॥
ब्रह्म विष्णु रुद्राः ।
आद्यावभूच्छुतधृतीरजसाऽस्य सर्गे,
विष्णुस्थितौ क्रतुपतिर्निजधर्मसेतुः ।

तस्मिन् स्वांसेन जीवकलया यदा प्रविष्टः तदा पुरुषसंज्ञामवाप । पूरिशयनाद्वसनाद् वा पुरुषः (१) । अनंशेऽप्यंशोक्तिः कल्पनया नारायणः जलशायी । आदिदेवो निराकारः ११।४।३ । (१०) ।

एवं तटस्थं लक्षयित्वा स्वरूपं लक्षयति, यत्काय इति। एषः दृश्यमानो भुवनत्रयस्य सन्निवेशो यथायथं स्थितिः । यस्येन्द्रियैः "दिग् वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रप्रजापतिभिः" (२) शरीरिणामुभयानि ज्ञानकर्म्मभेदात् । इन्द्रियाणि-श्रोत्रत्वक्चक्षुर्जिह्वाघ्राण-वाक्पाणिपादपायूपस्थाः । स्वतः स्वस्मात् तत् स्वरूपादिति यावत् । तनुभृतां ज्ञानं यस्य श्वसनतः प्राणाद्बलं ज्ञानेन्द्रियाणां पाटवम् । ओजो मनसः । ईहाकर्मेन्द्रियाणां स सत्त्वादिभिर्विशिष्टः । स्थित्यादौ आदिकर्त्ता प्रथमकारणमुपादानत्वात् । विष्णवादयस्तु पश्चात् कर्त्तारः निमित्तत्वात् ११।४।४१ (११) ।

एवं निराकारपुरुषौ लक्षयित्वा ब्रह्मादित्रयं लक्षयति । ब्रह्मेति । स प्रागुक्तः पुरुषः । आदौ श्रुतधृतिर्ब्रह्माऽभूत् । रजसा उपाधिना ।

---

(१) भागवतं २।५।३०। (२) पूरिस्थलशरीरे शेते इति पुरुषः । तत्त्वकौमुदी ।

NATIONAL ARCHIVES OF INDIA

रुद्रोऽप्यये च तमसापुरुषः स आद्य-
इत्युद्भवस्थितिलयाः सततं प्रजासु ॥१२॥

पुरुषरूपम् ।

तद्वामनं रूपमवर्द्धताद्भुतम्,
हरेरनन्तस्य गुणत्रयात्मकम् ।
भूः खं दिशोद्यौर्विवरा पयोधयः,
तिर्यङ्नृदेवाऋषयो यदासत ॥१३॥

सर्गे निमित्ते । स एव स्थितौ विष्णुः सत्त्वेनेत्यर्थसिद्धम् । स्थिति-कर्तृत्वञ्च सन्निधिमात्रेण धर्म्मप्रवृत्तिहेतुत्वात् । तदाह । क्रतुरिति । क्रतुः श्रौतोधर्म्मः । निजः पाञ्चरात्रादिरुक्तः । सेतुर्विधारकः । स एव तमसारुद्रः । अव्ययः प्रलय इति एवम्विधाः रुद्राद्यः स्युः । सततं प्रतिदिनं प्रतिकल्पञ्च ब्रह्मरुद्रयोरनुक्रमपि सत्त्वं लभ्यते । केवलयोस्तु रजस्तमसोरस्वच्छत्वेन प्रतिविम्बायोग्यत्वात् । अतएव सत्त्वेन विष्णु-रिति नोक्तम् । द्रुमिलः निमिम् ११।४।५ । (१२) ।

एवं लक्षितानि पञ्चवस्तूनि । तत्र चतुर्णां ध्यानसिद्धये रूपाणि यथायथं वाच्यानि । तत्रादौ निर्विषयस्य मुमुक्षोः समीहितसिद्धौ सम्यक्त्वमुपायमोक्षमाणस्य विश्वरूपधारणाख्य प्रथमभूमिकोपासनां वक्तुं पुरुषरूपमाह, पुरुषेति । तल्लब्धप्रतिग्रहं । वामनं खर्वम् । अद्भुतं यथा स्यात्तथा । ननु खर्वश्चेत् परिच्छिन्नं स्याद् नेत्याह । अनन्तस्येति । अनन्तत्वे हेतुः कथं तत्राह । गुणेति । गुणोपाधि-कमित्यर्थः । यद् यस्मिन्- भावादयो दश आसत अदृश्यन्त । द्यौः स्वर्गः । विवराः पातालानि ।८।२०।२१ । (१३) ।

NATIONAL ARCHIVES OF INDIA

कायं बलिस्तस्य महाविभूतेः,
सन्ह्रत्विगाचार्य्यसदस्य एतत्।
ददर्श विश्वं त्रिगुणं गुणात्मको-
भूतेन्द्रियार्थाशय-जीवयुक्तम् ॥१४॥
रसामचष्टाङ्घितलेऽथपाद्यो-
र्महीं महीध्रान् पुरुषस्य जङ्घयोः।
पतत्रिणोजानुनि विश्वमूर्त्ते-
रूर्वोर्गणं मारुतमिन्द्रसेनः ॥१५॥
सन्ध्यां विभोर्वाससि गुह्यऐक्षत्,
प्रजापतीन् जाघन आत्ममुख्यान्।

अत्राधिकारिणमाह काय इति। विभूतिरैश्वर्य्यम्। ऋत्विजो यज्ञकृतः। आचार्य्या मन्त्रव्याख्याकृतः। सदस्या उपदेष्टारः। तैः सहितः एतत्सर्व्वं प्रत्यक्षम्। भूतानि महान्ति पञ्च। इन्द्रियाणि दश। अर्थाः पञ्चतन्मात्राणि। आशयाः मनोबुद्धिरहङ्कारश्चित्तञ्चेति चत्वार्य्यन्तःकरणानि (१)। जीवः पुरुषः। एभिर्युक्तं पञ्चविंशति-तत्त्वात्मकमपश्यदित्यर्थः (२)। ददर्शेति सिद्धवदुक्तेर्भगवत्प्रसादा-दिव्यं चक्षुरस्यानुमेयम्। ननु सर्व्वस्वेन भजतो बलेः किं न-तात्त्विक-रूपोपलब्धिस्तत्राह। गुणात्मकः अद्यापाक्षीयमाणगुणत्रयः। एते-नान्योऽपि त्रैगुण्यग्रथितचित्तोऽत्राधिकारीत्युक्तम् ॥८।२०।२२। (१४)

एवं सामान्येन रूपमुक्त्वा यदत्र चिन्त्यन्तदाह, रसामिति। रसां पातालं अचष्ट अपश्यत्। अङ्घ्रेरस्तलेऽधः। अथ शब्दःसर्व्वत्र वाक्य-

---

(१) सांख्यमतेऽन्तःकरणानि त्रीणि, वेदान्तमते तानि चत्वारि। (२) प्रकृतिबुद्ध्यहङ्कार-तन्मात्रैकादशेन्द्रियपञ्चभूतानि पुरुषश्चेति पञ्चविंशतितत्त्वम्।

NATIONAL ARCHIVES OF INDIA

नाभ्यां नभः कुक्षिषु सप्तसिन्धू-
नुरुक्रमस्योरसि ऋक्षमालाम् ॥१६॥
हृदङ्गधर्म्मं स्तनयोर्मुरारे
ऋतञ्चसत्यञ्च मनस्यथेन्दुम् ।
श्रियञ्च वक्त्रस्यरविन्दहस्ताम्,
कण्ठे च सामानि समस्तरेफान् ॥१७॥
इन्द्रप्रधानानमरान् भुजेषु,
तत्कर्णयोः ककुभोद्यौश्चमूर्द्धि ।

भेदार्थं योज्यः । पादयोरुपरीत्यर्थः । महीध्रान् पर्वतान् पतत्रिणः पक्षिणः । जानुनि जानुदेशे । मारुतां गणं आवहादीनां मारुतां-स्तोमम् । इन्द्रसेनोवलिः ॥८।२१।२३ (१५)

विभुर्व्यापी । जघनमेव जाघनम् । आत्मसुख्यान् दैत्यानित्यर्थः । कुक्षिषु कुक्षिप्रदेशेषु कुक्षेरेकत्वेन बहुवचनायोगात् । उरुर्महान् क्रमणं यस्य स तथा । ऋक्षमालां नक्षत्रपङ्क्तिम् ॥८।२०।२४॥ (१६)

अङ्गं अहीरूपाङ्गुतश्रवणस्तिमितचित्तं राजानमुद्बोधयति शुकः । अङ्गेति । धर्म्मं स्मृत्यादिसिद्धम् । श्रौतस्य तु यज्ञग्रहणेन ग्रहणात् । ऋतं यथार्थं वाक्यम् । "सत्यं भूतहितप्रोक्तं ऋतमुक्तं यथार्थवाग्" इत्युक्तेः । यद्वा ऋतं सुनृतम् । सत्यं समदृष्टिः । "सत्यञ्च समदर्शनम्" (१) "ऋतञ्च सुनृतावाणी" (२)त्युक्तेः । अरविन्दहस्तामित्यनेन सर्वतत्त्वानां मूर्त्तत्वम् ज्ञेयं । रेफाः स्तोभाक्षराणि ॥८।२०।२५॥ (१७)

---

(१) भागवतं ११।१८।३७।

(२) „ ११। १८।१८

केशेषु मेघान् श्वसनं नासिकाया-
मक्ष्णोश्च सूर्य्यं वदने च वह्निम् ॥१८॥
वाण्याश्चछन्दांसि रसे जलेशम्,
भ्रूवोर्निषेधञ्च विधिञ्च पक्ष्मसु।
अहश्च रात्रिञ्च परस्य पुंसो,
मन्युं ललाटेऽधर एव लोभम् ॥१९॥
स्पर्शे च कामं नृप! रेतसाम्भः,
पृष्ठेत्वधर्म्मं क्रमणेषु यज्ञम्।
छायासु मृत्युं हसिते च मायाम्
तनूरुहेष्वोषधिजातयश्च ॥२०॥
नदीश्च नाड़ीषु शिलानखेषु,
बुद्धावजं देवगणा नृपाँश्च।

भुजेषु अष्टासु इन्द्रादीनष्टौ। १८॥ छन्दांसि वेदान्। वेदत्वाविशेषेऽपि सामवेदस्य कण्ठात्वमन्तरङ्गत्वार्थम्। तच्च "वेदानां सामवेदोऽस्मी" (१) त्युक्तत्वात्, चकारादृगायत्र्यादीनि सप्तधातुषु। रसे रसनेन्द्रिये। जलेशं वरुणं। भ्रूवोर्विधिनिषेधौ आत्मारूपौ। पक्ष्मसूर्द्ध्वाधःस्थितेषु अक्षिलोमसु अहः रात्रिञ्च मन्युं रुद्रम्। एव शब्दस्तत्त्वानां स्थाननियमार्थः, प्रत्येकं योज्यः॥ ८।२०।२७। (१९)

हे नृप! रेतसा रेतसि आर्षो व्यत्ययः। सुपामित्याकारो वा (२)। क्रमणेषु पादविक्षेपेषु छायासु करादीनां। हसिते हसने। तनूरुहेषु रोमसु। ओषधिजातयः ओषधीः जातीः॥८।२०।२८। (२०)

---

(१) गीता १०।२२। श्लोः। (२) पाणिनिः ७।१।३९।

प्राणेषु गात्रे स्थिरजङ्गमानि,
क्षणार्द्धभावेन विवृद्धमूर्त्तेः ॥२१॥
सर्वात्मनोदं भुवनं निरीक्ष्य,
सर्वे सुराः कश्मलमापुरङ्ग ! ।
सुदर्शनं चक्रमसह्यतेजो,
धनुश्च शार्ङ्गं स्तनयित्नु घोषम् ॥२२॥
पर्ज्जन्यघोषो जलजः पाञ्चजन्यः
कौमोदकी विष्णुगदातरस्विनी ।
विद्याधरोऽसिः शतचन्द्रयुक्त-
स्तूणोत्तमा वक्षय सायकौ च ॥२३॥

बुद्धौ अजं ब्रह्माणं देवादीन् प्राणेषु अनुक्तेष्विन्द्रियेषु गणाः प्रमथाः । किं बहुना गात्रे देहे स्थिरजङ्गमानि ॥८।२०।२८॥ (२१)

कश्मलं मोहम् । एवं ध्यानार्थं मूर्त्तिमुक्त्वा आयुधान्याह सुदर्शनमिति । "सुदर्शनं मनस्तत्त्व"मिति (१) सहस्रनामभाष्ये । धनुरिन्द्रियाहङ्काररूपं चकाराच्चित्तत्वरूपं पद्मञ्च । तच्च "त्रैलोक्याख्य" मिति विष्णुधर्मोत्तरे । स्तनयित्नुर्मेघः ॥ (८।२०।३०) । (२२)

पर्ज्जन्योगर्ज्जन्मेघः । जलजः शङ्खः । स तु भूताद्यहङ्कारः । कौमोदकीतु बुद्धिः । तरस्विनीवेगाख्या बलिष्ठा च । असिर्नन्दकः । विद्याधरः सर्वविद्यामयत्वात् । शतचन्द्रं फलकं शतचन्द्राः चन्द्राकाराणि

---

(१) विष्णुसहस्रनामभाष्ये एकसप्ततितमश्लोकीकृतवचनम् ।

NATIONAL ARCHIVES OF INDIA

सुनन्दमुख्या उपतस्थुरीशम्,
सपार्षदमुख्याः सह लोकपालाः ॥२४॥
स्फुरत् किरीटाङ्गदमीनकुण्डलः
श्रीवत्सरत्नोत्तममेखलाम्बरैः।
मधुव्रतस्रग्वनमालयावृतो,
ररा जराजन् भगवानुरुक्रमः ॥२५॥

विम्बानि यस्मिन् तत्तथा। एतच्च तमोमयं। तूणोत्तमीतु कर्ममयी। सायकाः शराः। तेत्विन्द्रियरूपाः। ततश्चक्र शङ्खौ गदापद्मौ खड्ग-फलके धनुस्तूणौ चेत्यूर्ध्वदक्षिणादिक्रमेण हयोर्ध्वयोर्बाह्वोश्चिन्त्यम् (१)। यथेच्छं वा। एवमष्टौभुजाः॥ ८।२०।३१। (२३)

अथ परिवारदैवतान्याह, सुनन्देति। मुख्यशब्दात् सुनन्द-जयविजय-प्रबलो-हल-कुमुद-कुमुदाख्य-विष्वक्सेन-श्रुतदेव-जयन्त-सात्वत-पुष्पदन्त-प्रचण्ड-बल-महाबलार्हणानां सप्तदशानां ग्रहणम्। एते च भगवत्स्वरूपा एव। विना श्रीगरुड़कौस्तुभान् ते उपतस्थुः-निकटीभूय सेवाञ्चक्रुः। सह लोकपाला इति समासेन लोकपालाना-मप्राधान्यं दर्शयति। तेन ते बहिःपरिधौ पूज्याः। पार्षदास्त्वन्तः-परिधाविति भावः॥८।२०।३२। (२४)

एवं मूर्त्तिवैपुल्येन विशेषं ध्यात्वचित्तमेकाग्रयति, स्फुरदिति। किरीटादीनां समानां द्वन्द्वः। किरीटं मुकुटम् (२)। तच्च पारमेष्ठ्यम् पदम्। मीनो मकरः। तदाकारे रेखाङ्किते कुण्डले च सांख्य-योगौ (३)। श्रीवत्सो भृगुपदन्यासः। रत्नोत्तमः कौस्तुभः। स तु आत्म-ज्योतिः। तत्प्रभा तु श्रीवत्सः। अम्बरं वस्त्रं तच्च च्छन्दो-

---

(१) हयशीर्षपञ्चरात्रं वासुदेवविशेषं गदादीनि अस्त्राणि सन्ति। (२) तद्विविधं करण्ड मुकुटं किरीटमुकुटमिति शिल्पशास्त्रे प्रसिद्धम्। (३) सम्यग्विवेकेनात्मकथनं सांख्यं सिद्धर्षि-कपिलप्रोक्तम्। चित्तवृत्तिनिरोधो योगः अनन्तावतार-पतञ्जलिप्रोक्तः।

NATIONAL ARCHIVES OF INDIA

क्षितिं पदैकेन बलेर्विचक्रमे,
नभःशरीरेण दिशश्च बाहुभिः।
पदं द्वितीयं क्रमतस्त्रिविष्टपम्,
नवै तृतीयाय तदीयमण्वपि ॥२६॥
उरुक्रमस्याङ्घ्रि उपर्य्युपर्य्यथो-
महर्ज्जनाभ्यां तपसः परञ्जतः।
सत्यं समीक्ष्याज भवो नखेन्दुभि-
र्हतस्वधामद्युभिराततोऽभ्यगात् ॥२७॥

मयम्। मधुव्रतैर्युक्ता स्रक् वैजयन्ती यस्य स तथा। शाकपार्थिवादित्वादुत्तरपदलोपः (१)। स्रक् च भूततन्मात्ररूपा वनमालात्वापादलम्बिनी। सा योगमाया कीर्त्तिमयी वा। मधुव्रताः सनकादयः। एतच्च सर्वं द्वादशे भगवान् भजनीयसौन्दर्य्यादिगुणवान्॥ ८।२०।३०। (२५)

एवं विश्वात्मके भगवद्रूपे मनः प्रणिधाय तद्व्यापारे जगदनुग्रहलक्षणे प्रणिदध्यादित्याह, क्षितिमिति। क्षितिं भूलोकं पदा पादेन। बलेः सम्बन्धिनं नभः भूर्लोकं क्रमतः क्रमेण द्वितीयं पदं त्रिविष्टपं स्वर्गलोकं विचक्रमे। अत्र उरुक्रमस्येत्युत्तरवाक्यादे(व) तत्प्रतिपत्त्यर्थं आक्षिपति। तृतीयाय पदाय। तदीयं बलिसत्ताकम्॥ ८। २०।३४। (२६)

उरुक्रमस्येति। अथो स्वर्लोकप्राप्त्यनन्तरं अङ्घ्रिरुपर्य्युपरि गच्छन् महर्ज्जनाभ्यां तपसश्च परं सत्यलोकं गत इत्यर्थः। सत्यमिति। अजभवो ब्रह्मा। सः सत्यलोकस्वामी। इत्यन्तं सप्तलोक-

---

(१) पाणिनिः २।१।६० सूः।

मरीचि मिश्रा ऋषयो बृहद्व्रताः,
सनन्दनाद्या नरदेव योगिनः।
वेदोपवेदा नियमा यमान्विताः,
तर्केतिहासाङ्गपुराणसंहिताः ॥२८॥
येचापरे योगसमीरदीपित-
ज्ञानाग्निनारन्धित कर्म्मकल्मषाः।
ववन्दिरे यत् स्मरणानुभावतः,
स्वायम्भुवं धामगता अकर्म्मकम् ॥२९॥

क्रमितारं त्रिविक्रमाङ्घ्रिम्। त्यक्तदौर्ह्यकार्थे हृतस्वधामद्युभिः निरस्कृत स्वर्लोकदीप्तिभिः नखेन्दुभिः समोक्ष्य हरिचरणोऽयमित्यवधार्यात एवाहृतः ॥८।२०।३४। (२७)

मरीचिर्मिश्रो मिलितो येषु ते तथा। तत्सहिता इत्यर्थः। ऋषयः सत्यवाक्याः। बृहद्व्रता ब्रह्मचारिणः। हे नरदेव योगिनो निरुद्धचित्तवृत्तयः। वेदाः ऋगादयः (१) उपवेदाः आयुर्वेद-गान्धर्व-धनुर्वेदाः (२)। नियमाः शौचादयः पञ्च (३)। यमा-अहिंसादयश्चत्वारः। (४) तेचाङ्गप्रकरणे वक्ष्यन्ते। तर्काः षट्। इतिहासाः पुराणोक्तानि। अङ्गानि व्याकरणादीनि षट्। पुराणानि सर्गादिलक्षणानि। संहितास्त्रिवर्गशास्त्राणि। वेदाद्यधिष्ठात्रो देवताश्चागता इत्यर्थः ॥८।२१।१। (२८)

योगसमीरेण समाधिवायुना सन्दीपितः सम्मुचितो ज्ञानाग्निः तेन रन्धिते पक्वे कर्म्मकल्मषे पुण्यपापे यैस्ते तथा। रन्धितेऽपि

---

(१) प्रस्थानभेदे, चरणव्यूहभाष्ये च। (२) वसिष्ठविश्वामित्रादिप्रोक्ताः। (३) "शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः'। पातञ्जलम् ।२।३२। सूः।

(४) "अहिंसा सत्यास्ते य ब्रह्मचर्य्या परिग्रहा यमाः" पातञ्जलम्। २।३० सूः।

NATIONAL ARCHIVES OF INDIA

अथाङ्घ्रये प्रोन्नमिताय विष्णो-
रुपाहरत्पद्मभवोऽर्हणोदकम् ।
समर्च्य भक्त्याऽभ्यगृणाच्छुचिश्रवा,
यन्नाभिपङ्केरुह सम्भवः स्वयम् ॥३०॥
धातुः कमण्डलुजलं तदुरुक्रमस्य,
पादावनेजन-पवित्रतयानरेन्द्र ।
स्वर्धुन्यभून्नभसि सा पतति निमार्ष्टि,
लोकत्रयं भगवतो विशदेवकीर्त्तिः ॥३१॥
ब्रह्मादयो लोकनाथाः स्वनाथायसमाहृताः ।
सानुगावलिमाजह्रुः संचिक्षेपात्मविभूतये ॥३२॥

सापेक्षत्वेऽपि समासः आर्षः अलुग् वा। ज्ञानाग्निदग्धपुण्यपापा जीवन्मुक्ता इत्यर्थः। ते सर्वे तं अग्निं ववन्दिरे। यस्य स्मरणमाहात्म्याद्ब्राह्मपदं प्राप्ताः। तद्धि अकर्म्मकम्। न तत्र सुखानुभवादन्यत् क्रियते। "न यत्र शोको नजरामृत्यु"(१)रित्याद्यक्तत्वात् ॥ ८।२१।२। (२८)

अथ मरीच्यादिवन्दनानन्तरम्। प्रोन्नमिताय प्रोर्द्धीकृताय। अर्हणोदकं अर्घ्यम्। भक्त्या तात्पर्य्येण। अभ्यगृणात् स्तुतवान्। शुचिश्रवाः अमलकीर्त्तिः। यन्नाभीति पित्वादपि अस्योचिता अर्च्चा इत्यर्थः ॥ ८।२१।३। (३०)

धातुर्ब्रह्मणः कमण्डलुजलं स्वर्धूनी गङ्गाऽभूत्। सा च विष्णुपादप्रक्षालनकृतपवित्रतया त्रीन् लोकान् निमार्ष्टि विशोधयति। कीर्त्तिरिति शुभ्रत्वपावणत्वादौ दृष्टान्तः ॥ ८।२१।४। (३०)

(१) श्वे ताश्वतरोपनिषत् २।२२ श्लोः।

तोयैस्तमर्हणैः स्वर्गभिर्दिव्यगन्धानुलेपनैः।
धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलोत्करैः ॥३३॥
स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमाङ्कितैः।
नृत्यवादित्र गीतैश्च शङ्खदुन्दुभिनिःस्वनैः ॥३४॥
जाम्बवान्नृक्षाधिपतिर्भेरीशब्दैर्मनोजवः।
विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥३५॥

एवं ध्यात्वा षोड़शोपचारां पूजां भावयेदित्याह, ब्रह्मादय इति। तोयादिभिर्बलिं पूजामाजह्रुश्चक्रुः। संक्षिप्त आत्मनः स्वस्य अर्थाद् ब्रह्मादीनां विभूतिरैश्वर्यं येन स तथा। यद्वा संक्षिप्ता आत्मनो विभूतिर्वैभवं रूपवैपुलं येन तस्मै संक्षिप्तरूपायेत्यर्थः। अर्हणैरुपायनैः। उत्करा: समूहाः ८।२१।५ (३२—३३)

अथ प्रदक्षिणमाह, जाम्बवानिति। विजयं जितं विष्णुनेत्यघोषयत्। महानुत्सवो दिक्षु यस्माद् विजयात्। जाम्बवान् हि त्रिविक्रमं प्रदक्षिणीकृतवान्। "सुघोषेण मया चैव तदाविष्णुः सनातनः। प्रदक्षिणीकृतः पूर्वं क्रममाणस्त्रिविष्टपमिति" हि कैस्किन्धे (१) तद्वाक्यम्। शुक्रः राजानम् ८।२१।८। (३४)

एवं त्रैगुण्यधारणां प्रथमभूमिकामुक्त्वा तत्रस्थिरचेतसो त्रैगुण्यधारणां द्वितीय भूमिकामाह, ब्रह्मेत्यादि। विष्णुग्रहणन्तु श्लोकानुरोधात्। श्लोकेऽत्र यद्यपि त्रयाणां प्रतीतिस्तथापि द्वयोरेवात्राभिनिवेष्टव्यम्। इह हि त्रैगुण्य धारणाया विवक्षितत्वाद् विष्णुरूपस्य वक्ष्यमाणत्वाच्च। नचद्वयोर्युगपद्ग्रानानुपपत्तिः। हरिहरार्द्धनारीश्वरादिवदुपपत्तेः। वृषहंससुपर्णस्थान्रुद्रादीनस्तावीदित्यन्वयः। तत्र वृषभारुढ़ः खट्वाङ्गश्मशानकाष्ठ-टाङ्ग-डमरु-परशु-कपालालङ्कृतचतु-

(१) रामायणे कैष्किन्धे ५।१५ श्लोः।

ब्रह्मविष्णुरुद्ररूपाणि ।
वृषहंससुपर्णस्थान् स्वैःस्वैश्चिह्नैश्चचिह्नितान् ।
कृपावलोकेन हसद्वदनेनोपलम्भितान् ॥३६॥
तच्छोचिषा प्रतिहते निमील्य मुनिरक्षिणी ।
चेतस्तत्प्रवणं युञ्जन्नस्तावीत् संहताञ्जलिः ॥
(श्रुच्णया सूक्तया वाचा सर्व्वलोकगरीयसः)॥३७॥(१)
विश्वोद्भव-स्थिति-लयेषु विभज्यमानै-
र्मायागुणैरनुयुगं विगृहीतदेहाः ।

भुजा चर्म्मवसना भस्माङ्गरागा फणिकपालविभूषणा (२) रुद्रमूर्त्तिश्चिन्त्या । ब्रह्ममूर्त्तिस्तु हंसारूढा चतुर्म्मुखो चतुर्भुजा तप्तकाञ्चनवर्णा शुक्लवस्त्रा लम्बकूर्चा तुन्दिला सौम्या पिङ्गाक्षो सोत्तरीयोपवीता योगपट्टासना जटामुकुटालङ्कृताऽक्षसूत्र पुस्तक कमण्डलुस्रुवान् दधानेति । कृपयावलोकः तेन हसद्वदनेन च उपलम्भितान् प्रसन्नत्वेन प्रापितान् ॥ ४।१।२४। (३६)

तेषां शोचिषाप्रभया । प्रतिहते प्रतिघातं नीते । मुनिरत्रिः । अनुयुगं कल्पे कल्पे । विश्वोद्भवो वैसादृश्ये । ४।१।२५ (३७)

ते प्रसिद्धाः तेभ्यः सकाशादेक एवोपक्षतः । स च क इति युष्माभिरेव कथनीयइत्याह, प्रधानं प्रकृष्टाधारणा । अचित्तं चित्तं कृतश्चित्तीकृतः । चित्तेनैक्यं नीत इत्यर्थः । प्रजननाय पुत्रोत्पत्त्यै । एकस्मिन् ध्यातेषु त्रयः कथमत्रागताः इति ब्रूत । दूरा अगोचराः । प्रसीदत प्रसादं कुरुत । इह त्रयाणामागमनं ।

---

(१) भागवतीय श्लोकार्द्धम् ४।१।२५ ।

(२) अर्द्धनारीश्वर-महाकाल-कालसंहारादीनां ध्यानेषु एतादृशरूपं वर्णितमस्ति ।

NATIONAL ARCHIVES OF INDIA

ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहंवः,
तेभ्यः कृएव भगवन् मयि होपकृतः ॥३८॥
एको मयेह भगवान् विबुधप्रधानै-
श्चित्तीकृत प्रजननाय कथं नु यूयम् ।
अवागतास्तनुभृतां मनसोऽपि दूरा-
द्ब्रूत प्रसीदतमहानिह विस्मयो मे ॥३९॥
देवा ऊचुः ।
यथाकृतस्ते सङ्कल्पो भाव्यत्तेनैव नान्यथा ।
सत्सङ्कल्पस्य ते ब्रह्मन् यद्वै ध्यायति ते वयम् ॥४०॥

इति श्रीवोपदेवकृतेमुक्ताफले विष्णोर्लक्षण-भेदाश्च ।
इति प्रथमोऽध्यायः ॥

एतेनाचि तुल्योऽधाकारीति ज्ञेयम्। अचि हि रजस्तमः प्रकृतिः प्रजाकामत्वात्। यथोक्तं "रजस्तमः प्रकृतयः समशीलान् यजन्ति-हि। पितृभूतप्रजेशादीन् श्रियैश्वर्य-प्रजेप्सवः" इति (१) ॥ ४।१। २६-२७। (३८—३९)

एवं मूर्त्तिद्वयं ध्यायमानोऽप्यभेदं भावयेदित्याह, यथेति। ते तया। एवशब्दोभिन्नक्रमः। अन्यथा न भाव्यमेवेति। यतस्त्वं सत्य-सङ्कल्पः अतस्तवसङ्कल्पभङ्गोमाभूदिति त्रयोवयमागता इत्यर्थः। एकस्यैव त्रिष्वधिष्ठातृत्वात्। मैत्रेयोविदुरम् ॥ ४।१।२८ (४०)।

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णोर्लक्षणभेदाश्च ।
प्रथमोऽध्यायः ॥

---

(१) भागवतं १।२।२७ श्लोः।

NATIONAL ARCHIVES OF INDIA

द्वितीयोऽध्यायः ।

—*—

विष्णुरूपम् ।

तत्राद्भुतम्बं भवनं द्युमत्तमम्,
भ्राजन्मणिस्तम्भसहस्रशोभितम् ।
तस्मिन्महाभौममनन्तमद्भुतं,
सहस्रमूर्द्धन्यफणामणिद्युभिः ॥१॥
विभ्राजमानं द्विगुणोत्तरोत्तरम्,
सिताचलाभं शितिकण्ठजिह्वम् ।
ददर्श तल्लोगसुखासनं विभुम्,
महानुभावं पुरुषोत्तमोत्तमम् ॥२॥

एवं धारणाद्वयाभ्यासबलाज्जितरजस्तमस्कस्य मुमुक्षोः सत्वजयार्थं शुद्धसत्वधारणां द्वितीयभूमिकामाह । विष्णुरूपमिति । तत्र गर्भोदके भवनादिकमच्युतो ददर्शेत्युत्तरेणान्वयः । द्युमत्तमं शोभाढ्यम् । भ्राजन्तो मणयो येषु स्तम्भसहस्रेषु तैः शोभितं, तस्मिन् भवनेऽनन्तं शेषं प्रधानात्मकं ददर्श । सहस्रं मूर्द्धन्याः श्रेष्ठा ये फणार्पितमणयः तेषां द्युभिर्द्विगुणं सहस्रापेक्षम् । सिताचलाभं श्वेतपर्वतसदृशम्, शितयो नीलाः कण्ठा जिह्वाश्च यस्य स तथा । तस्य शेषस्य भोगः शरीरम् । विभुं प्रकृतेरधिष्ठातारं पुरुषम् । अतएव विशेषणद्वयम् । अनुभावः, प्रभावः । पुरुषोत्तमेषु ब्रह्मादिषु उत्तमम् ।

NATIONAL ARCHIVES OF INDIA

सान्द्राम्बुदाभंसुपिशङ्गवाससम्,
प्रसन्नवक्त्रं रुचिरायतेक्षणम् ।
महामणिव्रातकिरीटकुण्डल-
त्विषा परिष्वक्तसहस्रकुन्तलम् ॥३॥
प्रलम्बचार्वष्टभुजं सकौस्तुभम्,
श्रीवत्सलक्ष्मं वनमालयावृतम् ।
सुनन्दनन्दप्रमुखैश्च पार्षदै-
श्चक्रादिभिर्मूर्त्तिधरैर्निजायुधैः ॥४॥
पुष्ट्याश्रिया कीर्त्यजयाखिलर्द्धिभि-
र्निषेव्यमाणं परमेष्ठिनाम्पतिम् ।

मुक्तेषु वा नित्यमुक्तत्वात्। तथाच सूत्रद्वयम्। "तत्र निरतिशयं सर्व्वज्ञबीजम्"। "स एष पूर्वेषामपि गुरुः कालेनानवच्छेदा"दिति (१)। अस्य च लीलया शरीरग्रहणम्।

सुपिशङ्गं पीतोज्ज्वलं आयतं दीर्घम्। महामणीनां व्रातः स्तोमो यत्र किरीटे कुण्डलयोश्च तेषां प्रभया परिष्वक्ताःव्याप्ताः सहस्रं बहवः कुन्तलाः केशा यस्य स तथा तम्॥ १०।८८।५४—५५। (१—३)

आयुधादेर्विशेषः प्राग्वत् (४)।

कीर्त्तिश्चाजा माया इन्द्वैक्येऽपि न नपुंसकत्वम्। "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" (२) इतिवत्। अखिलर्द्धिभिरणिमादि सर्व्व-

---

(१) पातञ्जलं १।२६। सूः

(२) पाणिनिः १।२।२७ सूः।

NATIONAL ARCHIVES OF INDIA

ववन्द आत्मानमनन्तमच्युतो-
जिष्णुश्च तद्दर्शनजातसाध्वसः ॥५॥

नेदृगीवेच्छारूपत्वात् ।

त्वद्भावयोगपरिभावितहृत्सरोज-
आस्ते श्रुतेक्षितपथोननुनाथ पुंसाम् ।
यद्यद्धिया त उरुगाय विभावयन्ति,
तत्तद्वपुः प्रणयसे तदनुग्रहाय ॥६॥

सिद्धिभिः । परमेष्ठिनां परमैश्वर्यवतां पतिं स्वामिनम् । अत्राधिकारिणमाह, ववन्द इति । आत्मानं तस्यैव कृत्स्नत्वेन वैलक्षण्याभावात् । प्रदीपादिव प्रज्वलितस्य दीपस्य । जिष्णुरर्जुनः स तु तद्दर्शनेन जातभयः । एतेन शुद्धसत्वोऽत्राधिकारीत्युक्तम् । शुकः ॥ १०।८८।५६। (५)

नन्वीदृशमेव चेद्विष्णुरूपं तत्कथमन्यथा तत्र तत्रोपवर्ण्यते इति तत्राह नेदृगीवेति । अत्र हेतुमाह । इच्छैव रूपं यस्य स तथा । तस्य भावः तस्मात् । भक्तेच्छैव चतुर्भुजाद्याकारेण परिणमतीत्यर्थः । अत्रैव मूलं योजयति, त्वद्भावेति । हे उरुगाय विष्णो ! त्वं भावयोगेन परिभाविते विशोधिते हृत्सरोजे आस्ते अभिव्यक्तः सन्नवतिष्ठसे । तत्र हेतुः श्रुतेन शास्त्रेणेक्षितो निर्ज्ञातः पन्थाः स्वरूपस्थितिर्यस्य स तथा । वेदोऽत्र प्रमाणमित्यर्थः । अतस्ते भक्ताः यद्यद्वपुः स्वधिया विभावयन्ति चिन्तयन्ति, तत्तत्प्रणयसे प्रकटयसि । व्यापकत्वेन हृदयस्थोऽपि भक्तैर्येन केनाऽप्याकारेण विषयीकृतस्तदनुग्रहाय प्रकटोऽसीति भावः । ब्रह्मविष्णुम् ३।८।११ (६)

NATIONAL ARCHIVES OF INDIA

तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव।
यानि यानि चरोचन्ते स्वजनानामरूपिणः ॥७॥
शुद्धसत्त्वं विष्णुरूपमेवोपास्यतमम्।
सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परःपुरुष एकइहास्यधत्ते।
स्थित्यादये हरिविरिञ्चिहरेतिसंज्ञाः,
श्रेयांसि तत्र खलु सत्वतनोर्नृणांस्युः ॥८॥

किञ्च तान्येवेति। ते त्वयैवहेतुना। अभिरूपाणि सुन्दराणि न तु भूषणाद्युपाधिना स्वभावसुभगानीत्यर्थः। येभ्यो भक्ताः स्पृहयन्ति तान्येव ते रूपाणि न तु स्वतःसिद्धानीत्येव शब्दार्थः। अत उक्तं इच्छारूपत्वादिति। अरूपिणः वस्तुतः अरूपोऽपि भक्तेच्छया रूपवानित्यर्थः। कर्दमः कपिलम्॥ ३।२४।३१ (७)

एवं भगवतः पञ्चप्रभेदान् लक्षणतो रूपतश्च विविच्य पञ्चानामपि साम्ये प्राप्ते उत्तराधरभावं विवेक्तुमाह, शुद्धसत्वेति। तदेवाह शुद्धं रजस्तमोरहितं यस्मिन् विष्णुरूपे तत्तथा। तदेवोपास्यतमम्। इदमेषामतिशयेनोपास्यम्। तमबर्थो ह्यतिशयः। स चान्यसाम्येऽपि इत्यर्थात्। ब्रह्मरुद्ररूपमुपास्यतरमिति। अयमर्थः—स्थूलसूक्ष्मक्रमेण बुद्धयोऽर्थमवगाहन्त इति प्रथमं त्रिगुणात्मके भगवद्रूपे मनः प्रणिधाय तत्र स्थिरं सद् द्विगुणात्मके, ततः परं सत्वैकगुणे। ततश्च निर्गुणे सूक्ष्मे ब्रह्मणि प्रवेश्य नित्यनिरतिशयानन्दलाभेन ध्याता कृतकृत्यतामेतीति। ते चामी साकारव्यापिनो मृदुमध्याधिमात्रोपायत्वेन त्रयः। प्रत्येकं मृदुमध्याधिभेदत्वेन नवस्युरिति योगशास्त्रे (१)। तत्रा-

---

(१) योगदर्शनं १।२१—२२।

NATIONAL ARCHIVES OF INDIA

सत्वं विशुद्धं श्रयते भवान् स्थितौ,
शरीरिणां श्रेय उपायनं वपुः ।
वेदक्रिया योगतपः समाधिभि-
स्तवार्हणं येन जनः समीहते ॥८॥

दयोरवस्थाभेदाद् भेदषट्कः स्वयमुन्नेयः । अन्यस्य तु भेदत्रयं वक्ष्यति । एकत्रव्यवस्थाभेदाद् नवविध इत्यर्थः ॥

उक्तमर्थं द्रढयन्नाह सत्त्वं रज इति । अस्यप्रपञ्चस्य स्थित्यादये स्थितिसृष्टिसंहारार्थं सत्वादियुक्तः संज्ञात्रयं धत्ते । तत्र सत्त्वतनोर्विष्णोः श्रेयांसि शुभफलानि स्युः । खलु शब्दो निश्चये सचातिशयं तमवर्थं गमयतीत्युपात्तमत्वम् । यद्यप्यंशतः सत्त्वसद्भावादन्येषामपि सत्वतनुत्वम् । तथा "ऽप्यवृभत्तो वायुभक्त" (२) इतिवत् सत्वमेव तनुर्यस्येति शुद्धसत्वं रजस्तमसोः सदपि सत्वं न फलप्रदम् । किन्तु शुद्धामेवेति भावः । सुतः शौनकम् ॥ १।२।२३ (८)

तदेवाह, सत्वमिति । सत्वं वपुरिति सामानाधिकरण्यं स्थितौ निमित्ते श्रेयसि केवलेऽ उपायनं उपायभूतम् । तदाह, वेदेति । येन सत्त्ववपुषाश्रितेन । जनस्तवार्हणं पूजां समीहते सम्यक्करोति । शुद्धस्याविषयत्वात् सत्वोपहितं भजतीति भावः । क्रियायोग इत्येकम् । ततश्च वेदादिभिश्चतुर्भिः क्रमादाश्रिताः पूजयन्तीति चतुर्णामुक्तिः । यद्वा वेदेन वैदिकाः (१) । क्रियया पाञ्चरात्राः । योगेन प्रकृतिपुरुषविवेकोपायेन सांख्याः । तपसा तपस्विनः । शैवाः पाशुपताश्च । समाधिना पातञ्जलाः । सत्वोपाधेरेव तत्तच्छब्दैस्तत्र-तत्राभिधानमिति प्रागुक्तम् । पाञ्चैवमार्गाः । अतो मार्गपञ्चकविषयत्वेन पञ्चानामुक्तिः १०।२।३४। (९)

---

(२) महाभाष्ये १।१।१। (१) मुक्तिवाद सन्दर्भः ।

NATIONAL ARCHIVES OF INDIA

सत्त्वं नचेद्वातरिदं निजं भवे-
द्विज्ञानमज्ञानभिदापमाज्ज नम् ।
गुणप्रकाशैरनुमीयते भवान्,
प्रकाशते यस्य च येन वा गुणः ॥१०॥
न नामरूपे गुणकर्म्मजन्मभि-
र्निरूपितव्ये तव तस्य साक्षिणः ।

सत्त्वं वपुरित्युक्तं तदसृष्यमाणं प्रति विपक्षे बाधकमाह, सत्त्वं न चेदिति । हे धातः इदं प्रागुक्तं विशुद्धं सत्त्वं निजं वपुष्टेन स्वरूपं न स्यात् । चेत्तर्हि विज्ञानं विशिष्टं ज्ञानं माज्ञनं लोपं आप प्राप्नुयात् । लोकोक्त्या लिट् प्रयोगः । निर्मूलत्वात्तत्स्यादित्यर्थः । किन्तदैशिष्ट्यम् ? तदाह, अज्ञानभित् सर्ववस्तुतत्त्ववेदकं न तु भ्रमरूपमित्यर्थः । ज्ञानं हि सत्वादुत्पद्यते तच्चेत्सत्त्वं नास्ति तदा ज्ञानमपि नस्यात् । दृश्यते च ज्ञानं,अतस्त्वं सत्त्ववपुरित्यनुमीय स इत्याह, गुणेति । गुणप्रकाशैः सत्वजन्यैर्विषयप्राकट्यैः । ननु सत्त्वस्य जड़त्वात् कुतः प्रकाशकत्वं तत्राह प्रकाशत इति । गुणश्च यस्य सम्बन्धेन प्रकाशते प्रकाशयति अन्तर्भावितनिजर्थत्वात् । येन वा कर्त्तृभूतेनेति परमतमुक्तम् । वाशब्दो हि पक्षान्तरार्थः सर्वथा चिदुज्ज्वलितं प्रकाशकमित्यर्थः । एवमपिसत्त्वमेव प्रकाशकं न तु रजस्तमसो तयोरस्वच्छत्वेन चिति संक्रान्त्यनुपपत्तेः । यथा रवितेजो दर्पणादिष्वेव प्रादुर्भूय मुखादि प्रकाशयति न घटादिषु ॥ १०।२।३५ (१०)

अस्तु तर्हि सत्त्वयोगो नित्य एव नत्वैच्छिक इत्यत आह, न नामेति । नामरूढं योगिकञ्च, रूपं श्यामादि । गुणःसौन्दर्य्यादिः । कर्म्मचरितं निग्रहानुग्रहरूपम् । जन्म शरीरग्रहणम् । सहार्थे तृतीया ।

NATIONAL ARCHIVES OF INDIA

मनो वचोभ्यामनुमेयवर्त्म नो-
देवक्रियायाम्प्रतियन्त्यथापि हि ॥११॥
शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्,
नामानि रूपाणि च मङ्गलानिते ।
क्रियासु युष्मच्चरणारविन्दयो-
राविष्टचित्तो न भवाय कल्पते ॥१२॥

न निरूपितव्ये निरूपयितुमशक्ये । आर्षोणिलोपः । नामादिपञ्चकं तव वक्तुं न शक्यते । कुतः साक्षिणः त्वं हि तेषां साक्षी द्रष्टा द्रष्टुश्च दृश्यत्वानुपपत्तिः । साक्षित्वमेव कुत इति चेत्तत्राह तस्येति। तस्य समाधौ चिन्मात्रतयाऽनुभूयमानस्यानुभूतवाचित्वाच्चास्य तच्छब्दस्य यच्छब्दानपेक्षा । यथा,—

"उत्कम्पिनी भयपरिस्खलितांशुकान्ता ।
ते लोचने प्रतिदिशं विदुरेक्षिपन्ति" ॥

इत्यादावनुभूतिमपह्नुवानं प्रत्याह, मन इति । यतश्चाचेतने मनो वचसो प्रसरतः स कश्चिदस्तीत्यनुमानम् । हे देव ! अथापि एवमपि क्रियायां षोड़शोपचारपूजायाम् । प्रतियन्ति जानन्ति । वस्तुतस्त्वं सत्यपित्वयि वागा (चा)दिप्रवृत्त्यर्थं भक्ताः कल्पयन्तीत्यर्थः ॥ १०।२।३७ (११)

ननु नामादेरवास्तवत्वेऽकिञ्चित्करत्वं स्यात्तत्राह शृण्वन्निति। संस्मरयन्नन्यैः रूपाणि चेति चकारादगुणकर्म्मजन्मानि च । आविष्टत्वं अवस्थान्तराविष्कारः, भवः संसारः । अवास्तवस्यापि सत्यार्थहेतुत्वं रज्जुसर्पादेरिव भयादिहेतुत्वमित्यर्थः । तस्मात्सिद्धमस्योपास्यतमत्वम् । ब्रह्माद्याः श्रीकृष्णं प्रति ॥ १०।२।३८।भाः (१२)

NATIONAL ARCHIVES OF INDIA

विष्णुरूपं (अवयवशोरूपं) क्रमेण पादादिहसितान्त-
मुपास्यतमम् ।

तस्मिन् लब्धपदं चित्तं सर्वावयवसंस्थितम् ।
विलक्ष्यैकत्र संयुञ्ज्यादङ्गे भगवतो मुनिः ॥१३॥
सञ्चिन्तयेद्भगवतश्चरणारविन्दम्
वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।
उत्तुङ्गरक्तविलसन्नखचक्रवाल-
ज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ॥१४॥
यच्छौचनिःसृत सरित्प्रवरोदकेन,
तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवाऽभूत् ।
ध्यातुर्मनः शमलशैलनिसृष्टवज्रम्,
ध्यायेच्चिरं भगवतश्चरणारविन्दम् ॥१५॥

अधिमात्रोपायस्त्विधेत्युक्तम् (१)। तत्र मृदधिमात्रमाह, विष्णु-रूपेति। हसितस्यावधित्वं प्रकाशमात्रत्वेन निराकारसन्निकृष्ट-त्वात्। स्थूलमाह, तस्मिन्निति। तस्मिन् विष्णुरूपे पदं स्थैर्यं विलक्ष्य एकैकमङ्गं विवेकेन लक्षीकृत्य सञ्चिन्तयेदिति। चक्रवालं मण्डलं, महतोध्यातुर्हृदयम् ॥ ३।२८।२०। (१३--१४)

दक्षिणमङ्घ्रिं ध्यात्वा गङ्गायाः प्रभवं वामं ध्यायेत् इत्याह, यच्छौचेति। सरित्प्रवरागङ्गा। तीर्थं तारकम्। अधिकृतेन।

---

(१) 'मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः' योगदर्शनं १।२२ सूः।

NATIONAL ARCHIVES OF INDIA

जानुद्वयं जलजलोचनया जनन्या-
लक्ष्म्याखिलस्य सुरवन्दितया विधातुः ।
ऊर्वोर्निधाय करपल्लवरोचिषा यत्,
संवाहितं हृदिविभोरभवस्य कुर्य्यात् ॥१६॥
ऊरूसुपर्णभुजयोरधि शोभमाना-
वोजोनिधीअतसिका कुसुमावभासौ ।
व्यालम्बिपीतवरवाससि वर्त्तमान-
काञ्चीकलापपरिरम्भिनितम्बबिम्बम् ॥१७॥
नाभिह्रदंभुवनकोशगुहोदरस्थं,
यत्वात्मयोनिधिषणाखिललोकपद्मम् ।

स्वाभाविके शिवत्वे निमित्तोत्प्रेक्षा शिव इति। तस्याश्चेवादि-मन्तरेणाप्युपलम्भात्तदप्रयोगः। शमलं पापम्। निसृष्टं प्रहितम्। ३।२८।२२। (१५)

जानुद्वयमिति। अखिलस्य विधातुर्ब्रह्मणः जनन्या एवम्भूतया परिसंवाहितमित्यतिशयार्थं विशेषणत्रयं ऊर्वोरित्यादरार्थम् (२)। रोचिषेति स्पर्शनचातुर्य्येण एतत् परमसौकुमार्य्यार्थम् ३।२८। २३। (१६)

ऊरू इति अधि ऊर्ध्वभागेओजो बलं तेजश्च। व्यालम्बि विततत्वात् विन्यासविशेषाच्च यत्पीताम्बरञ्च वासस्तस्मिन् वर्त्तमानस्तदुपरिवद्धो यः काञ्चीकलापः स्तस्य परिरम्भः सर्वतः संश्लेषो यस्यास्ति तत् स्त्रीकटीवत् सौन्दर्य्यं वक्तुं नितम्बशब्दः ॥ ३।२८।२४ (१७)

---

(२) अवयोगप्रक्रिया-योगचिन्तामणौ, विपुरासारसमुच्चये, योगतारावल्यादौ चानुसन्धेया।

व्यूढं हरिन्मणिवृषस्तनयोरमुष्य,
ध्यायेद्दृयं विशदहारमयूखगौरम् ॥१८॥
वक्षोधिवासमृषभस्य महाविभूतेः,
पुंसां मनोनयननिर्वृतिमादधानम्।
कण्ठञ्च कौस्तुभमणेरधिभूषणार्थम्
कुर्य्यान्मनस्यखिललोकनमस्कृतस्य ॥१९॥
बाहूंश्च मन्दरगिरेः परिवर्त्तनेन,
निर्निक्तबाहुबलयानधिलोकपालान्।
सञ्चिन्तयेद्दशशतारमसह्यतेजः,
शङ्खञ्चत्तत्करसरोरुहराजहंसम् ॥२०॥

गुहानीरन्ध्र आश्रयः यत्र ऋदे। आत्मयोनेर्ब्रह्मणः धिषणं स्थानं पद्ममासीत्। हरिन्मणिवृषौ मरकतश्रेष्ठाविव यौस्तनौ तयोर्द्वयं व्यूढं विशालम् ॥ ३।२८।२५ (१८)

वक्ष इति। ऋषभस्य विष्णोर्महाविभूतेः लक्ष्म्याः अधिवासं स्थानं पुंसाम्। किं पुनः स्त्रीणाम्। कौस्तुभस्याधिक्येन भूषणमर्थः प्रयोजनं यस्य स तथा। कण्ठेन कौस्तुभः शोभते इत्यतिशयः॥ ३। २७।२। (१९)

बाहुनिति। परिवर्त्तनं सव्यापसव्यभ्रमणम्। निर्णिक्तं शोधितम्। अधिलोकपालान् लोकपालाधिष्ठातॄन्। दशशतारं चक्रं शङ्खस्य सर्व्वतः शौक्ल्येन मुखमूलयोर्लौहित्येन च राजहंसोपमा॥ ३। २८।२७। (२०)

NATIONAL ARCHIVES OF INDIA

कौमोदकीं भगवतो दयितां स्मरेत,
दिग्धामरातिभटशोणितकर्दमेन ।
मालां मधुव्रतवरूथ गिरोपघुष्टां,
चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे ॥२१॥

भृत्यानुकम्पितधियेह गृहीतमूर्त्तेः,
सञ्चिन्तयेद्भगवतो वदनारविन्दम् ।
यद्विस्फुरन्मकरकुण्डलवल्गितेन,
विद्योतितामलकपोलमुदारनासम् ॥२२॥

यच्छ्रीनिकेतमलिभिः परिषेव्यमाणम्,
भूत्यास्वया कुटिलकुन्तलवृन्दजुष्टम् ।
मीनद्वयाश्रितमधिक्षिपदब्जनेत्रम्,
ध्यायेन्मनोमयमतन्द्रित उल्लसद्भ्रूः ॥२३॥

कौमोदकीमिति। दिग्धां लिप्तां। भटायोद्धारः। वरूथः समूहः। उपघुष्टां वाचालीकृताम्। चैत्यस्य चेत्रस्य तत्त्वं कारणम् परं ज्योतिः तद्रूपं मणिं कौस्तुभम् ॥ ३।२८।२९। (२१)

भृत्येति। वल्गितं चलनं यद् वदनाब्जं श्रीनिकेतं पद्मं अधिक्षिपेत्। विशेषणप्रधानो निर्देशः। श्रीनिकेतत्वादिधर्माश्रयं विशिष्टं क्षिपतीत्यर्थः, तत्र स्वभूत्या श्रीनिकेतत्वस्याक्षेपः। कुन्तलैरलियुक्तत्वस्य नेत्रद्वयेन मीनद्वययुक्तत्वस्य। मनोमयं मनसः परिणामम् ३। २८।२९ (२२—२३)

NATIONAL ARCHIVES OF INDIA

तस्यावलोकमधिकं कृपयातिघोर-
तापत्रयोपशमनाय निसृष्टमक्ष्णोः ।
स्निग्धस्मितानुगुणितं विपुलप्रसादम्,
ध्यायेच्चिरं विततभावनया गुहायाम् ॥२४॥
हासं हरेरवनताखिललोकतीव्र-
शोकाश्रुसागरविशोषणमत्युदारम् ।
सम्मोहनाय रचितं निजमायया स्य,
भ्रूमण्डलं मुनिकृते मकरध्वजस्य ॥२५॥
ध्यानायनं प्रहसितं बहुलाधरोष्ठ-
भासारुणायिततनुद्विजकुन्दपङ्क्तेः,
ध्यायेत् स्वदेहकुहरेऽवसितस्य विष्णो-
र्भक्त्यार्द्रयार्पितमना न पृथग् दिदृक्षेत् ॥२६॥

तस्येति । अनुगुणितं युक्तम् ॥ विपुलो बहुः गुहायां हृदि ॥ ३।२८।३१ (२४)

हासमिति । निजमायया अस्य जगतः सम्मोहनाय रचितं हासं ध्यायेत् । मुनीनामपि सम्मोहनं माभूदिति तत् संमोहनाय प्रवृत्तस्य कामस्य सन्तर्जनेन सम्मोहनाय रचितं भ्रूमण्डलं ध्यायेत् ॥ ३।२८।३२ (२५)

अव्यक्तं हसितमुक्त्वा प्रव्यक्तं हसितमाह, ध्यानायनमिति । प्रहसितं प्रकाशध्यानातिमात्रत्वाद् निराकारेण स्पर्द्धते । अतएव ध्यानायनं व्यवधानोल्पत्वाद् बहुलया अधरोष्ठस्य भासा अरुणायिता

NATIONAL ARCHIVES OF INDIA

एवं हरौ भगवति प्रतिलब्धभावो-
भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ।
औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमान-
स्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ॥२७॥
मुक्ताश्रयं यर्हि निर्विषयं विरक्तम्,
निर्वाणमृच्छति मनः सहसा यथार्चिः ।

लौहित्यं नीता । तनूनां द्विजानां एवं कुन्दकलिकानां पङ्क्तिर्यत्र तत् । देहकुहरं हृदयाकाशं (१) । अवमितस्य निर्ज्ञातस्य आर्द्रया भक्त्या आनन्दरसेन पृथक् तद्व्यतिरिक्तं न द्रष्टुमिच्छेत् ३।२८।३३ (२६)

ध्यानमुक्ता समाधिमाह, एवमिति । एवं दृश्यविशिष्ट द्रष्टृ-ध्यानेन हरौ द्रष्टरि प्रतिलब्धभावः पुनर्लब्धरतिः । तद्दृश्यं शनकै र्वियुङ्क्ते त्यजति । यतः तच्चित्तबडिशं चपलस्य चित्तमत्स्यस्य बन्ध-नार्थमुपात्तम् । यद्यपि तस्मिन् भक्त्या गृहीते प्रमोदाद् द्रवद्धृदय इत्युत्पुलकश्च भवति । अतस्तदपि त्याज्यम् । क्रियाजन्यं हि तत् सुखम् । क्रियाच द्वितीये क्षणे नश्यति । स च क्षणः औत्कण्ठितेन दुःखेन दुःसहः इदमत्रतत्त्वं—ध्येयालम्बनस्य प्रत्ययस्य सदृश प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम् (२) । ध्यानमेव ध्येयाकारनिर्भास-प्रत्ययात्मकं न स्वरूपेण शून्यमिव ध्येयस्वभावावेशादयदा भवति तदा समाधिरित्युच्यते (३) इति ॥ ३।२८।३४ (२७)

---

(१) छान्दोग्य ३।१२।४।८-९ श्रीः ।

(२) "तत्र प्रत्ययैकतानता ध्यानम्" पातञ्जलं ३।२ । सूः ।

(३) "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिवसमाधिः"—योगदर्शनं, ३।३ सूः ।

NATIONAL ARCHIVES OF INDIA

आत्मानमत्र पुरुषोऽव्यवधानमेक-
मन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥२८॥
सोऽप्येतया चरमया मनसो निवृत्त्या,
स्वस्मिन्महिम्न्यवसितः सुखदुःखवाच्ये।
हेतुत्वमप्यसति कर्त्तरि दुःखयोर्यत्,
स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः ॥२९॥

अथास्य योगस्य फलमाह, मुक्तेति। त्यक्ते तु बडिशे मत्स्यः सहसा निर्वाणमृच्छति नाशं प्राप्नोति। यथेन्धनाभावात् अग्निः कदा यर्हि यदा मुक्ताश्रयं निर्ग्रन्थित्वात्। निर्विषयं प्रक्षीणकर्मत्वात्। विरक्तं छिन्नसंशयत्वात्। अत्र अस्यां दशायां पुरुषः आत्मानं अन्वीक्षते। अनुवृत्तमखण्डं पश्यति। अव्यवधानव्यवधायकस्य मनसो भावात्। अतएवैकं जीवपरयोर्भेदाभावात्। यतः प्रतिनिवृत्तो यत्रोदितस्तत्रैव लीनो गुणप्रवाहः कार्य्यकारणभावो यस्य स तथा ३।२८।३५॥ (२८)

सोऽपीति। सोऽपि आत्मा स्वस्मिन्महिम्नि नित्यनिरतिशयानन्द-(१)घने पदे अवसितः अवबद्धः संश्लिष्टो भवति। घटाकाशमिव महाकाशे। कया मनसो निवृत्त्या एतया योगाभ्यासलब्धया। अतएव चरमया पुनरावृत्तिशङ्कारहितया। सुखदुःखवाच्ये पुण्यपापफलभोगाभावात्। हेतुत्वमसति कर्त्तर्य्यवसितं कर्त्ता सात्त्विकोऽहङ्कारः। स चासन् मायामयत्वात्। दुःखयो सुखदुःखयोः। युगपदधिकरण

---

(१) छान्दोग्योपनिषत् ७।१२४ श्लोः।

NATIONAL ARCHIVES OF INDIA

देहन्तु तं न चरमः स्थितमुत्थितं वा,
सिद्धो विपश्यति यतोऽध्यगमत् स्वरूपम्।
दैवादुपेतमथ दैववशादपेतम्,
वासो यथा परिकृतं मदिरामदान्धः ॥३०॥
देहोऽपि दैववशगः खलु कर्म्म यावत्,
स्वारम्भकं प्रतिसमीक्षत एव सासुः।
तं स प्रपञ्चमधिरूढसमाधियोगः,
स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥३१॥

वचनतायां इन्द्रस्मरणात्। "द्यावोस्तथेतिचेदि"तिवत्। यत् स हेतुत्वं स्वात्मन् विधत्ते। अहङ्कारकृतं आत्मकृतं मन्यते। तदिदानीं येन कृतं तत्रैवावसितमित्यर्थः। यत उपलब्धपरमात्मकाष्ठः। साक्षात्कृतपरमात्मस्वरूपः ३।२८।३८ ॥ (२९)

दृष्टश्रुत्य च देहाभिमानो नास्तीत्याह, देहमिति। तं देहं सिद्धो विपश्यति। आभासमात्रेण पश्यति। किन्तु स्थितमुत्थितं वेति विवेकेन न पश्यतीति वेरर्थः। यतः स्वरूपं अध्यगमत् साक्षात्कृतवान्। परिकृतं प्रावृतम्। तथाच श्रुतिः "यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ताशयीतैवमेवेदं शरीरं शेते" (१) इति ३।२८।३७ (३०)

ननु त्यक्ताभिमानस्य देहस्तदैव पतेदिति नेत्याह, देहोऽपीति। यावत् स्वारम्भकं कर्म्मास्ति तावत् प्रतिसमीक्षत एव। कुतः देव-

---

(१) बृहदारण्यकं ४।४।७ श्रीः।

एकैकशोऽङ्गानि धिया तु भावयेत्,
पादादि यावद्धसितं गदाभृतः।
जितं जितं स्थानमपोह्य धारयेत्,
परं परं शुध्यति धीर्यथा यथा ॥३२॥

वशगो यतः। दैवं प्राक्कर्म्म। खलु शब्दोहेतौ। ननु आत्मना त्यक्ताभिमानस्यास्य कुतः प्रवृत्तिनिवृत्ती तत्राह। सासुः सलिङ्गशरीरः। ननु ज्ञानोदयेऽपि चेत् कर्म्माणि न निवर्त्तन्ते तर्हि सञ्चितैः कर्म्मभिर्देहान्तराणिस्युस्तत्राह, तमिति। तं देहं स प्रपञ्चं स कारणं पुनर्न भजते। तत्र हेतुः अधीति। स्वाप्नमिव प्रतिबुद्धवस्तुः, अयमर्थः "तस्य तावदेव चिरं यावन्नविमोक्ष्येऽथसम्पत्स्य" (१) इति श्रुतिः। न विमोक्षते अथ ब्रह्मसम्पत्स्यते प्राप्स्यति। उभयत्र तकारलोपः च्छान्दसः। अस्मादवधिश्रवणात् प्रारब्धफलं कर्म्म भोगादेव नश्यति। अनारब्धफलन्तु ज्ञानादिति एषा च फलोक्तिस्तृतीययोगे तीव्राधिमात्रस्य ज्ञेया, अन्यथाऽनेनैव कृतार्थत्वात् उत्तरयोगद्वयोक्तिवैयर्थ्यं स्यादतएव तत्र फलं नोक्तम्। अत्र तु फलसंकीर्त्तनमस्यैव तृतीये फलभूमिकामधिरूढस्यैतत् फलं भवतीति दर्शयितुम्, कपिलः देवहूतिम्॥ ३।२८।३८ (३१)

अवयवशोरूपं क्रमेण चिन्त्यं इत्युक्तम्। तस्यावधिमाह एकैकेति। अपोह्य त्यक्ता पादौ ध्यायन्तोधीर्यदा शुध्यति ध्येयं विनावतिष्ठते तदागुल्फौ ध्यायेत्। गुल्फौ ध्यायन्ती यदा प्राग्वत्तदा जङ्घे धारयेदित्यादिक्रमेण हसितं त्यक्ता निर्विषयैवावतिष्ठते स समाधिः। शुकः॥ २।२।१३ (३२)

---

(१) छान्दोग्यं ६।१४।२

NATIONAL ARCHIVES OF INDIA

हृत्पुण्डरीकमन्तःस्थं मूर्द्धनालमधोमुखम् ।
ध्यात्वोर्द्धमुखमुन्निद्रमष्टपत्रं स कर्णिकम् ॥३३॥
कर्णिकायां न्यसेत् सूर्य-सोमाग्नीनुत्तरोत्तरम् ।
वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमङ्गलम् ॥३४॥ (१)
इन्द्रियाणीन्द्रियार्थेभ्यो मनसा कृष्यतन्मनः ।
बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥३५॥

अथ मध्याधिमात्रमाह हृदिति । अन्तस्थं हृन्मध्यस्थं ततोऽधोमुखम् । सदति तीक्ष्णेन प्रणवाग्रेणोच्चलनाद् ऊर्द्धमुखं ध्यात्वेत्यर्थः । उन्निद्रं उत्फुल्लं अष्टौ भूम्यादितत्त्वानि पत्राणि यस्य स तथा ॥ ११।१४।३६ (३३)

कर्णिकायां प्रणवं न्यसेद् ध्यायेत् सत्त्वादिरूपाणि सूर्य्यादिबिम्बानि उत्तरोत्तरं क्रमेणैतत् उक्तेषु अन्यतमं ध्यानेषु मङ्गलं स्वस्त्ययनम् । ११।१४।३७ (३४)

ध्यानमुक्तं प्रत्याहारमाह, इन्द्रियाणीति । इन्द्रियाणि अक्षान् मनसाप्रग्रहेण धीरो विषयैरजितः । सर्वतः सर्वावयवरूपे मयि ॥ ११।१४।४२ (३५)

धारणामाह तदिति । एकत्रचरणादौ । "देशबन्धश्चित्तस्य धारणा" (२) इति हि पातञ्जलम् । एवं प्रागुक्तदिशा स्मितान्तं ध्यायेत् । सुस्मितमिति हि विशेषणे तात्पर्य्यम् ॥ ११।१४।४२ (३६)

---

(१) कैवल्यो उपनिषद् १।८ श्लो: ।
" योगशिखा ३।३ श्लो: ।
" " १३७।१३८ श्लो: ।
(२) पातञ्जलदर्शनं ३।१ सू: ।

NATIONAL ARCHIVES OF INDIA

तत् सर्वव्यापकञ्चित्तमाकृष्यैकत्र धारयेत्।
नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखम् ॥३६॥
तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत्।
तच्च त्यक्त्वा मदारोहो न किञ्चिदपि चिन्तयेत् ॥३७॥
एवं समाहितमतिर्मामेवात्मानमात्मनि।
विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतम् ॥३८॥
अन्तकाले तु पुरुष आगते गतसाध्वसः।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥३९॥

समाधिमाह तत्रेति। तत्र स्थिते पदं स्थैर्यं व्योम्नि मायोपाधावीश्वरे। तच्च व्योम, मदारोहोनिरूपाधिमत्स्वरूपमारूढः न किञ्चिच्चिन्तयेत्। ध्यातृध्येयविभागमपि त्यजेदित्यर्थः। प्रत्याहारधारणे ध्यानात् प्राक्। पश्चात् समाधिः। यमादिचतुष्कन्त्वर्थं सिद्धम्। तदेवमष्टाङ्गोयोग इहोक्तः॥ ११।१४।४४ (३७)

तस्य फलमाह, एवमिति। एवं सप्तभिरङ्गैः समाधिं प्राप्ता मतिर्यस्य स तथा। मां आत्मानं जीवम्। मय्यात्मनि परमात्मनि सर्वात्मन् सर्वात्मके विचष्टे विशेषात् पश्यति। मां मयीति जीवपरयोरभेदे उक्ते ज्योतिरिति दृष्टान्तः। यथा प्रतिविम्बभूतं ज्योतिरूपाध्युपरमे विम्बीस्यात् तथेत्यर्थः। अत्रापि फलोक्तिः प्राग्वत्। श्रीकृष्ण उद्धवम्। ११।१४।४५ (३८)

तीव्राधिमात्रमाह। अन्तकाल इति। गतसाध्वसः त्यक्तमरण-

गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ।
शुचौ विविक्त आसीनो विधिवत् कल्पितासने ॥४०॥
अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम् ।
मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥४१॥
नियच्छेद्विषयेभ्योऽक्षान् मनसाबुद्धिसारथिः ।
मनः कर्म्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥४२॥

भयः। असङ्गशस्त्रेण "असङ्गोऽयं पुरुष" (१) इत्युपदेशदार्ढ्येन। तं देहं अनु ये पुत्रकलत्रादयस्तेषु। २।१।१५ (३८-४०)

प्रव्रजितः सन्न्यस्य निर्गतः। धीरो गृहस्थाश्रमोक्तविधिवत्। "नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्" (२)। मनसा न तु वाचा। शुद्धं उदात्तादिधर्म्मरहितम्। त्रिवृत् त्रिभिरकारोकार-मकारैर्वर्त्तितं ग्रथितम्। ब्रह्मणः प्रथमं रूपम्। अक्षरं वर्णं परं स्फोटात्मकम्। यच्छेत् स्थिरीकुर्य्यात्। जितश्वासः प्राणायामैः (३) ब्रह्मबीजमोङ्कारं अविस्मरन्। स एव जपगर्भः प्राणायामः। २।१।१६ (४१)

अक्षान् इन्द्रियाश्वान्। मनसाग्रयन्त्रेण। कर्म्मभिः कर्म्मवासनाभिः। आक्षिप्तं इतस्ततोनीतम्। शुभार्थे धारयेत्। हृदय-पुण्डरीके मूर्द्ध्न्योतिषि नाभिचक्रे नासिकाग्रे (४) अन्यस्मिन् वा पापक्षयकरे वस्तुनि चतुर्भुजादौ बध्नीयात्। २।१।१७। (४२)

---

(१) बृहदारण्यक ४।३।१५ श्लोः।

(२) गीता ६।११ श्लोः।

(३) "प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान्"—महाभारतं ३।२८।११।

(४) योगदर्शने—"नाभिचक्रे कायव्यूहज्ञानम्" "मूर्द्ध्न्योतिषिसिद्धदर्शनम्" कूर्म्मनाड्यां स्थैर्य्यम्" ३।२९-३१-३२-३३। अन्यत् एतदीयभाष्ये ऽनुसन्धेयम्"।

NATIONAL ARCHIVES OF INDIA

तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा।
मनोनिर्विषयं युक्त्वा ततः किञ्चन न स्मरेत् ॥४३॥
पदं तत् परमं विष्णोर्मनो यत्र प्रसीदति ॥४४॥

इति वोपदेवकृते मुक्ताफले विष्णुरूपं नाम तृतीयं प्रकरणम्। द्वितीयोऽध्यायः समाप्तः ॥२॥

तत्रापि क्रमादेकैकावयवं ध्यायेत्। अव्युच्छिन्नेन ध्येयान्तररहितेन। युक्त्वा समाधाय तत्र (१) निर्विषयं मनः। २।१।१८ (४३)

पदं विष्णोर्निराकारस्य परमं पदं स्फूर्त्तिस्थानम्। यत्र यस्यान्दशायाम्। प्रसीदति सत्त्वमात्रशेषमवतिष्ठते। अयमर्थः—उक्तभूमिकाभ्यासबलात्, सर्व्ववृत्तिप्रत्यस्तमये संस्कार शेषे चेतसि निरुद्धे असम्प्रज्ञातसमाधिना निर्विशेषचैतन्यलाभः। ततश्च स संस्कारं चित्तं निवर्त्तते। तस्मिंश्च निवृत्ते पुरुषः स्वरूपं प्रविष्टः शुद्धः केवलो मुक्त इत्युच्यते। (२) तथाच सूत्रम् 'तदा द्रष्टुः स्वरूपेऽवस्थानम्' अयमेव मुक्तिशब्दार्थः। "मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः" (३)इत्यत्रोक्तः। तदेवमाप्नुतो धीर इति यमनियमोपलक्षणम्। आसीन इत्यासनमुक्तम्। अभ्यसेदिति प्राणायामः। नियच्छेदिति प्रत्याहारः। ततो धारयेद् इत्यविषयस्य क्रमाद्विषयीकरणरूपा धारणा। ध्यायेदिति तस्यैव क्रमत्यागो ध्यानम्। युक्त्येति निर्विषयतारूपसमाधिरित्यष्टाङ्गोयोग उक्तः। शुकः राजानं प्रति। २।१।१६-१८ (४४)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुरूपाणि। द्वितीयोऽध्यायः ॥२॥

---

(१) पातञ्जले—"तत्र प्रत्ययैकतानताध्यानम्" "ध्यानं निर्विषयं मनः" इत्यत्रत्य च।

(२) पातञ्जल १।१।३ सूः भाः। (३) भागवत २।१०।६ श्लोः।

NATIONAL ARCHIVES OF INDIA

अथ तृतीयोऽध्यायः ।

अथ विष्णोरवतारकृपाणि चत्वारिंशत् ।
हरियज्ञवामनमन्वन्तरेशानां पुनरुक्तत्वात् ।

तत्र वराहः ।

यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रन्,
क्रोडीं तनुं सकलयज्ञमयीमनन्तः ।
अन्तर्महार्णव उपागत आदिदैत्यम्,
तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥१॥

एवमावद्रियताप्रबन्धेन मुमुक्षोः समाधिसामग्रीं समग्रामुक्त्वेदानीं अस्यैव व्युत्थानदशायां योगान्तरायपरिहारार्थमिष्टावाप्त्यर्थञ्च भगवज्जन्मकर्मानुसन्धानं विधातुमाह, विष्णोरवतारकृपाणीति। तत्रान्तरायाः—"व्याधि-स्त्यान संशय-प्रमादालस्याविरति-भ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपाः"। "दुःखदौर्मनस्याङ्गमेजयत्व श्वासप्रश्वास विक्षेपसहभुवः" (१) तत्र स्त्यानं अकर्मण्यता। प्रमादः समाधिभूमेरलाभः। अनवस्थितत्वं यल्लब्धायां

---

(१) पातञ्जलं १।३०-३१ सूः।

NATIONAL ARCHIVES OF INDIA

जातो रुचेरजनयत् सुयमान् सुयज्ञः,
आकूति सूनुरमरानथदक्षिणायाम्।
लोकत्रयस्य महती महरद्यदार्त्तिम्,
स्वायम्भुवेन मनुनाहरिरित्यनुक्तः ॥२॥

कपिलः।

यज्ञे च कर्दमगृहे द्विजदेवहूत्याम्,
स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे।
ऊचे ययात्मशमलं गुणसङ्गपङ्क-
मस्मिन् विधूय कपिलस्य गतिं प्रपेदे ॥३॥

भूमौ चित्तस्याप्रतिष्ठा। जन्मकर्म्मानुसन्धानेन महांल्लाभः। तदुक्तम्। "जन्मकर्म्म च मे दिव्यं एवं यो वेत्ति तत्त्वतः" (१) इति। कुतश्चत्वारिंशदेव। चतुर्णामन्येषामप्युपलक्षात्। तत्राह। हरीति। पौनरुक्त्यञ्च मन्वन्तरावतारार्थम्। ते चावतारास्चतुर्दा। कल्पमन्वन्तरयुगस्वल्पभेदात्। तत्र कल्पावतारान् शृण्वन् अश्वविघ्नोपशान्तये वराहं भावयेदित्याह। तत्रेति। आदिदैत्यं हिरण्याक्षम् २।७।१। (१)

लोकापवादनिरासार्थं यज्ञमाह, जात इति। रुचिः पिता। आकूतिर्माता। दक्षिणापत्नी। सुयमा नामदेवाः पुत्राः। स्वायम्भुवो मनुर्मातामहः। तेन सुयज्ञ इति प्रथममुक्तः पश्चाद् हरिरिति। यतो लोकानामार्त्तिमहरत् ॥ २।७।२ (२)

राजसत्वादिदोषहानार्थं कपिलावतारमाह। कपिल इति।

---

(१) गीता ४।९ श्लोः।

अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो—,
दत्तो मयाहमिति यद्भगवान् स दत्तः ।
यत्पादपङ्कजपरागपवित्रदेहा,
योगर्द्धिं मापुरुभयीं यदु हैहयाद्याः ॥४॥

चतुःसनः ।

तप्तं तपो विविध-लोकसिसृक्षयाम,
आदौ सनात् स्वतपसः स चतुःसनोऽभूत् ।
प्राक्कल्प संप्लव विनष्टमिहात्मतत्त्वम्,
सम्यग् जगाद मुनयो यदचक्षतात्मन् ॥५॥

कर्दमः पिता। देवहूतिर्माता। नव भगिन्यः। आत्मगतिं ब्रह्मविद्याम्। यया माता पुत्रस्य गतिं मुक्तिं प्रपेदे। आत्मगमलं मलिनीकरणम्। गुणसंगाख्यं पङ्कं विधूयास्मिन्नेव जन्मनि। हे द्विज! नारदः॥ २।७।३ (३)

अलब्धभूमिकत्वनिवृत्त्यर्थं दत्तात्रेयमाह। अत्रेरिति। आत्मैव माया तवपुत्रोदत्तः इत्यत्रिं प्रत्याह। तस्मादत्तः। अत्रापत्यत्वादात्रेयः। "इतश्चानिञः" (१) इत्यपत्यार्थे ढक्। ऋद्धिं सिद्धिम्, उभयीं भुक्तिमुक्तिरूपाम्। हैहयः कार्त्तवीर्यः। आदिशब्दादलर्कप्रह्लादौ॥ २।७।४ (४)

कामोपशमार्थं चतुःसनमाह। तप्तमिति। यन्मया तप्तं तपस्तप्तं स चतुःसनोऽभूत्। तप एव चतुर्द्वावतीर्णम्। सनत्कुमारः। सनकः।

---

(१) पाणिनिः ४-३—११२ सूः।

NATIONAL ARCHIVES OF INDIA

नारदः।

तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्म्मणां यतः ॥६॥

नरनारायणः।

धर्म्मस्य दक्षदुहिर्यजनिष्ट मूर्त्त्याम्,
नारायणो नर इति स्वतपः प्रभावः।
दृष्ट्वात्मनो भगवतो नियमावलोपम्,
देव्यस्त्वनङ्गपृतनाघटितुं नशेकुः ॥७॥

सनन्दनः। सनातन इति। सनशब्दोपलक्षितचतुर्भेदः सनात्—अखण्डितं यत् स्व तपः तस्मादिमानि नामानि सत्वात्मतत्त्वं जगाद च यद् गदितं मुनयः आत्मन्यपश्यन्। उपदेशादेव साक्षात्कारोऽभूदित्यर्थः ॥ २।७।५ (५)

प्रमादहानार्थं नारदावतारमाह। तृतीयेति। सात्वतं पञ्चरात्रम् (१)। नैष्कर्म्यं फलाभावत्वेन कर्म्मत्वाभावः। सूतः शौनकम् ॥ १।३।६ (६)

उग्रधर्म्महानार्थं नारायणावतारमाह। धर्म्मस्येति। धर्म्मः पिता। मूर्त्तिर्माता। दक्षो नानाभवः। नरो भ्राता। स्वः अकृत्रिमः तपः प्रभावो यस्य स तथा। नियमावलोपं घटितुं निष्पादयितुम्। देव्योऽप्सरसः। नशेकुः। यद्यप्यनङ्गपृतनाः काम सेन्यानि आत्मनः आत्मरूपाणि अन्या अप्सरस भगवतो नारायणस्य देहादुत्पन्ना दृष्टाः ॥ २।७।६ (७)

---

(१) नारदपञ्चरात्रम्, (भारद्वाजसंहिता) अहिर्बुध्न्यसंहिता, हयशीर्षपञ्चरात्रम्, कपिञ्जलसंहिता, कपिञ्जलपञ्चरात्रमित्यादि।

NATIONAL ARCHIVES OF INDIA

कामं दहन्ति कृतिनो ननु रोषदृष्ट्या,
रोषं दहन्तमुत तेन दहन्त्यसह्यम् ।
सोऽयं यदन्तरमलं प्रविशन् विभेति,
कामः कथं न पुनरस्य मनः श्रयेत ॥८॥
विद्धः सपत्नजनितैः पतिभिरन्ति राज्ञो,
बालोऽपि सन्नुपगतस्तपसे वनानि ।
तस्मा अदाद् ध्रुवगतिं गृणते प्रसन्नो-
दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ॥९॥

पृथुः ।

यद्वेणमुत्पथगतं द्विजवाक्यवज्र-
निष्पृष्टपौरुषभगं निरये पतन्तम् ।

नारायणस्य धैर्यं वर्णयन्ति काममित्यादिना। केचित् कृतिनः। कामं तावद्रोषं आविष्कृत्य दहन्ति। रोषं पुनस्तानेव दहन्तं नो दहन्ति। न च सहन्ते। सोऽयं रोषः यस्यान्तःकरणं प्रविशन् अत्यर्थं विभेति। कामस्य तु का वार्त्ता ॥ २।७।७ (८)

उद्दिष्टसिद्ध्यर्थं ध्रुवप्रियं भावयेदित्याह। विद्ध इति। मातुः सुनीतेः सपत्नो या सुरुचिः तस्या उदितानि वाक्यानि तान्येव पत्रिणो बाणाः तैः राज्ञः उत्तानपादस्यान्तिके समीपे। ध्रुवगतिं ध्रुवपदम्। गृणते स्तुवते। दिव्यामुनयः सप्तर्षयः। यद् यच्च आत्मन उपरिस्थितं अधस्तात् स्थिताः ॥ २।७।८ (९)

क्षुत्पिपासा शान्त्यर्थं पृथुमाह। यद्वेणेति। वाता रचिता।

NATIONAL ARCHIVES OF INDIA

वात्वार्थितो जगति पुत्रपदञ्च लेभे,
दुग्धा वसूनि वसुधासकलानि येन ॥१०॥

ऋषभः।

नाभेरसा वृषभ आस सुदेविसूनु-
र्यो वै चचार समदृग् जड़योगचर्य्याम्।
यत्पारहंस्य मृषयः पदमामनन्ति,
स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥११॥

हयग्रीवः।

सत्त्वे ममास भगवान् हयशीरषायो-
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः।

यत् पुत्र इति पदं नाम लेभे। "पुन्नाम्नो नरकात्त्रायते" (१) इति पुत्रः। तेन च वेणः पिता त्रातः। अर्थितो द्विजैः। जगति जगदर्थं, वसूनि रत्नानि ॥ २।७।८ (१०)

अनवस्थितत्व हानार्थं ऋषभमाह। नाभेरिति। नाभिः पिता। सुदेवी माता। जड़वद्योगेन नित्यसमाधिना, चर्य्या जड़योगचर्य्या। स्वस्थो न तु विषयस्थः ॥ २।७।१० (११)

देवहेलन कृतदोषहानार्थं हयग्रीवावतारमाह। सत्त्व इति।

---

(१) "पुन्नाम्नो नरकाद् यस्मात्त्रायते पितरं सुतः। तस्मात् पुत्र इति प्रोक्तः पितॄन् यः पातिसर्वतः" ॥ "तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥" महाभारतम् १।७४।३७। रामायणम् २।१०७।१२।

NATIONAL ARCHIVES OF INDIA

छन्दोमयो मखमयोऽखिलदेवतात्मा,
वाचो वभूवुरुशतीः श्वसतोऽस्य नस्तः ॥१२॥

मत्स्यः ।

मत्स्योयुगान्तसमये मनुनोपलब्धः,
क्षोणीमयो निखिलजीवनिकायकेतः ।
विसंसितानुरुभये सलिले मुखान्म-
आदाय तत्र विजहार ह वेदमार्गान् ॥१३॥

कूर्मः (१) ।

क्षीरोदधावमरदानव यूथपाना-
मुन्मथ्नतामम्रतलब्धय आदिदेवः ।
पृष्ठेन कच्छपवपूर्विदधार गोलम्,
निद्राक्षणोऽद्रि परिवर्तकृताखिलाङ्गः ॥१४॥

सत्रे यज्ञे । मम ब्रह्मणः । हरशिराः आस वभूव । अथो पूर्णाहुतेरनन्तरम् ।

यज्ञपुरुषत्वमेव व्यनक्ति छन्दोमय इति । मार्ङ्गैः स्तुभिः । तपनीयं सुवर्णम् । उशतीः कमनीयाः (वेदाख्याः) श्वसन्तः श्वासं मुञ्चन्तः । नस्तः नासापुटात् । २।७।११ (१२)

जिह्वोपसर्गहानार्थं मत्स्यमाह । मत्स्य इति । क्षौणीं नीरूपां मिनोति स्वशृङ्गे प्रक्षिपतीति क्षोणीमयः । निकायः समूहः । केतः

---

(१) शुक्लयजुर्वेदः २४।३४
शतपथब्राह्मणम् ७।५।१।५ ।
कूर्मपुराणं १२।४—५ ।

NATIONAL ARCHIVES OF INDIA

नृसिंहः।

वैपिष्टपोरुभयहा स नृसिंहरूपम्,
कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम्।
दैत्येन्द्रमाशुगदयाभिपतन्तमारा-
दूरौ निपात्य विददार नखःस्फुरन्तम् ॥१५॥

हरिः।

अन्तःसरस्युरुबलेन पदे गृहीतो
ग्राहेण यूथपतिरम्बुजहस्त आर्तः।
आहेदमादिपुरुषाखिललोकनाथ!
तीर्थश्रवः श्रवणमङ्गलनामधेयः ॥१६॥

आश्रयः। नावि प्राणिस्थापनात्। मम मुखादुद्भवे सलिले विस्रंसितान् पतितान् वेदमार्गान् आदाय तत्र सलिले विजहार। वेदा एव मार्गा भुक्तेर्मुक्तेश्च २।७।१२ (१३)

नरकहेतुहानार्थं कूर्ममाह. क्षीरोदधाविति॥ गोत्रं मन्दराद्रिम्। निद्रां क्षणयति क्षणवतीं लब्धावसरां करोतीति निद्राक्षणः। तत्करोतीति णिच्। "विनुमतो लुक्" (१)। अद्रेः परिवर्त्तः सञ्चापसव्य भ्रमः। कषाणः। कषण् घर्षण सुखप्रदो यस्यां स। कण्डूर्यस्य स तथा॥ २।७।१३ (१४)

अरणभयहानार्थं नृसिंहावतारमाह। वैविष्टपेति। वैविष्टपा देवाः। तेषामुरुभयं हन्तीति तथा। भ्रमद्भ्रुकुटीदंष्ट्रेण करालं रौद्रं वक्त्रम् यस्य स तथा। भ्रुकुटिदंष्ट्रेतेति 'प्राण्यङ्गत्वादेकवद्भावः'। आरात् समीपे। स्फुरन्तं स्वत्वोद्रेकेण २।७।१४। (१५)

---

(१) पाणिनिः ५।३।१५५ सूः।

स्तुत्वा हरिस्तमरणार्थिनमप्रमेय-
श्चक्रायुधः पतगराजभुजाधिरूढः ।
चक्रेण नक्रवदनं विनिपाट्य तस्मा-
द्धस्तेप्रगृह्य भगवान् कृपयोज्जहार ॥१६॥
ग्राहात् प्रपन्नमिभराजममुञ्चदार्त्तम्,
संस्तुन्वतोऽब्धिपतितान् श्रमणान् ऋषींश्च ।
शक्रञ्च वृत्रवधतप्तमसि प्रविष्टम्,
देवस्त्रियोऽसुरगृहे पिहिता अनाथाः ॥१७॥

वामनः ।

ज्यायान् गुणैरवरजोऽप्यदितेः सुतानाम्,
लोकान् विचक्रम इमान् यदथाधियज्ञः ।

आर्त्तिहानार्थं हरिमाह, अन्तरिति । ग्राहोनक्रः २।७।१५ (१७)

तारणार्थिनं शरणार्थिनम । पतगराजोगरुड़ः । विनिपाट्य विदार्य्य २।७।१६॥ (१६)

ग्राहादिति । प्रपन्नं शरणागतं । संस्तुन्वतः संस्तुवतः । अब्धिपतितान् कश्यपस्य समिदाहरणे गोष्पदे मग्नान् । श्रमणान् ऊर्द्ध्वरेतसो बालखिल्यान् । अपिहिता अवरुद्धाः । द्रुमिलो नेमिम् । ११।४।१८॥ (१७)

स्थलोपसर्गहानार्थं वामनमाह । ज्यायानिति । कुतो ज्यायान् यद् यस्मादिमान् लोकान् विचक्रमे । अथ प्रतिग्रहानन्तरम् । प्रतिग्रहस्य वामनरूपेण । अधियज्ञो विष्णुः । यज्ञाधिष्ठातृत्वात् । किमस्य

NATIONAL ARCHIVES OF INDIA

क्ष्मां वामनेनजगृहे त्रिपदच्छलेन,
यास्त्वामृते पथिचरन् प्रभुभिर्नचाल्यः ॥१८॥
नार्थोबलेरयमुरुक्रमपादशौच-
मापः शिखाध्रुतवतो विबुधाधिपत्यम्।
यो वै प्रतिश्रुतमृते नचिकीर्षदन्य-
दात्मानमङ्ग मनसा हरयेऽभिमेने ॥१९॥

याचने कारणम्। यतः पथिचरन् स्वधर्म्मस्थः पुरुषः प्रकारान्तरेण न चाल्यो 'न पदादभ्रंशनोयं, इति नीतिः २।७।१७॥ (१८)

बलेर्न पदभ्रंशः किन्तु अधिकपदलाभ इत्याह। नार्थ इति। अतस्तस्य नायं पुरुषार्थः। यदिबुधाधिपत्यं। यतोऽसौ उरुक्रमपादशौचं या आपः ताः शिखायां शिरसि ध्रुतवान्। यत आत्मानं प्रतिश्रुतशेषपूरणत्वेन शिरसा अत्यादरेणाभिमेने अङ्गीकृतवान्। कथम्भूतमात्मानं यः प्रतिश्रुतं विना अन्यद् न चिकीर्षत् कर्त्तुं नेच्छत्। "बहुलं च्छन्दस्यमाङ्योगे" (१) इत्यड़भावः। यद्यपि गुरुणा वारितः यतश्च २।७।१८॥ (१९)

---

(१) पाणिनिः ६।४।७५ सूः।

हंसः।

तुभ्यञ्च नारदभृशं भगवान् विवृद्ध-
भावेन साधुपरितुष्ट उवाच योगम्।
ज्ञानञ्च भागवतमात्मसतत्त्वदीपम्,
यद्वासुदेवशरणा विदुरञ्जसैव ॥२०॥

NATIONAL ARCHIVES OF INDIA

मन्वन्तरेशः ।

चक्रञ्च दिक्षुवहितं दशसु स्वतेजो-
मन्वन्तरेषु मनुवंशधरो विभर्त्ति ।
दुष्टेषु राजसु दमं व्यदधात्स्वकीर्त्तिम्,
सत्ये विधृष्ट उशतीं प्रथयं श्चरित्रैः ॥२१॥

धन्वन्तरिः ।

धन्वन्तरिश्च भगवान् स्वयमेव कीर्त्ति-
र्नाम्नां नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवावरुन्धे (३)
आयुष्यवेदमनुशास्त्यवतीर्य लोके ॥२२॥

मोहिनी ।

धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपापयत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया॥२३॥

परशुरामः ।

त्वत्तं त्रयायविधिनोपभृतं महात्मा,
ब्रह्मध्रुगुज्झितपथं नरकीर्त्तिलिप्सुः ।
उद्वृत्यसाववनिकण्टकमुग्रवीर्यः,
त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥२४॥

ज्ञानानाशस्य प्रहाणार्थं हंसावतारमाह । तुभ्यमिति । योगं भक्तियोगम् । सतत्त्वं तात्त्विकं रूपम्।२।७।१९ ॥ (२०)

NATIONAL ARCHIVES OF INDIA

दुर्गोपसर्ग (दुर्गोपसर्ज) हानार्थं मन्वन्तरेशमाह। चक्रमिति। स्वमक्षत्रियस्तेजो यस्य तत् स्वतेजश्चक्रं बिभर्त्ति। येन चक्रवर्त्तीति नाम। त्रयाणां लोकानां पृष्ठे यत् सत्यं तस्मिन् ब्रह्मसभायामित्यर्थः २।७।२० ((२१)

व्याधिहानार्थं धन्वन्तरीति। नाम्नां कीर्त्तेः नामकीर्त्तनादित्यर्थः। वैद्यैरलभ्यं यज्ञे भागं अवरुध्यैलभत। कौष्टयः अमृतायुः। सुखादुत्वादमृतम्। परिणामहितत्वादायुरायुःसाधनं वेदं वैद्यकम्, अनुशास्ति करोतीति लोकेऽवतीर्य काम्पिराजगृहे उत्पद्य (२) २।७। २१ ॥ (२२)

अविरतिहानार्थं मोहिनीमाह। धान्वन्तरमिति, धन्वन्तरिरूपं स्त्रीरूपञ्च सुरानपापयत्सुधामिति शेषः। अन्यान् सुरान्। मोहयन् केन रूपेणामृतानयनम्। पायनं मोहिनीस्त्रीरूपेणेत्यर्थः। सूतः शौनकम् १।३।१७ ॥ (२३)

---

(२) वैद्यके भावप्रकाश पूर्वखण्डे, एवं हरिवंशे हरिवंशपर्व्वे २८अः। ९-१० श्लोः।

श्रीरामः।

अस्मत्प्रसादसुमुखः कलया कलेश,
इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे।
तिष्ठन् वनं सदयितानुज आविवेश,
यस्मिन् विरुध्य दशकन्धर आर्त्तिमार्च्छत् ॥२५॥
यस्मा अदादुदधिरूढ़ भयाद्वेपो-
मार्गं सपद्यरिपुरं हरवह्निधत्तोः।
दूरे सुहृन्मथितरोषसुशोणदृष्ट्या,
तातप्यमानमकरोरगनक्रचक्रः ॥२६॥

वक्षःस्थलस्परशरुग्नमहेन्द्रवाह-
दन्तैर्विडम्बितककुञ्जुषऋढ़हासम् ।
सद्योऽसुभिः सह विनेष्यति दारहर्त्तु-
र्विस्फूर्ज्जितैर्धनुष उच्चरतोऽधिसैन्ये ॥२७॥

श्रीकृष्णः ।

भूमे सुरेतरवरूथविमर्द्दितायाः,
क्लेशव्ययाय कलया सितकृष्णकेशः ।
जातः करिष्यति जनानुपलक्ष्यमार्गः,
कर्म्माणिचात्ममहिमोपनिबन्धनानि ॥२८॥

अद्रिकूटोपसर्गहाणार्थं जामदग्न्यावतारमाह । वक्षमिति । विधिना, दैवेन । उपभृतं समर्पितम् (सम्बर्द्धितम्) । क्षयाय मृत्यवे । असौ विष्णुः । त्रिःसप्तकृत्वः । एकविंशतिवारान् । परश्वधः परशुः २।७।२२ ॥ (२४)

प्रवासदुःखप्रहानार्थं रामावतारमाह । अस्मासु ब्रह्मादिषु प्रसादेन सुमुखः प्रहसितमुखः । कलेशोविष्णुः । सर्वशक्तिमयत्वात् । कलया अंशेन । गुरुः पिता । निदेशः आज्ञा । यस्मिन् विरुध्य वैरं कृत्वा । दशकन्धरो रावणः । आर्त्तिमार्च्छत् दुःखमप्राप्तः २।७।२३(२५)

यस्मा इति । यस्मै रामाय उदधिर्मार्गमदात् । रूढ़ः प्राप्तभयजनितसर्वाङ्गकोपो येन । स तथा ॥ सपदि शीघ्रम् । कस्माद् भयं दिधक्षोः रामादेव । यथा त्रिपुरं हरो दिधक्षुः । दूरे सुहृदा सीतया मथितो विलोड़ितो यो रोषः । तेन सुशोणा अतिरक्ता या दृष्टिस्तया । चक्रं समूहः २।७।२४ ॥ (२६)

वक्षःस्थलेति । दारहर्त्तुर्दशाननस्यहासं गर्व्वम् । विनेष्यति

NATIONAL ARCHIVES OF INDIA

नाशयिष्यति। असुभिः प्राणैः सह। अधिसैन्ये वानरसैन्यमध्ये। उच्चरत उत्कर्षेण विचरतः। धनुषो विस्फूर्जितैः उग्रशब्दैर्वानरान् विद्रावयतं इत्यर्थः। रावणस्य वक्षःस्थलस्पर्शेन रूक्षा भग्ना ये महेन्द्रस्यैरावणस्य दन्ताः। तैर्विड्वम्बितो नटैरिवानुकृतः, ध्वनिरूपेण यः ककुभां दिशां जयस्तेन रूढो हासः। अहो मे अद्भूतं वीर्यमिति। विस्मयस्यानुभावो हासः। स च भग्नैरैरावतदन्तैः तत्र तत्राभिनीत इत्यर्थः २।७।२५॥ (२७)

अथ सर्वान्तराय प्रहाणार्थं सर्वकामसिद्ध्यर्थञ्च कृष्णावतारं भावयेदित्याह। भूमेरिति। वरूथः समूहः। कलया पूर्णरूपेण नत्वंशेन "कृष्णस्तु भगवान् स्वयम्" (१) इत्यनेन विरोधात्। सितं निर्मलं मुक्तिरूपम्। कृष्णं मलिनं (अनिर्मलम्) भुक्तिरूपम् यत् कं सुखं तस्येशः। केशव्याख्याने तु पूर्ववद् विरोधः। इत्यमेव। "उज्जहारात्मनः केशौ सितकृष्णौ महामुने!" (२) इति तन्त्रान्तरोक्तिरपि व्याख्येया। केशौ सुखस्वामिनौ। सितो रामः। आत्मनः स्वमूर्त्तेः सकाशादुज्जहारउद्धृतवान् कल्पितवान्। हरिवंशे हि भगवान् कस्यांश्चिद्गिरिगुहायां स्वमूर्त्तिं निक्षिप्य गरुडञ्च तत्रावस्थाप्य 'स्वयमत्रागत' इत्युक्तम्। तदुक्तं हरिवंशे "स देवानभ्यनुज्ञाय विविक्ते त्रिदशालये। जगाम विष्णुः स्वं देशं क्षीरोदस्योत्तरां दिशम्। तत्र वै पार्व्वतो नाम गुहादेवैः सुदुर्गमा। त्रिभिस्तस्यैव विक्रान्तैर्नित्यं पर्वसु पूजिता। पुराणं तत्र वित्यस्य देहं हरिरुदारधीः। आत्मानं योजयामास वसुदेवगृहे विभुः।" यैस्तु यथा श्रुतमेवेदं व्याख्यातम्। तेन सम्यग्दृष्टवन्तः। यतः सुरमात्रस्यापि निर्जड़त्वरूपप्रसिद्धौ अकालकलिते भगवति जरानुदयेन क्लेशशैथिल्यानुपपत्तेः। न चास्य केशेषु नैसर्गिकौ सितकृष्णतेति प्रमाणमस्ति।

(१) भागवत १।३।२४ श्लोः।

(२) विष्णुपुराणं ५ अंश; १८ अः, ५९ श्लोः।

NATIONAL ARCHIVES OF INDIA

अतएव नरसिंहपुराणे कृष्णावतारप्रसङ्गे शक्तिशब्द एव प्रयुक्तो न तु केशशब्दः। तथाहि "वसुदेवाच्च देवक्यामवतीर्य्यमहीतले। सितकृष्णौ च तच्छत्रौकंसाद्यान् घातयिष्यत"—इत्यादिना। अस्तु तर्हि अंशोपलक्षणः केशशब्दः (नोऽ) अविलुप्त सर्वशक्तित्वेन साक्षादादि पुरुषत्वस्यैव निश्चेतुं शक्यत्वात्। विष्णुकृष्णादिशब्दानामविशेषतः पर्य्यायत्व प्रतीतेश्च। नैवमवतारान्तरेषु कस्य वान्यस्य जन्मदिनं जयन्त्याख्ययातिप्रसिद्धम्। अतएवोक्तम् महाभारते "भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः। शाश्वतं ब्रह्मपरमं योगिध्येयम् निरञ्जनम्" इति। यत्तूक्तम् "ततो जगन्मङ्गलमच्युतांश"(१)मिति। तत्र बहुव्रीहिः। यच्च तत्रांशेनावतीर्णस्येति। तत्रांशेन सह इत्यर्थः। अंशो बलभद्रः। एवं सर्वत्र। एते "भक्तेशो वसुधातलम्" इत्यपि व्याख्यातम्। यत्तु (२)ताविमौ वै भगवतो हरेरंशाविहागता"विति। तदन्य कल्पविषयम्। यद्वा अंशश्च अंशश्च अंशौ। तत्रैकोऽंशशब्दो यथास्थितोऽर्ज्जुनविषयः। अन्यस्तु अंशाः सन्त्यस्येत्यंशः। "अर्शाद्यच्"प्रत्ययान्तो भगवद्विषयः। यत्राद्यभिन्न इत्यादि हि प्रागुक्त इत्यलमति प्रसङ्गेन। आत्मनः श्रीकृष्णस्य महिमा उपनिबध्यते। सम्बद्धो दृश्यते येषु कर्म्मसु तानि। अनन्य साध्यानीत्यर्थः २।७। २६ ॥ (२८)

---

(१) भागवत १०।२।१८। श्लोः

(२) भागवत ४।१।५९ श्लोः

तोकेन जीवहरणं यदुलूकिकाया-
स्तैमासिकस्य च पदा शकटोपवृत्तः।
यद्रिङ्गतान्तरगतेन दिविस्पृशो वा,
उन्मूलनं त्वितरयार्ज्जुनयोर्न भाव्यम् ॥२९॥

NATIONAL ARCHIVES OF INDIA

यद्वै व्रजे व्रजपशून् विषतोयपीतान्,
गोपांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या।
तच्छुद्धये ऽतिविषवीर्य्यविलोलजिह्व-
मुच्चाटयिष्यदुरगं विहरन् ह्रदिन्याम् ॥३०॥
तत्कर्म्म दिव्यमिव यन्निशिनिःशयानम्,
दावाग्निना शुचिवने परिदह्यमाने।
उन्नेष्यति व्रजमतोऽवसितान्तकालम्,
नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्य्यः ॥३१॥
गृहीतयद्दयदुपबन्धममुष्यमाता-
शुल्वं सुतस्य न तु तत्तदमुष्य माति।
यज्जृम्भतोऽस्य वदने भुवनानि गोपी,
संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ॥३२॥

तानि च कुर्व्वतोऽस्य मार्गोजनैर्नोपलभ्यते। तान्येवाह, तोकेनेति। तोकोबालः। उलूकिका पूतना। पदा-पादेन। उपवृत्तः पर्य्यस्तीभूतः। रिङ्गताजानुभ्याम् गच्छता। अन्तरङ्गतेन. मध्यं प्राप्तेन। दिविस्पृशोः अर्जुनयोः। उन्मूलनं एतत्कर्म्मत्रयम्। न भाव्यम्। यदि स्व महिमानं न दर्शयत् २।७।२७ ॥ (२९)

यद्वै व्रज इति। विषरूपे तोये पीतं पानं येषां ते तथा। तु शब्दस्यार्थे। तच्छुद्धये ह्रदिनो शुद्धये। उच्चाटयिष्यन् उच्चाटितवान्। अतीतमात्रे लुङ्। अतीतकल्पापिच्चया उन्नेष्यतीत्यादि भविष्यत्त्वम्। उरगं कालियम्। ह्रदिनो यमुना २।७।२८ ॥ (३०)

तत्कर्म्मेति। दिव्यशब्दो वाक्यालङ्कारे। शुचिवने ग्रीष्मवने।

NATIONAL ARCHIVES OF INDIA

उद्धरिष्यति उद्धरिष्यति। अतो दावाग्नेः अवसितो निर्णीतः। अन्तकालो मृत्युर्यस्य तत्तथा। नेत्रे पिधाय पिहिते कारयित्वा। स बलः भद्र २।७।२८ ॥ (३१)

माता यशोदा। शृङ्खलदाम नमति यावदाबध्यते तावन्मानं नलभते। सम्बोध्यदृष्ट्वा। प्रति बोधिता विष्णुरय मिति सञ्जातबोधा ॥२।७।३०॥ (३२)

नन्दश्च मोक्ष्यति भयाद्वरुणस्य पाशा-
द्गोपान् विलेषु पिहितान् मयसूनुना च ।
आप्लावापूतं निशिशयानमतिश्रमेण,
लोकं विकुण्ठमुपनेष्यति गोकुलं स्म ॥३३॥
गोपैर्मखे प्रतिहते व्रजविप्लवाय,
देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।
धर्त्तोच्छिलीध्रमिव सप्तदिनानि सप्त-
वर्षो महीध्रमनघैक करे सलीलम् ॥३४॥
क्रीडन् वने निशिनिशाकररश्मिगौर्य्याम्,
रासोन्मुखः कलपदायत मूर्च्छितेन ।
उद्दीपितस्मररुजां व्रजभृद्वधूनाम्,
हर्त्तारिष्यतिहं शिरो धनदानुगस्य ॥३५॥

नन्दश्चेति। पाशाद् भयं तस्मात्। मयसूनुर्व्योमः। आप्लावापूतं-व्याप्तम्। विकुण्ठे वैकुण्ठे। उपसमीपेनेष्यति ॥२।७।६१ (३३)

रिरक्षुः रक्षितुमिच्छुः। आर्षमणिट्त्वम्। उच्छिलीध्रं छत्राकारं वर्षासु भवति। (१)।महीध्रं गोवर्द्धनम्। हे अनघ! नारद २।७।३२।३४॥

येच प्रलम्बखरदर्दुरकेशिधेनु-
मल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः।
अन्ये च साल्वकपिबल्वलदन्तवक्र-
सप्तोक्षशम्बरविदूरथरुक्मिमुख्याः ॥३६॥
येवाम्बुधे समितिशालिन आत्तचापाः,
काम्बोजमत्स्य कुरु सृञ्जयकैकयाद्याः।
यास्यन्त्यदर्शनमलं बलपार्थभीम-
व्याजाह्वयेन हरिणा निलयं तदीयम् ॥३७॥

क्रीड़न्निति। गौर्य्यां शुक्लायाम्। रासोन्मुखः रासक्रीड़ायामासक्तः कलैर्मधुरैःपदैः आयतं आलापेन दीर्घतां नीतं यद् मूर्च्छितं-मूर्च्छनाख्यं गीतम्। तेनोद्दीपितो यः स्मरः। स एव रुग्मदनज-पीड़ा यासां तास्तथा। धनदानुजः शङ्खचूड़ः २।७।३३ ॥ (३५)

ये चेति। प्रलम्बाद्याः रुक्मिपर्य्यन्ताः एकोनविंशतिः। कुजो भौमः। कपिर्द्विविदः। बल्वलो यो नैमिषे बलभद्रेण हतः। सप्तोक्षं सप्तवृषाः २।७।३४ ॥ (३६)

ये वेति। समितौ संग्रामे शालन्ते ते समितिशालिनः। हरिणा सह मृधे संग्रामे सति काम्बोजाद्याः तदीयं निलयं यास्यन्ति। न विद्यते दर्शनमलो रागादिर्यत्रनिलये स तथा। बलभीमपार्थव्याजा-ह्वयाः कपटनामानि यस्य तेन। तत्त्वतस्तु बलभद्रादयो हरिनामान एव २।७।३५ ॥ (३७)

---

(१) ह्वाकारं ह्वाकं यूरयम् इति केचिदन्ति। तत्तु अभद्यम्। तथाच श्रुतिः "ह्वाकं वाम्ब कुरुट अभद्याणि द्विजातीना"मिति।

व्यासः ।

कालेन मीलितधियामवमृश्यनृणाम्
स्तोकायुषां स्वनिगमो वतदूरपारः ।
आविर्हितस्त्वनुयुगं सहि सत्यवत्याम्,
वेदद्रुमं विटपशो विभजिष्यतिस्म ॥३८॥

बुद्धः ।

देव-द्विषां निगमवर्त्म निनिष्टितानाम्,
पूर्भिर्मयेन रचिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमति प्रलोभम्,
वेषं विधाय बुद्धभाष्यत औपधर्म्मम् ॥३९॥

अशेषसन्देहहानार्थं व्यासावतारमाह । (*) कालेनेति । स्वनिगमः स्वकृतो वेदराशिः । वत अहो दूरपारः दूरस्थितपर्य्यन्तः । इत्यवमृश्य । आविर्हितः अवतीर्णः । अनुयुगं द्वापरे । विटपशः शाखाभेदेन २।७।३६-३७ ॥ (३८)

भ्रान्तिदर्शननिवृत्त्यर्थं बुद्धावतारमाह । देवेति । पूर्भिः पुरोभिः । अदृश्यतूर्भिरलक्षितभ्रमणवेगाभिः । विमोहो ग्रहीतत्यजने शक्तिः । प्रलोभः (ऽन्या) त्यक्तार्थग्रहणे । भाष्यते उच्यते विष्णुना । औपधर्म्मं

(*) एवं हि वेदान्तकल्पतरुद्भुत पराशरोपपुराणवचनाज् ज्ञायते । तथाच "द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुनिः । कृत्वा वेदं सुबहुधा कुरुते जगतो हितम् ।" सूतसंहिताभाष्यप्रारम्भे चाप्येवमस्ति ।" "नस्यन्यः पुण्डरीकाक्षान्महाभारतकृद् भवेत् ।" अयमेव हि अष्टादशपुराणकर्त्ता । तथाच तत्रैव "अष्टादशपुराणानां कर्त्ता सत्यवतीसुतः ।" योगदर्शन भाष्यकृद्भाष्यम् । तथाच सर्व्वतन्त्रापरतन्त्रश्रीमद्वाचस्पतिमिश्रः "नत्वा पतञ्जलिमृषिं वेदव्यासेन भाषिते" इति ।

कल्किः।

यर्ह्यालयेष्वपि सतां न कथाहरेः स्युः,
पाषण्डिनो द्विजजना वृषला नृदेवाः।
स्वाहा स्वधा वषड़ितिस्म गिरा न यत्र,
शास्ता भविष्यति कलेर्भगवान् युगान्ते ॥४०॥

मन्वन्तरावतारः। यज्ञः।

इति मन्त्रोपनिषदं (२) व्याहरन्तं समाहितम्।
दृष्ट्वाऽसुरायातुधाना जग्धुमभ्यद्रवन् क्षुधा ॥४१॥

धर्म्माभासः। स्वार्थे (१) अण् २।७।३७॥ (३९)

कलिदोषनिरासार्थं कल्किनमाह। यर्ह्यति। यर्हि यदा पाषण्डिनो वेदबाह्याचाराः। नृदेवा राजानः। यदा वृषलाः। शूद्राः एषाञ्च फलोक्तिः। षष्ठस्याष्ट (नव)मेऽध्यायेऽनुक्तं तु लिङ्गैकं फलमुह्यम्। ब्रह्मा नारदम् २।७।३८॥ (४०)

एवं कल्पावतारानुक्त्वा मन्वन्तरावतारानाह। मन्वन्तरेति। स्वायम्भुवीये मन्वन्तरे जातं यज्ञमाह। यज्ञ इति। इति पूर्वोक्तप्रकारेण मन्त्रोपनिषदं "ईशावास्ये"ति रहस्यमन्त्रम् व्याहरन्तं जपन्तं स्वायम्भुवं जग्धुं खादितुं क्षुधाविष्टाः ८।१।१७॥ (४१)

अपरञ्च गौतायाञ्चगवतो व्यासावतौर्णरूपेण वेदविभागकर्त्तृत्वं वेदान्तदर्शनप्रणेतृत्वञ्च।- तथाहि "वेदान्तकृद्वेदविदेव चाह"मिति चतुर्व्यूहावतारतत्त्वन्तु श्रीमच्छाङ्करभाष्ये यथा वासुदेवाद् भगवतो ह्लोकत्रयात् परमपुरुषाद् वासुदेवः सङ्कर्षणः प्रद्युम्नः अनिरुद्धाश्चत्वारः भवन्ति। वेदाः स्युः २।२।८।४२ सूः।

(१) पाणिनिः ५।४।२४ सूः।

(२) ईशोपनिषत् १।१।१ श्लोः।

तांस्तथावसितान् वीक्ष्य यज्ञः सर्व्वगतो हरिः ।
यामैः परिवृतोदेवैः हत्वाऽशासत्त्रिविष्टपम् ॥४२॥
ऋषेस्तु वेदशिरस्सुषिता नामपत्न्यभूत् ।
तस्यां यज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥४३॥
अष्टाशीति सहस्राणि मुनयो ये धृतव्रताः ।
अन्वशिक्षन् व्रतं तस्य कौमाराद् ब्रह्मचारिणः ॥४४॥
सत्यसेनः धर्म्मः ।
धर्म्मस्य सुनृतायान्तु भगवान् पुरुषोत्तमः ।
सत्यसेन इति ख्याता जातः सत्यव्रतैः सह ॥४५॥
सोऽनृतव्रतदुःशीलान् असतो यक्षराक्षसान् ।
भूतद्रुहो भूतगणान् अवधीत् सत्यजित् सखः ॥४६॥

अवसितान् । अवेति गतमित्यर्थे । सितं बन्धनं ततो बहुव्रीहिः । एतेनोक्तकृङ्खलानित्यर्थः ८।१।१८ ॥ (४२)

स्वारोचिषेऽये (१) विभुमाह । ऋषेरिति । तस्यां तु(रु)षितायां ततो वेदशिरसः ८।१।२१ ॥ (४३)

तस्य विभोः कौमारात् कुमारत्वात् । ब्रह्मचारिणः व्रतं आवालाद् ब्रह्मचर्य्यम् ८।१।२२ ॥ (४४)

उत्तमे मन्वन्तरे (२) सत्यसेनमाह । धर्म्मस्येति । धर्म्मः पिता । सुनृता माता । सत्यव्रता देवाः भ्रातरः । सत्यजित्तदानीन्तन इन्द्रः ८।१।२५ (४५—४६) ।

---

(१) "स्वारोचिषेऽन्तरे पूर्वम्" इति मार्कण्डेय पुः, देवीमाहात्म्ये १।२। श्लोः ।

(२) मार्कण्डेयपुराणं ५३।६—८ श्लोः । देवीभागवतं १०।१—१३ श्लोः ।

NATIONAL ARCHIVES OF INDIA

हरिः।

तवापि यज्ञे भगवान् हरिण्यां हरिमेधसः।
हरिरित्याहृतो येन गजेन्द्रोमोचितो ग्रहात् ॥४७॥

वैकुण्ठः।

पत्नीविकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः।
तयोः सकलया यज्ञे वैकुण्ठो भगवान् स्वयम् ॥४८॥

वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः।
रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥४९॥

तस्यानुभावः कथितो गुणाश्च परमोदयाः।
भौमान् रेणून् सविममे यो विष्णोर्वर्णयेद्गुणान् ॥५०॥

अजितः।

तवापि देवसम्भूत्यां वैराजस्याभवत्सुतः।
अजितो नाम भगवान् अंशेन जगतीपतिः ॥५१॥

तामसीये हरिमाह। तवापीति। हरिणीमाता। हरिमेधा पिता। शुकः राजानम् ८।१।३०॥ (४७)

रैवतीये वैकुण्ठमाह। पत्नीति। शुभ्रः पिता। तत्प्रियकाम्यया लक्ष्म्याः प्रियचिकीर्षया ८।५।४॥ (४८—५०)

चाक्षुषीयेऽजितमाह। अ(त)वापीति। षष्ठे मन्वन्तरे संभूतिर्माता। वैराजः पिता ८।५।८॥ (५१)

NATIONAL ARCHIVES OF INDIA

कूर्म्मः ।

पयोधिं येन निर्म्मथ्य सुराणां साधिता सुधा ।
भ्रममाणोऽम्भसि धृतः कूर्म्मरूपेण मन्दरः ॥५२॥

वामनः ।

अचापि भगवज्जन्म कश्यपाददितेरभूत् ।
आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥५३॥

सार्व्वभौमः ।

देवगुह्यात् सरस्वत्यां सार्वभौम इति प्रभुः ।
स्थानं पुरन्दराद् हृत्वा बलये दास्यतीश्वरः ॥५४॥

ऋषभः ।

आयुष्मतोऽम्बुधारायां ऋषभो भगवान् किल ।
भविता येन संराड्वां विलोकीं भक्ष्यते श्रुतः ॥५५॥

येन अजितेन । शुकः राजानम् ८।५।१० ॥ (५२)

वैवस्वतीये वामनमाह । अचापीति । अचापि सप्तमे मन्वन्तरे । आदित्याः अदितिपुत्राः । अवरजः कनिष्ठः ८।१३।६ (५३)

सावर्णीये (१) सार्वभौममाह देवेति । सरस्वती माता । स्थानं इन्द्रपदम् । पुरन्दरो वर्त्तमान इन्द्रः ८।१३।१७ ॥ (५४)

दक्षसावर्णीये ऋषभावतारमाह । आयुष्मतेति । अम्बुधारा माता । श्रुतोऽनघ इन्द्रः ८।१३।२० (५५)

---

(१) "सावर्णिको नाममनुर्भवान् भुवि भविष्यति" । मार्कण्डेयपुः, देवीमाहात्म्ये १३ अः ।

NATIONAL ARCHIVES OF INDIA

विष्वक्सेनः।

विष्वक्सेनो विसूच्यान्तु शम्भोः सख्यं करिष्यति।
जातः स्वांशेन भगवन् गृहे विश्वजितो विभुः ॥५६॥

धर्म्मसेतुः।

आर्य्यकस्य सुतस्तव धर्म्मसेतुरिति स्मृतः।

स्वधामा।

वै धृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥५७॥
स्वधामाख्योहरेरंशः साधयिष्यति तन्मनोः।
अन्तरं सत्य सहसः सूनृतायाः सुतो विभुः ॥५८॥

योगेश्वरः।

देवहोत्रस्य तनयः उपहर्त्ता दिवस्पतेः।
योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति ॥५९॥

ब्रह्मसावर्णीये विष्वक्सेनमाह। विष्वगिति। शम्भुरिन्द्रः। विश्वजित्पिता ८।१३।२६ (५६)

धर्म्मसावर्णीये धर्म्मसेतुमाह। आर्य्यकस्येति। वैधृत इन्द्रः ८। १२।२६ ॥ (५७)

भद्रसावर्णीये स्वधामानमाह। स्वधामेति। तस्य भद्रसावर्णेर्मनोः। अन्तरं मन्वन्तरम्। साधयिष्यति पालयिष्यति। सत्यसहाः पिता ८।१३।२८ ॥ (५८)

देवसावर्णीये योगेश्वरमाह। देवहोत्रस्येति। उपहर्त्ता अर्पयिष्यति। दिवस्पतेरिन्द्रस्य। अर्थादिन्द्रपदम् ८।१३।३२ ॥ (५९)

NATIONAL ARCHIVES OF INDIA

बृहद्भानुः ।
सचायणस्य तनयो बृहद्भानुस्तदाहरिः ।
वितानायां महाराज ! क्रियातन्तून् वितायिता ॥६०॥
युगावतारः । (तत्र शुक्लः)
कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः ।
कृष्णाजिनोपवीताद्यान् विभ्रद्दण्डकमण्डलू ॥६१॥
हंसः सुपर्णो वैकुण्ठो धर्म्मो योगेश्वरोऽमलः ।
ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते ॥६२॥

इन्द्रसावर्णीये बृहद्भानुमाह । सचायणेति । तदा चतुर्दशे मन्वन्तरेशानां कल्पावतारत्वं मन्वन्तरावतारत्वञ्च काकतालीय (१) न्यायेन यौगपद्यासम्भवाद् मन्वन्तरेशस्तु प्रागुक्तोऽप्यनुसन्धेयः । शुकः राजानम् ८।१३।३५ ॥ (६०)

युगावतारानाह । कृतेति । शुक्ल इति नामतो वर्णतश्च, अद्यः अद्यसूत्रम्, कृष्णाजिनादीनि विभ्रत् । ब्रह्मचारिवेश इत्यर्थः ११।५ २१ ॥ (६१)

तत्रामान्याह । हंस इति । हन्ति गच्छति जानाति सर्वमिति हंसः ॥ हन्तेर्गत्यर्थस्य कर्त्तर्य्यौणादिकः सः । सुपर्णः परमात्मा । "द्वासुपर्णेति" (२) श्रुतेः । विकुण्ठा माया तामधितिष्ठतीति वैकुण्ठः "ग्रैषिकोऽण्" (३) धारयतीतिधर्म्मः । योगः समाधिः परमात्मा ब्रह्म ११।५।२३ ॥ (६२)

---

(१) काकागमनकाले तालपतनमिव इति काकतालीयम् । एतदाख्योन्यायः ।

(२) मुण्डक श्रु: ३।१।१ ।

(३) पाणिनीये "ग्रैवे" २।४।८२। "ग्रैषिकात् सरूपः ग्रैषिकोऽण्" सि:, कौ, ।

रक्तः।

त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः।
हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥६३॥
विष्णुर्यज्ञः पृश्निगर्भः सर्ववेद उरुक्रमः।
वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते ॥६४॥

पीतः।

द्वापरे भगवान् श्यामः पीतवासा निजायुधः।
श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः ॥६५॥

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च।
प्रद्युम्नायानिरुद्धाय सर्वभूतात्मने नमः (१) ॥६६॥

(त्रेतायामिति)। त्रिमेखलः। त्रिगुणा मेखला दीक्षाङ्गभूता यस्य स तथा। दीक्षितवेश इत्यर्थः। असौ विष्णुः ११।५।२४॥ (६३)

विष्णुरिति। पृश्निः सुतपसः प्रजापतेर्भार्या। तस्याः पुत्रः। सर्ववेदा यस्मिन् स तथा। वर्षति पुण्यफलं आकम्पयति च पापफलं दानेनेति वृषाकपिः। जयत्येव सदेति जयन्तः। उरुमहान् गायोगानं यस्य स तथा ११।५।२६॥ (६४)

निजानि चक्राणि। आदिशब्दाद् वज्राब्ज जसरोज-यवाङ्कुशादीनि। सहजं चिह्नमङ्कः। आगन्तुकं लक्षणं कौस्तुभादिराजवेश इत्यर्थः ११।५।२७॥ (६५)

तन्नामान्याह, नम इति। वासुदेव-संकर्षण-प्रद्युम्नानिरुद्धाः,

---

(१) 'तुभ्यं भगवते नमः' 'सात्वतां पतये नमः' इत्येते पाठान्तरे स्तः। व्याख्यानयोः भागवतटीकायामनुसन्धेया।

NATIONAL ARCHIVES OF INDIA

कृष्णः कलौ ।

कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्र-पार्षदम् ।
यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ॥६७॥
नारायणाय ऋषये पुरुषाय महात्मने ।
विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः ॥६८॥
ध्येयं सदा परिभवघ्नमभीष्टदोहम्,
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।

महदहङ्कारमनोबुद्धीनां सङ्कल्पाभिमान-संशय-निश्चयहेतूनां अन्तः-करणानामधिष्ठातारः ११।५।२८ ॥ (६६)

कृष्णः कलौ । त्विषा अकृष्णं इन्द्रनीलोज्ज्वलम् । अङ्गः मुखादि । उपाङ्गं कर्णादि । अस्त्रं चक्रादि । पार्षदः सुनन्दादि । तैः सहितम् । वैषम्यच विशेषानिर्देशात् यथाभिमतत्वं गम्यते । यज्ञैर्हैवतार्चनैः आराधयन्तीत्यर्थः । संकीर्त्तनप्रायैः नामसंकीर्त्तन-प्रधानैः । द्वापरे तु पूजायाः प्राधान्यम् । तदुक्तं (१) "ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ।" इति ११।५।३२ ॥ (६७) (२)

कलो यत्किञ्चिन्महिमानुवर्णनं तत्सर्वं नामाभित्तितुल्यमिति सूचयितुं नामावसरे स्तुतिमाह । ध्येयमिति । हे प्रणतपाल ! ते चरणारविन्दं वन्दे । तत् किम् ? यथाराजादिसेवा लघुत्वापादिका तथास्याऽवनतिर्नेत्याह । महापुरुषेति । न च योगादिवत्तत्सेवा-

---

(१) विष्णुपुराणं ६।२।१७ श्लोः ।

(२) भागवतं ११।५।३० संख्यक श्लोक-स्वामिपादटीकाऽनुसन्धेया । अवास्य टीकामाप्ति ।

भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतम्,
वन्दे महापुरुष ते चरणारविन्दम् ॥६९॥
त्यक्त्वा सुदुस्त्यज सुरेप्सित राज्यलक्ष्मीम्,
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष ते चरणारविन्दम् ॥७०॥

यामायास इत्याह। ध्येयमिति। सुखहेतुतया सदाध्यातुमुचितम्। तदुक्तम् (१) "आयासः स्मरणे कोऽस्य स्मृतौ यच्छति यः शुभम्। पापक्षयश्च भवति स्मरतां तमहर्निशम्।" इति। तर्हि किन्तावदेव-फलम्? नेत्याह, परीति। परिभवं हन्ति मनोरथं पूरयतीत्यर्थः। यद्यप्यन्यदेवता अप्येवं तथापि ता नाशेष पापक्षये क्षमा। इदन्तु क्षमत इत्याह। तीर्थेति। तीर्थं गङ्गा। आस्पदं आश्रयः। अतएव भवविरिञ्चिभ्यां अपिस्तुतम्। काबार्त्ताऽन्यदेवतानाम्। तस्मादाश्रयण-योग्यमित्याह। शरण्यमिति। महद्भिःसेव्यमानत्वाद् गम्भीरम्। ततश्च नगण्यत्यल्पकानित्यपि नास्तीत्याह। भृत्येति। प्रसन्न-गम्भीरश्चेत्यर्थः। यथाचान्यैः समितापार्त्तिः पुनरुदेति। न तथा-ऽत्रेत्याह। भवेति ११।५।३२ ॥ (६८—६९)

प्रसन्नगम्भीरता मेवाह। त्यक्त्वेति। अरण्यगमनमपि घटते प्रति-कूलपरिजनादुपक्षीणाद्वा राज्यादित्यत आह। सुदुस्त्यज सुरेप्सितेति। तर्हि किं नित्यपरिज्ञानाद् बलवद्भयाद्वा। नेत्याह। आर्य्येति। यथा पिता प्रस्थापयितुं शक्नोति तथा किमपि किं निगूढ़ं दूषणमस्ति। नेत्याह। धर्म्मिष्ठ इति। अनिच्छतोऽपि पितुः सत्यपालनायेत्यर्थः।

---

(१) विष्णुपुराणं १।१७।७८ श्लोः।

स्वल्पावतारः ।

सर्गे तपोऽहमृषयो नव ये प्रजेशाः,
स्थानेऽथधर्म्ममखमन्वमरावनीशाः ।
अन्ते त्वधर्म्महरमन्युवशा सुरादाः,
मायाविभूतय इमाः पुरुशक्तिभाजः ॥७१॥

इति श्रीत्रोपदेवविरचिते मुक्ताफले विष्णोरवतारा: ।
समाप्तस्तृतीयोऽध्यायः ॥

गाम्भीर्यसुक्ता । प्रसन्नतामाह । मायेति । मृगरूपं मारीचम् । दयिता सीता । धर्म्मिष्ठत्वादिको रामव्यापारः । तच्चरणे समारोप्यतेऽति-शयार्थम् । यथा "यामि मनोवाक्कायैः शरणं करुणात्मकं । जगन्नाथं जन्मजरामरणार्णवतारणतरिमुदाराङ्घ्रियुगम्" इति । करभाजनः निमिम् ११।५।३४ ॥ (७०)

स्वल्पावतारमाह सर्गेति । अहं ब्रह्मा, प्रजेशाः प्रजापतयः । स्थानं पालनम् । धर्म्मो यज्ञाधिष्ठातृदेवता । हरो रुद्रः । मन्युवशाः सर्पादयः । ब्रह्मा नारदस्मृति २।७।३९ ॥ (७१)

एषाञ्च स्वल्पत्वेन युगमन्वन्तरकल्पावतारेषु क्रमादल्पत्वं महत्त्वं महत्तरत्वं महत्तमत्वञ्चेति गम्यते ॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णोरवतार रूपाणि । तृतीयोऽध्यायः ॥३॥

NATIONAL ARCHIVES OF INDIA

अथ चतुर्थोऽध्यायः ।

विष्णोरधिष्ठानरूपाणि द्वाविंशतिः ।

अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ।
अर्हयेद्दानमानाभ्यां मैत्र्याऽभिन्नेन चक्षुषा ॥१॥
जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ।
ततः सचित्ताः प्रवराः ततश्चेन्द्रियवृत्तयः ॥२॥
तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ।
तेभ्यो गन्धविदः श्रेष्ठाः ततः शब्दविदो वराः ॥३॥

एवं योगान्तरायप्रतिघातार्थं भगवज्जन्मकर्मानुसन्धानमुक्त्वेदानीममेदभावनया चित्तिमादि (१) चित्तभूमिकाजयार्थमेकाग्रतासम्पादनार्थञ्च भगवतोऽधिष्ठानान्याह । विष्णोरिति । विष्णोरधिष्ठितानि रूपाणि द्वाविंशतिः । तेषां पूज्यत्वमाह । अथेति । भूतानां देहे कृतालयं चेत्यनेन । दानं दीनेषु । मानमुक्तमेषु (२) मैत्री समेषु । अभिन्नेन चक्षुषा सर्वात्मा विष्णुरिति तेषां बुद्ध्या ३।२८।२७ ॥ (१)

जीवा इति । हे शुभे देवहूते ! सजीवनिर्जीवयोः सजीवः श्रेष्ठः । प्राण्यप्राणिनोः सजीवयोः प्राणी । स चित्ताचित्तयोः प्राणिनोः स चित्तः । स्पर्शज्ञाऽस्पर्शज्ञयोः स चित्तयोः स्पर्शज्ञः । रसज्ञारसज्ञयोः स्पर्शज्ञयोः रसज्ञः । गन्धज्ञागन्धज्ञयोरसज्ञयोर्गन्धज्ञः । शब्दज्ञा

---

(१) योगदर्शनं १।२-३ । सूः,—राजमार्त्तण्डः, तत्त्ववैशारदी ।

(२) योगदर्शनं—"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्याऽपुण्य विषयाणां भावनातश्चित्त प्रसादनम्" ।१।३३ सूः ।

NATIONAL ARCHIVES OF INDIA

रूपभेदविदस्तत्र ततश्चोभयतोदतः ।
तेषां बह्वृपदाः श्रेष्ठाश्चतुस्पादस्ततो द्विपात् ॥४॥
ततो वर्णाश्च चत्वारः तेषां ब्राह्मण उत्तमः ।
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥५॥
अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान् स्वधर्मकृत् ।
मुक्तसङ्गस्ततो भूयानदोग्धाधर्म्ममात्मनः ॥६॥
तस्मान्मय्यर्पिताशेष-क्रियार्थात्मा निरन्तरः ।

शब्दज्ञयोर्गन्धज्ञयोः शब्दज्ञः । रूपज्ञारूपज्ञयोः शब्दज्ञयो रूपज्ञः । उभयतादन्तैकदन्तयोः रूपज्ञयोः उभयतोदतः । सपादाऽपादयोः उभययतोदन्तयोः सपादः । चतुस्पद बहुपदयोः सपादयो श्चतुस्पादः हस्तीभूतपादद्वयाऽहस्तीभूतपादद्वययोः चतुस्पाद(द्वय) योः हस्तीभूत-पादद्वयः । वर्णावर्ण्योर्हस्तीभूतपादयोर्वर्णः । ब्राह्मणाऽब्राह्मणयो र्वर्णयो र्ब्राह्मणः । वेदज्ञावेदज्ञयोर्ब्राह्मणयो र्वेदज्ञः । वेदार्थज्ञा वेदार्थज्ञयो र्वेदज्ञयो र्वेदार्थज्ञः ॥ ३।२८।२७-२८ २८-३०-३१-(२—५) ॥

संशयच्छेद्यसंशयच्छेदिनो र्वेदार्थज्ञयोः संशयच्छेदी । स्वधर्म्म-निष्ठाधर्म्मनिष्टयोः संशयच्छेदिनोः स्वधर्म्मनिष्ठः श्रेयान् । यथालाभ-सन्तुष्टाऽयथालाभसन्तुष्टयोः स्वधर्म्मनिष्टयोः यथालाभसन्तुष्टः श्रेयान् । धर्म्मानुजोविधर्म्मोपजोविनोर्यथालाभसन्तुष्टयोः धर्म्मानुजोवी ॥३।२८ ३२। (६) ॥

विष्णुभक्ताऽविष्णुभक्तयोर्धर्म्मानुजोविनोर्विष्णुभक्तः । इन्द्रिय-हृत्तित्वं स्वर्गज्ञानादि सामान्यं न स्वतन्त्रम् । क्रिया उद्यमः अर्थस्तत्-फलम् । आत्माकर्त्ता भोक्ताच । विष्णुप्रीत्यर्थ मेवोद्यमः । फल-

NATIONAL ARCHIVES OF INDIA

मय्यर्पितात्मनः पुंसो मयिसन्न्यस्त कर्म्मणः।
न पश्यामि परं भूतमकर्त्तुः समदर्शनात् ॥७॥
नाहं तथाद्मि यजमानहविर्विताने,
श्चोतद्घृतप्लुतमदन्नुतभुङ्मुखेन।
यद्ब्राह्मणस्य मुखतश्चरतोऽनुघासम्,
तुष्टस्यमय्यवहितैर्निजकर्म्मपाकैः ॥८॥
येषांविभर्म्म्यहमकुण्ठविकुण्ठयोग-
मायाविभूतिरमलाङ्घ्रिरजःकिरीटैः।
विप्रान्नु कोनविषहेतयदर्हणाम्भः,
सद्यः पुनाति सहचन्द्रललामलोकान् ॥९॥

न्त्वानुषङ्गिकं विष्णुप्रीत्यर्थमेव फलंभोगः। आत्मतुष्टिस्त्वानुषङ्गिको विष्णुप्रीत्यर्थमेवात्मधारणम्। मुक्तिस्त्वानुषङ्गिको अर्पणशब्दार्थः। निरन्तरमस्याश्चित्तद्वत्तेरखण्डता मय्यर्पितेति श्लोकषट्केन विष्णुभक्त प्रशंसा। परंश्रेष्ठम्। कपिलः देवहूतिम् ३।२८।३३॥ (७)

हुतभूङ्मुखेन वितानेयज्ञे, अदन् अश्नन् तथा नाद्मि। किम्भूतं श्चोतताच्चरता घृतेनप्लुतं आलोड़ितम्। यद् यथा ब्राह्मणस्य मुखेन चरतः अश्नतः अनुघासं प्रतिग्रासं अद्मि। (अभि) सन्तुष्टस्य मयि नारायणे अवहितैः अर्पितैः निजकर्म्मजपाकैः प्रारब्धकर्म्मजनितैः शुभाशुभैः। अर्पणञ्च नारायणायेति समर्पयेत्तदितिवक्ष्यति ॥३।१६।८।(८)

येषामिति। कः पुरुषः विप्रान् न विषहेत। तत्कृतं क्रोधं न सहेत। यैर्विप्रैः सत्यलोकवासिभिः त्रिविक्रमत्वे मच्चरणार्हणोक्तं पदं नभोगङ्गारूपम्। चन्द्रललामेन शिवेन सह त्रीन् लोकान्

ये मे तनुर्द्विजवरान् दुहतीर्मदीया,
भूतान्यलब्धशरणानि च भेदबुद्ध्या ।
द्रक्ष्यन्त्यघक्षतदृशो ह्यहिमन्यवस्तान्,
गृध्रारुषा ममकुशन्त्यधिदण्डनेतुः ॥१०॥
ये ब्राह्मणान् मयि धिया क्षिपतोऽर्चयन्त-
स्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः ।
वाण्यानुरागकलयात्मजवद्गृणन्तः,
सम्बोधयन्त्यहमिवाहमुपाकृतस्तैः ॥११॥

अद्यापि सद्यः पुनाति । तथा येषाममलमङ्घ्रिरजोऽहं साहस्रैः किरीटैः विभर्म्मि । अकुण्ठा अखण्डा देशकालाभ्याम् । विकुण्ठाख्य लोकरूपा योगमाया विभूतिर्यस्यसतथा ॥३।१६।८।(८)

येम इति । द्विजवरान् ब्राह्मणान् । मदीया दुहतीर्दुहितृः धेनूः । गावोहि सूर्य्यात् प्रसुताः सुर्य्यश्च विष्णुः । अलब्ध शरणानि रक्षकहीनानि भूतानि च । एता ममतनवः ममाधिष्ठानानि तानि । ये भेदबुद्ध्या अनधिष्ठानबुद्ध्याद्रक्ष्यन्ति विष्णुंभजन्तोऽपि तेषाम-पकारं करिष्यन्ति नोपकारम् । यद्यपि सर्वं विष्णोरधिष्टानं तथा-प्यत्र कृतावुपकारापकारौ भटिति विष्णुं स्पृशतो ममत्वातिरेकात् । अघक्षतदृशः पापैरन्धीकृतदृष्टयः । अहिमन्यवः सर्पक्रोधाः । सर्पा-खल्वेतेनैव क्रुध्यन्ति, न च क्रोधं त्यजन्ति । तान् पुरुषान् गृध्राः गृध्राकाराः यमदूताः कुशन्ति क्विन्दन्ति घातयन्ति । ममरुषा प्रेरिताः । अहंहि दण्डनेतॄणां यमादीनामधिष्ठाता ३।१६।१० ॥ (१०)

ये ब्राह्मणानिति । ये ब्राह्मणान् सम्बोधयन्ति तैरहमुपाकृतः कृतषोड़शोपचारः । मयि धिया अर्चयन्तः । विष्णुबुद्ध्या पूजयन्तः ।

NATIONAL ARCHIVES OF INDIA

यस्यात्मबुद्धिः कुणपे त्रिधातुके,
स्वधीः कलत्रादिषु भौमइज्यधीः।
यत्तीर्थबुद्धिः सलिले न कर्हिचि-
ज्जनेष्वभिज्ञेषु स एव गोखरः ॥१२॥
मनसैतानि भूतानि प्रणमेद्बहुमानयन्।
ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥१३॥
अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा।
तमवज्ञाय मां मर्त्यः कुरुतेऽर्चा-विड़म्बनम् ॥१४॥

क्षिपतः तिरस्कारान् कुर्व्वतोऽपि तुष्यद्धृदः प्रीयमाणचित्ताः। पापमये रित्यतस्तिरस्कारादिति। पद्मोपमं ब्राह्मणवक्त्रं क्रोधाग्निना शुष्यत् सि (स्मि)तसुधयासिञ्चन्तः। आत्मजवत् पुत्रानिव गृणन्तः स्तुवन्तः। अहमिव अहं यथा सम्बोधयामि। भगवान् चतुःसनम् ३।१६।११ ॥(११)

व्यतिरेकभङ्ग्यापि प्रशंसन्ति यस्येति। कुणपम्। निर्जीवम् शरीरम्। त्रिधातुकं तेजोऽवन्नात्मकत्वात्। वातपित्तकफवद्वत्वाद्वा। स्वधीः। आत्मीयबुद्धिः। भौमे प्रतिमादौ इज्यधीः पूज्यबुद्धिः। यद् यस्य जले तीर्थबुद्धिः। नत्वभिज्ञेषु भक्तेषु। कर्हिचित् कदाचित्। गोखर इति अज्ञत्वे निन्द्यत्वे उक्तं। भगवान् कुरुक्षेत्रे मिलितान् मुनीन् १०।८४।१३ ॥(१२)

तत्त्वतस्तु सर्व्वं विष्णोरधिष्ठानमित्याह। मनसेति। भगवान् प्रविष्ट इति। मनसा बहुमानयन्। ३।२८।३४ ॥ (१३)

प्रतिमैकपूजकं निन्दन्ति। (१) अहमिति। अर्चा प्रतिमा ३। २८।२१ ॥ (१४)

(१) "अज्ञद्विषत्कर्षात्"। वेदान्तदर्शनं ४।१।५-६ सूः।
"प्रतिमासु शिलाबुद्धिं कुर्व्वाणो नरकं व्रजेत्" मन्त्रशास्त्रे।

NATIONAL ARCHIVES OF INDIA

यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।
हित्वार्चां भजते मौढ्याद् भस्मन्येव जुहोति सः ॥१५॥
द्विषतः परकाये मां प्राणिनो भिन्नदर्शिनः ।
भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति ॥१६॥
अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे ।
नैवतुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥१७॥
अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ।
यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥१८॥

योमामिति । सत्त्वं नित्यत्वम् । आत्मत्वान्निर्निमित्तप्रेमास्पदत्वम् । ईश्वरत्वात् फलदातृत्वम् । हित्वा त्यक्त्वा योऽर्चां प्रतिमां भजते सोऽग्निं हित्वा भस्मन्येव जुहोति ३।२९।२२ ॥ (१५)

भस्मवत्प्रतिमापूजनस्य निष्फलहेतुत्वमाह द्विषत इति । मनः-शान्तिर्हि फलम् । साच द्वेषहानेः सा च सर्व्वात्मा विष्णुरिति दर्शनात् । तच्च प्रतिमैव विष्णुरिति पश्यतो नास्ति ३।२९।२३ ॥ (१६)

प्रतिमार्चनाद्विष्णुस्तुष्टस्ततो मनः शान्तिरिति चेत् सापि नास्तीत्याह अहमिति । उच्चावचैर्विविधैः । क्रियया पूजया हे अनघे देवभूते ! द्रव्यैरुत्पन्नया न तु कर्त्तृगुणेन । स हि मां द्वेष्टार्चयति च ३।२९।२४ ॥ (१७)

यस्तुनोद्वेष्टि किन्तु सर्वात्मा विष्णुरिति न जानाति । स यावन्न-जानातितावदर्चादावर्चयेदित्याह । अर्चादाविति । आदिशब्दा-

---

"अप्सु देवा मनुष्याणां दिवि देवा मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां योगिनां हृदये हरिः ॥" आह्निकाचारतत्त्वे ।

आत्मनश्च परस्यापि यः करोत्यन्तरोदरम् ।
तस्याभिन्नदृशो मृत्युर्विदधे भयमूल्बणम् ॥१९॥

इति श्रीमुक्ताफले विष्णोर्महिमा
विष्णोरधिष्ठानानि च ॥

विष्णोर्नुवीर्य्यं गणनां कतमोऽर्हतीह,
यः पार्थिवान्यपि कविर्विममे रजांसि ।
चस्कम्भ यः स्वरहसा सखलता त्रिपृष्ठम्,
यस्मात्त्रिसाम्यसदना-दुरुकम्पयानम् ॥१॥

दुक्तेष्वधिष्ठानेषु । क्रमाद् विष्णुबुद्धिं कुर्व्वन् सर्व्वात्मा विष्णुरिति जानीयात् ३।२८।२५ ॥ (१८)

तज्ज्ञानं विना मृत्युभयं न निवर्त्तते । "उदरमन्तरं कुरुते अथ तस्य भयम्भवती"ति (१) श्रुतेः । तदेवाहात्मन इति । अन्तरं भेदं उदरम् अत्यल्पं भयं कालचक्रपरिभ्रमणं विदधे अहं सृजामि । मृत्योर्हिमद्रूपम् । कपिलः देवहूतिम् ३।२८।२६ ॥ (१९)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां मुक्ताफले
विष्णोरधिष्ठानानि ॥

एवं भगवतोऽधिष्ठानान्युक्त्वा इदानीं "यत् स्तूयते तद्विधीयत"(२) इति न्यायान्मुमुक्षोर्भगवति स्वातिरेकमनुरागं विधातुं भगवतो-माहात्म्यमाह । विष्णोरिति । अत्रापि श्लोकसप्तकेन पूर्व्वरङ्गं विधास्यन् सामस्त्येन महिमा ब्रह्मादिभिरपि दुर्व्विज्ञात इति द्वाभ्यामाह, विष्णोरिति । नु अहो इह एषु त्रैलोक्यस्थेषु कविषु मध्ये कतमः

---

(१) मैत्रेय्युपः ६।२६ श्लोः ।

(२) मीमांसाभाष्यम्, (दः) १।१ ।

NATIONAL ARCHIVES OF INDIA

नान्तं विदाम्यहममी मुनयोऽग्रजास्ते,
मायाबलस्य पुरुषस्य कुतोऽवरा ये ।
गायन् गुणान् दशशतानन आदिदेवः,
शेषोऽधुनापि समवस्यति नास्यपारम् ॥२॥
येषां स एव भगवान् दययेदनन्तः,
सर्व्वात्मनाश्रितपदो यदि निर्व्यलीकम् ।
ते दुस्तरामतितरन्ति च देवमायाम्,
नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥३॥

किं जातीयः ? योऽपि कविरतीन्द्रियदर्शी पृथ्वी परिभ्रमण् संख्यातवान् सोऽपि नार्हति अन्यस्य का वार्त्ता । कोऽसौ विष्णुर्यस्त्रिपृष्ठम्, चक्रभृतवान् । त्रयो लोकाः पृष्ठे यस्य तत् । त्रिपृष्ठं कालचक्रम् । स्वरहसा स्वेन बलेनाखलता अप्रतिहतेन । यस्माद्विष्णोः महत्तत्वमासीत् । त्रयाणां गुणानां साम्यं मूलप्रकृतिः (१) । सदनमधिष्ठानं यस्य स तथा । कम्पयानं कम्पयमानम् । सर्वाणि वस्तूनि सर्वेषां सर्व्वचेष्टाप्रदमित्यर्थः २।७।४० ॥ (१)

नान्तमिति । अहं ब्रह्मा ते तव नारदस्य । अग्रजाः सनकादयः । व्यधिकरणे षष्ठी । अवरे इन्द्राद्याः । यतः शेषोऽपि नाद्यापि समवस्यति जानाति । स यदयस्यादिदेवो दशशताननश्च २।७।४१ ॥ (२)

एवमपि श्रेयत्वमुक्ताऽस्यभगवतः प्रसादतः सुज्ञाततामाह । येषामिति । स एव नान्योदययेद्दयां कुर्य्यात् । निर्व्यलीकं निष्कपटम् । चकाराद्विदन्ति च । एषां तीर्णमायानां श्वशृगालभक्ष्ये शरीरे तत्र स्व

---

(१) "मूले मूलाभावादमूलम्" सांख्यदः १।६६ सूः । "सत्त्वरजसमसां साम्यावस्थाप्रकृतिः" इति तत्त्वं च । "मूलप्रकृतिरविकृतिः"—सांख्यकारिका, ३ श्लोः ।

NATIONAL ARCHIVES OF INDIA

वेदाहमङ्गपरमस्य हि योगमायाम्,
यूयं भवश्च भगवानथ दैत्यवर्य्यः।
पत्नीमनोः स च मनुश्च तदात्मजाश्च,
प्राचीनबर्हिरिभुरङ्ग उत ध्रुवश्च ॥४॥
इक्ष्वाकुरैलमुचुकुन्दविदेह गाधि-
रघ्वम्बरीषसगरा गयनाहुषाद्याः।
मान्धातृलर्कशतधन्वनुरन्ति देवा,
देवव्रतो बलिरमूर्त्तरयो दिलीपः ॥५॥
सौभर्य्युतङ्क शिविदेवलपिप्पलाद-
सारस्वतोद्ववपराशरभूरिषेणाः।
येऽन्ये विभीषणहनुमदुपेन्द्रदत्त-
पार्थार्ष्टिषेण विदुरश्रुतदेववर्य्याः ॥६॥

शरीरेऽहं धीः परशरीरे ममधीः तीर्णमायत्वेऽविक्रमेदित्यर्थः २।७।४२॥ (३)

भगवत् प्रसादाज् ज्ञायत इत्यत्र निदर्शनान्याह। वेदाहमिति। अहं ब्रह्मा हे अङ्ग नारद! मणिमन्त्रादिभिर्व्विना या समाधि माचा दाविर्भवति सा योगमाया। दैत्यवर्य्यः प्रह्लादः। मनुः स्वायम्भुवः तत्पत्नीशतरूपा। आत्मजा प्रियव्रताद्याः। उत अहो।२।७।४३। (४)

ऐलः पुरूरवाः विदेहो जनकः। नाहुषो ययातिः देवव्रतो भीष्मः २।७।४४। (५)

उत्तङ्को भगवतादर्शित विश्वरूपः। हितकारस्यायंग्रन्थः।

तेवै विदन्त्यतितरन्ति च देवमायाम्,
स्त्रीशूद्र हूण शवरा अपि पाप जीवाः ।
यद्यद्भुतक्रम परायण शील शिक्षा-
स्तिर्य्यग्जनाअपि किमु श्रुत धारणा ये ॥७॥
शश्वत् प्रशान्तमभयं प्रति बोधमात्रम्,
शुद्धं समं सदसतः परमात्मतत्त्वम् ।
शब्दो नयत्र पुरुकारकवान् क्रियार्थो-
माया परै त्यभिमुखे च विलज्जमाना ॥८॥

आर्षो द्वितीयतकारलोपः । श्रुतदेवो भगवदातिथ्यकारी ।२।७।-४५। (६)

तेवै इति । अद्भुतक्रमो विष्णुः । तत्परायणं यच्छीलं सद्वृत्तं तत्र शिक्षा येषां तेतथा । श्रुते गुरूपदेशे धारणा येषां ते तथा २।७। ४६॥ (७)

एवं पूर्व्वरङ्गं कृत्वा प्राधान्यान्निराकारमहिमानन्तावदाह । शश्वदिति । शश्वदित्यं । कुतः यतः प्रशान्तं निष्क्रियम् । कुतः यतोऽभयम् भयञ्चद्वितीयात् (१)। तच्च प्रतिबोधमात्रम् । कुतः यतः शुद्धम् । शुद्धस्य ज्ञानस्य तस्य न कर्त्रादियोगः । न च तदसिद्धम् । यतः समम् । ज्ञानविशेषेषु सामान्यरूपेण स्थितम् । तच्च सदसतः परम् । नकार्य्यम् नापि कारणम् । विशेषस्यैव तथात्वात् । नचात्माद्यस्यद्वितीयः । यत आत्मरूपम् । तदुक्तं श्रीशङ्कराचार्य्यैः । "ज्ञानज्ञेयविहीनोऽपि सदाज्ञ" (२) इति ।

---

(१) बृहदारण्यकं-१।४।२। (२) श्रीमच्छङ्कराचार्य्य यत्नावल्यामस्ति ।

तद्वै पदं भगवतः परमस्य पुंसो-
ब्रह्मेति यद्विदुरजस्रसुखं विशोकम्।
सध्रीङ् नियम्य यतयो यमकर्त्तृहेतिम्,
जह्युः स्वराड्विव निपानखनित्रमिन्द्रः॥९॥
स श्रेयसामपिविभुर्भगवान् यतोऽस्य,
भावस्य भावविहितस्य सतः प्रसिद्धिः।

न च तत्ज्ञानशब्देन सहैतम् यतोऽ(य)त्र नो शब्दः। शब्दोहि कारकार्थः क्रियार्थो वा। न च तत्तद्रूपम्। नापि मनसाहैतम्। मनोऽपिहि माया साच यदेति दूरे गच्छति अभिमुखे स्थातुं विलज्जमानेव ॥२।७।४७। (८)

तदेव ज्ञानं भगवतः पदं ब्रह्मेति प्रसिद्धं नच निष्प्रमाणकम्। यद् यतयोविदुः अनुभवन्ति। अजस्रसुखं विशोकञ्च। "यच्चित्ततोदः कृपया" (१) इत्युक्तम्। शोकविहीनत्वात्। किंकृत्वाविदुः सध्रीङ् सहचरंचित्तं नियम्य लयविक्षेपाभ्यां निर्वर्त्त्य सहाञ्चतीति सध्रीक्। ततो यमकर्त्तृहेतिं जह्युः त्यजन्ति। यमश्चित्तवृत्ति यमनप्रयत्नः (२)। स एव कर्त्तृ हेतिः। हृदयग्रन्थिच्छेदनशस्त्रम्। प्राप्तोपेया उपायन्त्यजन्तीत्यर्थः। स्वराड्दरिद्रः सहि स्वस्यराड् न तस्यभृत्योनस्वामी स-यदानिपानस्य जलाशयस्य खननार्थं सुपात्तेन खनित्रेण जीवन् धनसञ्चयादिन्द्रः सम्पन्नोभवति। तदा निपान खनित्रं जहाति। एवं संसारी यममभ्यसन् यदा मुक्तो भवति। तदाच यमं जहाति ।२।७।४८। (९)

---

(१) भागवत २।२।२७। श्रीः।

(२) "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहायमाः—योगदर्शनं २।३० सूः।

NATIONAL ARCHIVES OF INDIA

देहे स्वधातु विगमेऽनुविशीर्य्यमाणे,
व्योमेव तत्र पुरुषो न विशीर्य्यतेऽजः ॥१०॥
सोऽयन्तेऽभिहित स्तात ! भगवान् विश्वभावनः ।
समासेन हरेर्नान्यद्दन्यस्मात् सदसच्चयत् ॥११॥
इदं भागवतं नाम यन्मे भगवतोदितम् ।
संग्रहोऽयं विभूतीनां त्वमेतद्विपुलीकुरु ॥१२ ।

यदेतदुक्तं पदं यच्च तस्योपार्जकः स भगवानित्याह । सश्रेय-स्वामिति । योऽपि श्रेयसां पदसाधनानां विभुः सम्पादकः सोऽपि भगवान् । यतः कारणादस्य श्रेयसःप्रसिद्धिर्निष्पत्तिः । सतः सद्भूपात् । भावानां पदार्थानां स्वभावो ब्राह्मणत्वाद्यसाधारणरूपम् । तेन विहितस्य ब्राह्मणस्येदम् क्षत्रियस्येदमिति विभागेनोक्तस्य सद्भूपश्च स एव । सहि देहे विशीर्य्यमाणे नहिविशीर्य्यते । अज-श्चजायमाने नहि जायते । व्योमेव स्वधातूनां देहकारणानां विगमे नाशे । २।७।४८ ॥ (१०)

निराकार महिमानमुक्त्वोपसंहरति । सोऽयमिति । यत्सद् यच्चासत् । तत् सर्वं हरेरन्यन्नभवति । हरिस्तु अस्मादन्य एवेति संक्षेपः २।७।५०। (११)

साकार महिमानं ब्रुवन् चतुर्भिःपूर्वरङ्गमाह । इदमिति । यद् यस्माद्भगवतोक्तं तेन भागवतं प्रोक्तार्थेऽण् (१) विभूतयोलीलावताराः विपुलीकुरु विस्तारय ।२।७।५१। (१२)

---

(१) पाणिनिः ४।२।६४ सूः ।

यथा हरौ भगवति नृणां भक्तिर्भविष्यति ।
सर्वात्मन्यखिलाधार इति सङ्कल्पय वर्णय ॥१३॥

मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ।
शृण्वतः श्रद्दयानित्यं मायया त्मा नमुह्यति ॥१४॥

नैवात्मनः प्रभुरयं निजलाभपूर्णो-
मानं जनादविदुषः करुणो वृणीते ।
यद्यज्जनो भगवते विदधीत मानम्,
तच्चात्मने प्रतिमुखस्य यथामुखश्रीः ॥१५॥

यथेति । अनेन वर्णितेन हरौनृणां भक्तिर्भविष्यतीति सङ्कल्पं मनसि वि(नि)धाय भागवतं यथावद्वर्णय । अत्र हि हरेर्भगवत्त्वं सर्वात्मकत्वं सर्वाधारत्वञ्चवर्ण्यते । तच्च भक्तिं दृढ़यति २।७। ५२। (१३) ॥

ननु चिदेकरसेवस्तुनि लोलावतारादि मायाद्वारकम् । माया-मयस्यच वर्णनेन समीहित सिद्धिः । नहि जलाभासात् पिपासा शाम्यतीत्यतआह मायामिति । अयमर्थः । यद्यपि चरित्रं मायामयं तथापि तच्छ्रद्दया वर्णितम् । श्रुतमनुमोदितं वा मायां निवर्त्तयति । तत्र हेतुः ईश्वरस्येति । तथाच शाम्बः "त्वां स्तोष्यामीति" ब्रह्मा नारदम् २।७।५३॥ (१४)

नन्वीश्वरोऽपि चेत्स्वगुणवर्णनेन तुष्यति तर्हि राजादि तुल्यत्वं स्यादत आह । नैवेति । अयं विष्णुः मानं न वृणीते । कुतः निजस्य

NATIONAL ARCHIVES OF INDIA

तत् पादशौचं कलिकल्मषापहम्,
स्वधर्मविन्मूर्ध्न्यदधात् सुमङ्गलम्।
यद्देवदेवो गिरिशश्चन्द्रमौलि-
र्दधारमूर्ध्ना परया च भक्त्या ॥१६॥

नित्य निरतिशयानन्दस्वरूपस्य लाभेन पूर्णत्वात्। पूर्णा अपि क्वचित् परीक्षेगेन उद्विग्ना दृश्यन्ते। अयन्तु न तथा इत्यत आह। करुण इति। तथापि लब्धनिर्व्वाहार्थमन्यापेक्षयाभाव्यम्। नेत्याह। प्रभुः ईश्वितः। अविदुष इति। जन एवाज्ञतया तं सापेक्षं मन्यत इत्युक्तम्। ननु सेव्यमानोऽप्ययमखण्डतातिशयश्चेत् किमर्थं सेव्यते इत्यत आह। यद् यदिति। भगवत इति चतुर्थ्यासङ्कल्पस्य तादर्थ्यमुक्तम्। भजनस्य कृतस्यातिशयस्य भगवत्यभावेऽपि तत् प्रीति बुद्ध्या कृतं आत्मनि फलतीत्यर्थः। अतएवविदधीतेत्युक्तम्। नतुविदध्यादिति। मानं पूजारूपम्। आत्मनेपदादेव क्रियाफलस्य कर्तृगामित्वे सिद्धे चतुर्थी निर्दोषोऽतिशयार्थः। नन्वन्यार्थंकृतं कथमन्यस्य स्यादिति तत्राह। प्रतीति। प्रतिमुखं मुखप्रतिबिम्बम्। युक्तश्चेदम्। विष्णुात्मनोबिम्ब प्रतिबिम्बत्वात्। प्रह्लादः बालान् ७।८।११॥ (१५)

एवं पूर्व्वरङ्गं कृत्वा पादयोर्महिमानं द्वाभ्यामाह। तत्पादेति। तस्य वामनस्य चरण क्षालनमुदकं। कल्मषं पापं। खेषां पित्रादीनाम्। धर्म्मं विप्रपूजारूपं वेत्तीति स्वधर्मविद् बलिः। सुमङ्गलतामाह। यदिति। देवदेवत्वादप्राकृतत्वं। गिरिशत्वान्निरपेक्षत्वम्, चन्द्रमौलित्वात् सालङ्कारत्वम्। एवम्भूतोऽपि दधारेति वस्तुशक्तिः। तत् किमवज्ञया धृतवान्। नेत्याह मूर्ध्नेति। नापि व्यलीकेन इत्याह परयेति। शुकः राजानं ८।१८।३८॥ (१६)

यत्पादयोरशठधीः सलिलं प्रदाय-
दुर्वाङ्कुरैरपि विधायसतीं सपर्य्याम्।
अप्युत्तमां गतिमसौ भजते त्रिलोकीम्,
दाश्वान् विक्लवमनाः कथमार्त्तिमृच्छेत् ॥१७॥
गायन्ति ते विशदकर्म्मगृहेषु देव्यो-
राज्ञां स्वशत्रुवधमात्मविमोक्षणञ्च।
गोप्यश्च कूर्च्चरपतेर्जनकात्मजायाः,
पित्रोश्च लब्धशरणा मुनयो वयञ्च ॥१८॥
यद्विश्रुतिः श्रुति नुतेदमलं पुनाति,
पादावनेजनपयश्च वचश्च शास्त्रम्।
भूःकाल भर्ज्जित भगापि यदङ्घ्रिपद्म-
स्पर्शोत्थशक्तिरपि(भि)वर्षति नोऽखिलार्थान् ॥१९॥

यदिति। यस्य तव पादयोः सतीं निष्कामाम् सपर्य्यां पूजाम्। उत्तमागतिमोक्षः। असौ बलिः। पुनः त्रिलोकीं दाश्वान् दत्तवान्। ऋच्छेत् प्राप्नुयात्। ब्रह्मा त्रिविक्रमम् ८।२३।२७॥ (१७)

अथ चतुर्भिः कीर्त्तेर्महिमा गायन्तीति। देव्योदेवस्त्रियः। राज्ञोजरासन्ध बद्धराज्ञां पत्नयः। शत्रुर्जरासन्धः आत्मनां आत्मभूतानाम् प्रेयसांविमोक्षणम्। तस्य च वर्त्तिष्यमाणत्वेऽप्यधुनैव गानम्। निश्चयत्वेनाध्यवसायात्। गोप्यश्च शत्रोः शङ्खचूड़स्य वधम्। कुञ्जरपतेर्गजेन्द्रस्यमोक्षणम्। सीतायाश्च। पित्रोर्वसुदेवदेवक्योः। उद्धवः श्रीकृष्णम् १०।७१।८॥ (१८)

यदिति। यद् विश्रुतिर्यस्य श्रीकृष्णस्य विश्रुतिः कीर्त्तिः। इदं

तद्दर्शन स्मरणानु पथ प्रजल्प-
शय्यासनाशन सयौनसपिण्डबन्धः ।
येषां गृहे निरय वर्त्मनि वर्त्तनां वः,
स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥२०॥
यस्यामलं दिवियशः प्रथितं रसायाम्,
भुमौच ते भुवनमङ्गल दिग्वितानम् ।

जगत्पुनाति विश्रुतिनुता वेदैस्तुता । पयोवचश्च जगत्पुनाति । वचः शास्त्रं श्रीभागवतं वेदरूपत्वेनवा हितोपदेशकत्वात् । भगो भजनीयत्वम् । यदङ्घ्रिपद्म स्मर्णेन उद्भूतशक्ति सर्व्वार्थान् वर्षति १०।८२। २९ ॥ (१९)

तद्दर्शनेति । दर्शनं स्मरणञ्च अनुपथः अनुगतिश्च । प्रजल्पो-गोष्ठीच शय्याशयनञ्च आसनञ्च अशनंभोजनञ्च । सयौनबन्धः विवाह-सम्बन्धः, सपिण्डबन्धः दैहिकसम्बन्धः । तेन श्रीकृष्णेनसह दर्शनाद्युपलक्षित सयौनसपिण्डबन्धो येषां वोऽस्ति किञ्च येषां वो यदूनां अनुपथः अनुगमनम् । सयौनं योनिसम्बन्धः । सापिण्ड्यं बन्धः सम्बन्धः येषां युष्माकं तस्य विष्णोर्दर्शनादिलक्षणः । गृहेस्थितानामप्यास, स्वर्गापवर्गयोर्विरामोयस्मात् सम्बन्धात् । स च स्वयं साक्षात् विष्णोर्विरास नतु युष्मत् प्रयत्नात् कुरुक्षेत्रेमिलिता राजानः १०।८२। ३० ॥ (२०) (१)

---

(१) कुरुक्षेत्रम् परमपूततीर्थम्, तथाहि—"इदं वै कुरुक्षेत्रं देवानांदेव यजनं सर्व्वेषां भूतानां ब्रह्मसदनम्" "अविमुक्तं वै कुरुक्षेत्रम्" * * * * इति जाबालोपनिषत् १।४ ३।४ श्लोक ।

मन्दाकिनीति दिवि भोगवतीतिचाधो-
गङ्गेतिचेह चरणाम्बु पुनाति विश्वम् ॥२१॥

इति श्रीवोपदेवविरचिते मुक्ताफले विष्णुप्रकरणं
अधिष्ठानम् नाम प्रथमं समाप्तम् ।
समाप्तश्चतुर्थोऽध्यायः ॥

यस्येति । हे भूवनमङ्गल यस्य ते यशो मन्दाकिन्यादि व्याजेन जगत् पुनाति रसा पातालम् । वितानं उल्लोचः । नारदः श्रीकृष्णम् १०।७०।४४॥ (२१) ।*॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णु प्रकरणम्
अधिष्ठानम् नाम (प्रथमम् समाप्तम्) ॥४॥

NATIONAL ARCHIVES OF INDIA

पञ्चमोऽध्यायः ।

अथ विष्णुभक्तिप्रकरणम् ।

विष्णुभक्तेर्लक्षणं भेदाश्च ।

तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥१॥

एवं विष्णुं प्रपञ्च्य क्रमप्राप्तं भक्ति प्रकरणमारभते। अथेति वो गृहे विष्णोः विष्णुः स्वयमास आविरभूत्। निरय वर्त्मनि प्रवृत्ति मार्गे वर्त्तमानानां स्वर्गापवर्गाभ्यां विरमति। विमुखं करोति। तथा स। ते युयं जन्मभाज इति। यद्वातदिति सामान्य निर्देशः। स इत्यर्थः। स विष्णुः स्वयं येषां वो निरयवर्त्मनि संसारकारणे गृहे वर्त्तमानानां अपि बध्यते। सम्बध्यत इति सम्बन्धः। दर्शनादिभिः सम्बन्धः। सतु स्वर्गापवर्गविरमः। आस परमसुखप्रदो बभुव इत्यर्थः। इति श्रीधरी। तत्रापि भक्तेः सामान्य लक्षणं वक्तुमाह। तचेति। तत्र विष्णुभक्तेर्लक्षणं भेदाश्च। तस्मादिति। यस्मात् कृष्णएव कैवल्यप्रदः। यद्वा तस्मादुपाय विशेषस्य विवक्षितत्वात्। केनापि विहितेन अविहितेन वा। उपायेन साध्य सिद्धवद्धृत सामर्थ्येन "ननून्मादादिना कृष्णे सत्त्वापाधौ ब्रह्मणि निवेशयेत् स्थिरीकुर्य्यात्। लिङ् निर्देशस्यापि विवक्षितत्वात्। उपाय पूर्वं भगवति मनः स्थिरीकरणं भक्तिरिति लक्षणार्थः(१)। नतावदस्यासम्भवः-

---

(१) "साचेश्वरे परानुरक्तिर्भक्तिः इति शाण्डिल्य सूः १।१।

—"चतुर्विधाभजन्ते मांजनाःसुकृतिनोऽर्जुन" गीता ७।१६ श्लोः।

"पूज्यादिष्वनुराग" इति पाराशर्य्यः "कथादिष्विति गार्ग्यः"

"आत्मरत्या विरोधेनेति" शाण्डिल्यः, "नारदस्तदर्पिताखिलाचारता तद्विस्मरणे परम व्याकुलतेति"। नारदभक्तिसूत्रम् १६।१९।

NATIONAL ARCHIVES OF INDIA

सा द्वेधा। विहिता अविहिता च, तत्र विहिता-
देवानां गुणलिङ्गाना मानुश्रविक-कर्म्मणाम्।
सत्व एवैक मनसोवृत्तिः स्वाभाविकी तु या ॥२॥

प्रह्लादादौ सुप्रसिद्धत्वात्। न च कर्म्मक्षयार्थविधिसिद्धार्थयोर्भक्त्योर-व्याप्तिः। तयोरपि अन्तःकरणशुद्धिहेतुत्वेन मनोनिवेशहेतुत्वात्। नाप्युन्मादादावभक्तिभूतेऽव्याप्तिः। तस्यानुपायत्वेन निरस्तत्वात्। शुद्धाया अक्लावुपायानिर्देशादुपायैनैतिलक्षणेनान्तर्भूतमितिशक्यम्। श्रौताभावेऽप्यानुमानिकस्य सम्भवात्। तस्मादनवद्यं लक्षणम्। नारदः युधिष्ठिरम् ७।२।३१॥ (१)

एवं सामान्य भक्तिं लक्षयित्वा इदानीं सुपाय भेदात्तद्विशेषानाह। सेति। सा सामान्यरूपा विहिता वेदोक्ता। देवानिति। देवानां चक्षुराद्यधिष्ठातृणां सूर्य्यादीनाम्। गुणाएव लिङ्गानि ज्ञापकानि येषां ते तथा। ग्राह्यत्वात् तद्यथा 'रूप प्रतिपत्ति कारणपूर्व्विका क्रियात्वात् च्छिदिक्रियावद् (१) गुणा एव लिङ्गानि नतु गुणवन्तः। तेषां नाशे दुःखापत्तेः। गुणस्य न नाशः ततोऽन्यत्र भावात्। एवञ्च तत्तद्विशेषत्यागाद् महासामान्ये सत्वएववृत्तिः। आनुश्रविकानि वेदोक्तान्येव कर्म्माणि (२) येषां देवानाम्। तद्यथा चक्षुरादिभि-र्विहिताएवरूपादयो ग्राह्या नतुसर्वे। आनुश्रविकान्येव कर्म्माणि नतुदृष्टानि। तेषां फलाभावे दुःखापत्तेः, इतरेषां सफलार्थत्वम्। तन्निवृत्त्यर्थत्वात्। यथोक्तम्

"परोक्षवादो वेदोऽयं बालानामनुशासनम्।
कर्म्ममोक्षाय कर्म्माणि विधत्ते ह्यगदं यथा।"

---

(१) सांख्यतत्त्वकौमुदी ५ श्लो: टी:। इन्द्रियानुमानप्रसङ्गे तत्त्वकौमुदी टीका।

(२) गुरुमुखादनुश्रूयते इत्यनुश्रवोवेदः तत्र भवः आनुश्रविकः वेदोक्तकर्म्मकलापः। सांख्यकारिका ५ टी:।

NATIONAL ARCHIVES OF INDIA

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी।
जरयत्याशु या कोशं निगीर्णमनलो यथा ॥३॥

सा द्वेधा, मिश्रा शुद्धा च। मिश्रा द्वेधा। कर्म्म-मिश्रा।१। कर्म्मज्ञानमिश्रा।२। ज्ञानमिश्रा च।३। कर्म्ममिश्रा द्वेधा। राजसी, सात्विकी, तामसी च। तामसी द्वेधा। हिंसार्था, दम्भार्था, मात्सर्य्यार्था च ॥४॥

इति (१)। सत्वएव न रूपादौ। एकमनसः पुरुषस्य देवानाम्। एकत्रैव मनोयस्य नोभयत्र। अयमर्थः। यद्यपि देवानां सत्त्वे सत्वव्यङ्ग्ये च विष्णौ वृत्तिः तथापि मनसो विष्णावेव। सा च स्वाभाविकी स्वभावेन जाता नोत्पादादिना विकारेण ३।२५।३२॥ (२)

अनिमित्तेति। निमित्तेन ख्यातिलाभपूजादिना हीना। भाग-वती भगवत इयं भजमान भज्यमानयोर्भगवत्त्वात्। यथोक्तं "सर्वभूतेषु यः पश्येत्" (२) दित्यादिना सिद्धेर्गरीयसी कैवल्यादधिका। कैवल्ये सुखत्वं। भक्तौतु सुखानुभवः। जरयति नाशयति। कोशं मायावरणम्। निगीर्णंभुक्तमन्नम् अस्याश्च विहितत्वे आनुश्रविक कर्म्मणामिति लिङ्गम्। कपिलः देवहूतिम् ३।२५।३३॥ (३)

अथ विहिताया: प्रभेदानाह, सेति। सा विहिता कर्म्मक्रिया धात्वर्थः ज्ञानमात्र विषयः परोक्षबोधः। हिंसा प्राणवियोजकः व्यापारः दम्भः परवञ्चना। मात्सर्य्यं परोत्कर्षासहिष्णुत्वम्। अभिसन्धायेति। अभिसन्धायोद्दिश्य संरम्भो सक्रोधः। भिन्नटक्

---

(१) भागवतं ११।३।४४ श्लोः।

(२). „ ११।२।४५ „।

अभिसन्धाय यद्धिंसां दम्भमात्सर्यमेव वा।
संरम्भीभिन्नदृग्भावं मयि कुर्य्यात् स तामसः ॥५॥
राजसी त्रेधा, विषयार्था, यशोऽर्था,
ऐश्वर्य्यार्था च।
विषयानभिसन्धाय यश ऐश्वर्य्यमेव वा।
अर्चादावर्च्चयेद्यो मां पृथग्भावः स राजसः ॥६॥
सात्विकी त्रेधा। कर्म्मक्षयार्था, विष्णुप्रीत्यर्था,
विधिसिद्ध्यर्था च।

मेदं सत्यं मन्यमानः। भावं भक्तिम्। एवं पृथग्भावः। तामसः। तामसभक्तियोगात्। एवं राजसः राजसभक्ति योगात्। एवं सात्विकश्च। भक्तस्वरूप कथनेन भक्तिर्लक्षिता। भक्तिप्रयुक्तत्वात्। भक्तशब्दस्य। तत्राभिसन्धानं कर्म्म। तस्य च हिंसादि विषयत्वात्तामसत्वम्। विहितत्वं (१) श्येन न्यायेन। राजसी त्रेधा। विषयार्था। यशोऽर्था। ऐश्वर्य्यार्था च। ता एवाह विषयेति। यशः साधुवादः। ऐश्वर्य्यं अप्रतिहताज्ञत्वम्। अर्चादाविति तामसे सात्विके च ज्ञेयम् ३।२८।८॥ (५।६)

सात्विकी त्रेधा। कर्म्मक्षयार्था। विष्णुप्रीत्यर्था, विधिसिद्ध्यर्था च। कर्म्मेति। कर्म्म पापं। निर्हारः क्षयः। परस्मिन्निति। यदोक्षरे भगवति कर्म्म ब्रह्मनि भावित" (२) मित्यत्रोक्ते भगवदादिरूपे तत्वे। अत्रहि भगवदादयः सत्वगुण त्रिगुणनिर्गुणानां वाचका इत्युक्तम् पर-

---

(१) "श्येनाभिचरन् यजेत" इति शत्रुवधनिमित्तः अभिचाराख्योयागविशेषः। अर्क-संग्रहः १।१। (२) भागवतं १।५।२२ श्लोकः।

कर्म्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम् ।
यजेद् यष्टव्य मिति वा पृथग्भावः स सात्विकः॥७॥

कर्म्मज्ञानमिश्रा त्रिधा । उत्तमा । मध्यमा अधमा च । सत्त्वतारतम्यात् तत्रोक्तम् ।

महंस प्रियायाम् (१) यजेत् पूजयेत्। यष्टव्यमिति विधौ क्त्य प्रत्यय अयमर्थ चित्तंहि प्रख्या-प्रवृत्ति स्थिति शीलत्वात् त्रिगुणम्। (तत्र) प्रख्यारूपं (२) हि चित्तसत्त्वं भूयसा तमसा संसृष्टं हिंसाद्युपगं भवति। तथा रजसा संसृष्टमैश्वर्य्यादिप्रियं भवति। तदेव प्रक्षीण-मोहावरणं सर्वतः प्रद्योतमान मनुविद्धं रजोमात्रया भगवत्प्रियादिषु धर्म्मेषु प्रवर्त्तते॥" कपिलः देवहूतिम् ३।२८।१०॥ (७)

एवं कर्म्ममिश्रांनवभेदामुक्त्वा कर्म्मज्ञानमिश्रां त्रिभेदामाह। कर्म्मेति। त्रित्वे हेतुमाह। सत्वेति। अयमर्थः ज्ञानं हि सत्वा-दुत्पद्यते। "सत्वात् संजायते ज्ञान" मिति वचनात् (३)। अतः सत्वस्य प्रकर्ष साम्यापकर्षौ। ज्ञानस्य त्रिरूपत्वात् भक्तेस्त्रैविध्यम्। (४)। अथोत्तमा सर्वेति, सर्व्वभूतेषु स्थितस्यात्मनो जीवस्य भगव त्वत्त्वम्। उत्तमभक्तियोगात्। एवं मध्यम प्राकृतौ। अत्रयः पश्येत् दर्शनंकुर्य्यादिति कर्म्मा दर्शनस्य चात्म विषयत्वं ज्ञानम्। आत्मनश्च

---

(१) एतन्नाम्नी श्रीमद्भागवतस्य वेदान्तसम्मता सुप्राचीना टीका। कैवल्यदीपिका च एतदनुसारिणी हैमाद्रीया। तदुक्तं कैवल्यदीपिकाप्रारम्भे चान्ते च हरिलीला-भाष्ये "टीकां प्रियां परमहंसजनस्य हृद्यं"ति। (२) योदर्शनभाष्यं १।२ सूः।

(३) गीता १४.१७ श्लोः।

(४ गीता १४।१८।

(उत्तमा)

सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥८॥

(मध्यमा)

ईश्वरेतदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्री कृपोपेक्षा यः करोति स मध्यमः ॥९॥

(अधमा)

अर्च्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद् भक्तेषु चान्येषु सभक्तः प्राकृतः स्मृतः ॥१०॥

भगवत्त्वं भक्तिः । उत्तमत्वं चास्याः सर्व्वभूतस्थितैकात्मविषयेण ज्ञानेन मिश्रत्वात् ११।२।४५॥ (८)

अथ मध्यमा । ईश्वरेति । अत्रेश्वरादीनां प्रेमादिभिः क्रमात् सम्बन्धः । ईश्वरे प्रेम्ना विषयरागः पराक्रियते । मैत्र्या ईर्षा । कृपया गर्व्वः । उपेक्षया द्वेषः । ईश्वरो जगत्कारणं मायोपाधिः पुरुषः । तदधीना ईश्वरार्पितप्राणाः । बालिशा मूर्खाः । अत्रेश्वरस्य जगत्कारणत्वाद्यनुसन्धानं ज्ञानं तत्र प्रेमभक्तिः । तत्सिद्धये तदधीनादिषु मैत्र्यादिकरणं कर्म्म । अस्याश्च मध्यमत्वमीश्वरस्य सर्व्वात्मकत्वे नावगमात् ॥ ११।२।४६ (९)

अथाधमा । अर्च्चायामिति । ईहतेकरोति । अत्रार्च्चायामेव हरिरस्तीति बोधोज्ञानम् । श्रद्धया तत्पूजनं भक्तिः । तद्भक्तेषु पूजाया अकरणं कर्म्म । अधमत्वञ्चास्यासुज्ञानमिश्रत्वात् । हरिः निमिम् ॥ ११।२।४७ (१०)

NATIONAL ARCHIVES OF INDIA

मद्गुण श्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्नायथा गङ्गाम्भसोऽम्बुधौ ॥११॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥१२॥

एवं सगुणां भक्तिं निरूप्य निर्गुणामाह । मदिति । सर्वगुहाशये सर्वात्मनि । गङ्गाम्भो हिमपर्वतैः प्रतिबाध्यमानं मयि यथा समुद्रमेवाभिनिवेशते । तथा विषयैर्विच्छिद्यमानापि मनोवृत्तिस्तानतौत्य विष्णुमेवेति । अविच्छेदे दृष्टान्त उक्तः निर्गुणो ज्ञानमिश्रः । अत्र च निर्गुणत्वं प्रागुक्तानां गुणकार्य्याणामनुपलम्भात् ॥ न चास्या ऐकात्म्यविषयत्वे नोत्तमकर्म्मज्ञानमिश्रयासहाविशिष्टत्वमिति शङ्क्यम् । अत्र पश्येदितिवत् कर्म्मनिर्देशाभावात् । नचात्रापि मनोगतिरिति मनोगमनं कर्म्म । यदृच्छोपस्थितगुणश्रुतिमात्रेण स्वभावत एव मनसः प्रवृत्त्या प्रयत्नेन प्रेषणाभावात् । अत्र मयि मनो गतिरिति भक्तिः । तत्रापि सर्वगुहाशये मयीति ज्ञानमिश्रत्वे बीजम् ॥३।२९। ११ (११) ।

एवं मिश्रां भक्तिमुक्त्वा शुद्धामाह । शुद्धेति । अहैतुकीफलाकाङ्क्षारहिता (१) । अव्यवहिता निरन्तरा । अहैतुकीत्वमेवाह । सालोक्येति । यस्यां भक्तौ क्रियमाणायां तुष्टेन भगवता दीयमानमपि सालोक्यादिभक्त्या न गृह्णन्ति । सालोक्यं एकस्मिन् लोके अवस्थानम् । सामीप्यं समीपे अवस्थानम् । सारूप्यं तुल्यरूपप्राप्तिः । सार्ष्टिर्जगत्सृष्ट्यादि वर्ज्जं तुल्यप्रभावत्वम् । एकत्वं चतुर्भुजादिमूर्त्यधिष्ठात्रा पुरुषेण सालोक्यम् । उत अहो देवहूते ! ॥ ३।२९। १३ (१२)

---

(१) गीता ५।१२।—"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्" इति ।

सालोक्य सार्ष्टिसामीप्य सारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥१३॥

स एव भक्तियोगाख्य आत्यन्तिकमुदाहृतः ।
येनातिव्रज्य त्रिगुणान् मद्भावायोपपद्यते ॥१४॥

अयमात्यन्तिकः ततः परं प्रकारान्तराभावात् । अस्यैव भक्तियोग इत्याख्या इत्याह । (दीयमानमिति) । अन्वर्थत्वेन भक्तिशब्दस्यात्रैव मुख्यत्वात् इतरेषु हि फल एवानुरागो न विष्णौ । फललाभे भक्तित्यागात् । अस्याश्च शुद्धत्वं कर्मज्ञानाभ्यामसम्भिन्नत्वात् । अथास्य चतुर्दशविधस्यापि विहितभक्तियोगस्य फलमाह । येनेति । येन भक्तियोगेन । अतिव्रज्य अतीत्यत्रो गुणान् तामसत्वादि भावान् । मद्भावाय ब्रह्मसायुज्याय उपपद्यते योग्यो भवति । अधमभक्तियोगादुत्तमभक्तियोग्यत्वं अकाम्यमानमपि भवतोति सर्वेषामेकमेव फलम् । कालविलम्बकृतो विशेष इत्यर्थः । कपिलः देवहूतिम्प्रति ॥ ३।२९। १४ (१३)

एवं विहितां चतुर्दशभेदामुक्त्वा चतुर्भेदामविहितामाह । अविहितेति । कामोऽत्र परपरिगृहीताया अगूढाया वा स्त्रिया परपुरुषे दुरभिसन्धिः । द्वेषोऽप्रीतिः । भयं त्रासः । स्नेहः कामातिरिक्तः सन्निकर्षार्दिजः परस्परमकृत्रिमश्चित्तबन्धः । कामादित्यादि । यथाविहितया भक्त्येश्वरे मनोनिवेश्य केचित्तद्गतिं गच्छन्ति । तथाऽविहितेनापि कामादिना बहवो गता इत्यर्थः । तदुरुच्छेदमपि अघं हित्वा त्यक्त्वा । तत्र हेतुरीश्वर इति हेतुगर्भो निर्देशः । अयमर्थः । ईश्वरो हि कृपाशालित्वात् प्रभुत्वाच्च कथमेष्वनविष्टमन्तःकरणम् । अवेक्ष्य भक्तानां फलं प्रसूते । नतूपायविशेषेणैवेति गच्छन्तीत्यकृत्वा

19372

अविहिता चतुर्द्धा। कामजा। द्वेषजा। भयजा। स्नेहजा च॥

कामाद्द्वेषाद्भयात् स्नेहाद् यथाभक्त्येश्वरे मनः।
आवेश्य तदघं हित्वा बहवस्तद्गतिङ्गताः॥१४॥

इति मुक्ताफले विष्णुभक्तेर्लक्षणं भेदाश्च।

गता इति भूतत्वनिर्देशादविहितानुष्ठानेऽपि कृतार्थत्वमुक्तम्। तेनान्येषामिह प्रवृत्तिविशेष इत्यर्थः। अविहितत्वं तस्याः कामादेः स्वभावसिद्धत्वेन विधातुमशक्यत्वात्। अप्राप्तोह्यर्थो विधिगोचरः। (१) "विधिरत्यन्तमप्राप्तौ" इत्युक्तत्वात्। न च 'मनः कृष्णे निवेशयेदि'ति लिङ्प्रत्ययेन विहितत्वात् अविहितत्वं विप्रतिषिद्धमिति शङ्क्यम्। लिङ्निर्देशाविवक्षितत्वस्य दर्शितत्वात्। नापि बहवस्तद्गतिं गता इत्यर्थवादसामर्थ्यादत्रैव विधिकल्पनेति वाच्यम्। आर्थवादिकविधिकल्पनस्याप्यप्राप्तविषयत्वात्। न च गोप्यादिषु साध्यसाधनभावस्य दृष्टत्वाद् विहितत्वम्। न हि गोपीनामीश्वरत्वबोधेन भजनं किन्तु जारत्वेन भजमानानां तासां दैवात् तस्येश्वरत्वाज्ज्ञानलाभः। तदुक्तम् (२) "मेरं परमात्मानं जारबुद्ध्यापि सङ्गताः। जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धना" इति। ननु यथा गोपादीनां भगवत्सन्निधानात् कामाद्युदयस्तथा चाधुनिकेषु सन्निकर्षाभावेन कामाद्युदयाभावाद् व्यर्थः तदुपदेशः। नैवं इदानीमपि विष्णुस्थूलमूर्त्यधिष्ठातरि भगवति कामाद्यिन स्त्रीणां भावबन्धस्य दृश्यमान

---

(१) "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परसंख्येति गीयते॥" विधिरत्यन्तमप्राप्तौ, अर्थसंग्रहे च।

(२) भागवतं १०।२९।११ श्लोः।

भक्तिष्वधिकारिणः।

गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो! ॥१५॥

त्वात्। एवमन्यत्र। तस्मात् सिद्धमस्याभक्ते अविहितत्वम् ॥१४॥

इति कैवल्यदीपिकायां विष्णुभक्तेर्लक्षणं भेदाश्च ॥

एवं द्विरूपायामपि भक्तीनां स्वरूपं निष्कृष्य तास्वधिकारिणं कथयितुमाह। भक्तिष्विति। अवान्तरप्रकरणत्वाद् अथशब्दाभावः। तत्राप्युद्दिष्टक्रमानुसारेण विहिताधिकारिषु वाच्येषु प्रत्यासन्नत्वेन बुद्धिस्थत्वाद् अविहिताधिकारिण एव प्रथममाह। गोप्य इति॥ कामादिना गोप्यादयः। वयं नारदादयो भक्त्या विहितया तद्गतिं गता इति पूर्वेणैवान्वयः। नन्वत्र कामादीनां पञ्चानामुपलम्भात् कथमविहितायास्त्रातुर्विध्यम्? तत्राह। सम्बन्धादिति। सम्बन्धेन स्नेहोविशेषः। सम्यग् बन्धः चित्तस्य वशीकारो यस्मात् स्नेहात्। निरतिशयादित्यर्थः। यदीह सम्बन्धस्नेहयोर्भिन्नविषयत्वमुच्येत तदा सम्बन्धस्य वृष्णिषु पाण्डवेषु च कृतार्थत्वात् स्नेहग्रहणानर्थक्यं स्यात्। स्नेहादित्येवोच्यमाने स्नेहाभासेति प्रसक्तिः। तदर्थं सम्बन्धविशेषणम्। यद्वा स्नेहेनैव सम्बन्धोविशेषः। स्नेहोऽस्त्यतिशयेन यस्मिन् सम्बन्धे मत्वर्थीयाऽर्शआद्यच् प्रत्ययः (१)। सम्बन्धशब्दस्तु यथास्थिताथः। अक्रियमाणेऽपि स्नेहग्रहणे दुर्योधनादिषु सम्बन्धसद्भावादतिप्रसक्तिः। सम्बन्धादयः स्नेहः। तस्मादिति तु व्याख्याने सम्बन्धग्रहणानर्थक्यम्। कथञ्चित् सम्बन्धस्य सर्वत्रसम्भवात्। तस्मात् सम्बन्धस्नेहयोर्विशेषणविशेष्यभावेनैकत्वाद्युक्तम्। चातु-

---

(१) पाणिनि ५।२।१२७ सू०।

सम्बन्धात् स्नेहाद्दृष्णयो युयं चेत्येकभक्त्या
विहितया वयमित्यत्र विभागः।
निर्व्विण्णानां ज्ञानयोगोन्यासिनामिह कर्म्मसु।
तेष्वनिर्व्विण्णचित्तानां कर्म्मयोगस्तु कामिनाम् ॥१६॥
यदृच्छया मत्कथादौ जातः श्रद्धस्तु यः पुमान्।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥१७

र्विध्यमेवमेवैतत्। योहि मन्यते। भक्तिव्यतिरेकेण पञ्चानामत्रोक्तिरिति। तन्मते "तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा। स्नेहात् कामेन वा युञ्ज्यात् कथञ्चिद् नेच्यते पृथक्।" (१) इत्येतद् विरुध्यते। अत्र हि निर्वैरशब्देन भक्तिनिर्देशात् भक्तिसहितानामेव पञ्चानामुक्तिः। अथ एवेदमपि युज्यते। (२) "कतमोऽपि न वेणः स्यात् पञ्चानां पुरुषं प्रति" इति। तस्माद् युक्तं व्याख्यातमाचार्य्येण सम्बन्धात् स्नेहात्। वृष्णयोयूयञ्चेत्येकमित्यादिना। नारदः युधिष्ठिरम्॥ ७।१।३० (१५)

अथ विहितास्वधिकारिभेदमाह। निर्व्विण्णानामिति। न्यासिनां कर्म्मत्यागिनां मध्ये निर्व्विण्णानां वीतरागाणां (३) ज्ञानयोगः ज्ञानमिश्राभक्तिः। तेषु न्यासिषु मध्ये अनिर्व्विण्णानां कर्म्मसु सत्सु ज्ञानयोगः। (कर्म्मज्ञानयोगः)। त्यक्तकाम्यकर्म्मणामप्यतीव्रवैराग्यानां कर्म्मज्ञानमिश्रा भक्तिरित्यर्थः। कामिनां काम्यकर्मासक्तानां तु कर्म्मयोगः कर्म्ममिश्रैवेत्यर्थः। शुद्धभक्त्यधिकारिण

---

(१) भागवत ७।१।२५ श्लोः। (२) भागवत ७।१।२१ श्लोः।

(३) "वीतरागजन्मादर्शनात्" न्यायसूः ३।१।२५ सू०

—"वीतरागभयक्रोधस्थितधीर्मुनिरुच्यते" गीता २।५६ श्लोः।

NATIONAL ARCHIVES OF INDIA

यएतान् मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान्।
क्षुद्रान् कामांश्चलैः प्राणैर्जुषन्तः संसरन्ति ते ॥१८॥
स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्त्तितः।
विपर्य्ययस्तु दोषः स्याद् उभयोरेषनिश्चयः ॥१९॥

एवं सति कर्म्ममिश्रानव गृहस्थानाम्। कर्म्म-ज्ञानमिश्रास्तिस्रोवनस्थानाम्। ज्ञानमिश्रैका भिक्षू-

---

माह। यदृच्छयेति। यद्यपि निष्कामैः कर्म्मभिः शुद्धसत्त्वस्य भगवत्कथादौ श्रद्धास्यात् तथापि साधनसहस्रदुर्लभेति द्योतनाय यदृच्छयेत्युक्तम्। भक्तियोगः श्रद्धाभक्तिः। "स एव भक्तियोगाख्य" (१) इत्युक्तत्वात्॥ ११।२०।७८ (१६-१७)।

एवमधिकारि भेदं निरूप्य भक्तिहीनान्निन्दति। यएतानिति। मत्पथः मत्प्राप्त्युपायान्। भक्तीति। शुद्धाया भक्तिः। ज्ञानेति। ज्ञानमिश्रायाः। ज्ञानक्रियेति। कर्म्ममिश्राया ज्ञानक्रियेति। समस्तेन कर्म्मज्ञानमिश्रायाः क्षुद्रास्तुच्छाः। कामा विषयाः। जुषन्तः सेवमानाः। संसरन्ति। संसरणं जन्ममृत्यु दुखानुभवः ११।२१।१॥ (१८)

भजमानेष्वपि स्वाधिकारप्राप्त-भूमिकात्यागेन भूमिकोत्तराधिष्ठाने दोषमाह। स्वे स्व इति। उभौ गुणदोषौ। भगवान् उद्धवम् ११।१८।२। (१९)

अथाधिकारि प्रघट्टकार्थं सुखग्रहणाय स्पष्टयति एवमिति। एवं अधिकारिनिर्णये सति तत्रापि प्रकृत्यानुरूपेण सात्त्विक्यादिविभागः

---

(१) भागवतं ३।२८।१४ श्लोः।

णाम्। शुद्धैका सर्वेषाम्। उत्पन्नेऽनुरागे(ऽनु) उत्-पादोऽनु यथासम्भिश्राः। अविच्छिताश्चतस्रो गोप्या-दितुल्यानाम्। एवमष्टादशभेदाः।

इति श्रीवोपदेवकृते मुक्ताफले भक्तेरधिकारिभेद-निर्णयो नाम पञ्चमोऽध्यायः॥

स्वयमुद्धवः। गृहस्थेष्वपि निष्कामकर्म्मणां कर्म्मज्ञानमिश्रैव विदेह याज्ञवल्क्यादयो ह्यत्र निदर्शनम्। भिक्षवोऽत्रपरमहंसाः। अन्येषां नैष्ठिकब्रह्मचारिणाञ्च कर्म्मज्ञानमिश्रैव। शुद्धेति। पूर्व्वपूर्व्वभक्त्य-भ्यासबलात् रजस्तमः क्षये विशुद्धोर्ज्जिते सत्त्वोद्बले चेतसि भगवत्यनु-रागोदये प्रयत्नमन्तरेण शुद्धा भक्तिराविर्भवतीत्यभिप्रेत्याह। उत्पन्ने तु राग इत्यादि। ततः परमदूरविप्रकृष्टा मुक्तिः। गोप्यादितुल्या-नामिति। भगवति प्रभूतकामद्वेष-भयस्नेहासक्तानां अन्येषामि-त्यर्थः। तदेवं मिश्राख्ययोदश। शुद्धैका। अविच्छिताश्चतस्रः। इत्यभिप्रेत्य "भक्त्यष्टादशभेदया" (१) इति प्रागुक्तमित्याशयवानुप-संहरति एवमित्युक्तप्रकारेण॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां भक्तेर्लक्षण-भेदाधिकारि-निर्णयोनाम पञ्चमोऽध्यायः॥

---

(१) एतद् ग्रन्थे १।१ श्लोः।

NATIONAL ARCHIVES OF INDIA

षष्ठोऽध्यायः ।

अथ विष्णुभक्तिमहिमा ।

यावन्नजायेत परावरेऽस्मिन्,
विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत् स्थवीयः पुरुषस्य रूपम्
क्रियावसाने प्रयतः स्मरेत ॥१॥
नैष्कर्म्यमप्यच्युतभाववर्ज्जितम्,
न शोभते ज्ञानमलं निरञ्जनम् ।

एवं सपरिकरां भक्तिं निरूप्य तत्र मुमुक्षोः प्रवृत्तिविशेषार्थन्तन्माहात्म्यमाह । विष्णुभक्तीति । तत्रापष्टादशभिः पूर्व्वरङ्गं विधास्यन् प्रथमेन भक्तेर्गहन(त)त्वमाह । यावदिति । परावरे कार्य्यकारणरूपे अस्मिन् शास्त्रप्रसिद्धे विश्वेश्वरे विश्वस्य प्रथम कारणे द्रष्टरि साक्षित्वेन निष्पादितकार्य्ये भक्तियोगः । तल्लोलाश्रवणादिभिर्व्विना स्थातुमशक्तिः । स्थवीयः षोड़शकलं स्थूलत्वं नामरूपादिमत्त्वम् । तच्चान्यचान्यस्मादतिशयितमितीयसुन् प्रत्ययः (१)। क्रियावसाने षोड़शोपचारपूजानन्तरम् । प्रयतः पूतचित्तः । एवम्भूतो भक्तियोग इयता प्रबन्धेन निष्पाद्यत इत्यस्य सहसा दुर्लभत्वात् गहनत्वमित्यर्थः । शक्रः राजानम् ॥ २।२।१४ (१)

---

(१) पाणिनिः ५।३।५७ सूः ।

NATIONAL ARCHIVES OF INDIA

कुतः पुनः शश्वदभद्रमीश्वरे,
न चार्पितं कर्म्मयदप्रकारणम् ॥२॥
जुगुप्सितं धर्म्मकृतेऽनुशासतः,
स्वभावरक्तस्य महान् व्यतिक्रमः ।
यद्वाक्यतो धर्म्म इतीतरः स्थितो-
न मन्यते तस्य निवारणं जनः ॥३॥

अथ पञ्चभिः कर्म्मयोगाद् भक्तिमुत्कर्षयन् एकेन भक्तिहीनं कर्म्म-निन्दति (१)। नैष्कर्म्यमिति। नैष्कर्म्मं ज्ञानयोगः। अच्युतभावो विष्णुभक्तिः। कुतो न शोभते यतोऽज्ञानमलम्। अज्ञानं मलो दोषो यत्र तत्तथा। तत्कुतः? यतो निरञ्जनम्। निर्गतमञ्जनं व्रह्मणो व्यञ्जनं सत्वं यस्मात्तत्तथा। अयमर्थः। नैष्कर्म्मं हि ब्रह्मज्ञानं प्रधानम्। तच्च सत्त्वगुणे ब्रह्मण्युपासिते भवति। नेतरगुणे निर्गुणे वा। यदा भक्तिहीनं मनः नैष्कर्म्मग्रमपि न शोभते तदा कर्म्मपुनः कुत शोभते न कुतोऽपीत्यर्थः। यतःशश्वदभद्रम्। अनुष्ठाने फले चामङ्गलम्। नचेश्वरेर्पित 'नारायणायेति येनाभद्रत्वहानिः। ननु किं काम्यकर्म्म निन्द्यते नित्याह। यदप्रकारणं नित्यं नैमित्तिकञ्च कारणं कामना। नैष्कर्म्मग्रमपीत्यपिशब्दात् कर्म्मनिन्दायां तात्पर्य्यम्॥ १।५। १२। (२)।

सुमुक्षया जिज्ञासुमुपस्थितं शिष्यंप्रति भक्तेरन्यं वर्णयतो विश्रब्धवञ्चनदोषःस्यादित्याह। जुगुप्सितमिति। जुगुप्सितमधर्म्मसाधनम्। विषयसेवनम्। तत्रैव स्वभावेन रक्तस्य धर्म्मकृते धर्म्माय योऽनुशास्ति

---

(१) "भक्त्यात्वनन्यया शक्यः अहमेवंविधोऽर्जुन!"। गीता ११।५४।

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरे-
र्भजन्नपक्वोऽथ पतेत्ततो यदि।
यत्र क्व वा भद्रमभूदमुष्य किम्,
कोवार्थ आप्तोऽभजतां स्वधर्मतः ॥४॥
तस्यैव हेतोः प्रयतेत को विदो-
न लभ्यते यद् भ्रमतामुपर्य्यधः।

तस्य महान् व्यतिक्रमः। यस्याप्तत्वेन गृहीतस्य वाक्यादधर्मोऽपि धर्मोऽयमिति निश्चित्य स्थितः। इतरः प्राकृतोजनः। तस्यान्यथा ग्रहणस्य निवारणमन्यैः क्रियमाणं नमन्यते। तस्योपदेष्टुरयंदोषः। तदुक्तम् "कामिनो वर्णयन् कामान् लोभंलुब्धस्य वर्णयन्। नरः किंफलमाप्नोति कूपेऽन्धमिव पातयन्" इति १।५।१५ ॥ (३)

कश्चिद्विष्णु लीला श्रवणादेः साकारोपासनस्यान्तरङ्गस्य बहिरङ्गै-नाग्निहोत्रादिना व्यवधानंमाभूदिति स्वधर्मं त्यजति। कश्चित्तु नित्याकरणे प्रत्यवायभयादीश्वरार्पणेव्ययथावत्कृतं स्यादिति च भक्तियोगं त्यजति। तयोः प्रथमः श्रेयानिति आह। त्यक्त्वेति। अपक्वः साधकः। अन्त्यभूमिकामप्राप्तः। अथ नित्याकरण प्रत्यवायादनन्तरम्। ततः स्थानाद् यत्रक्वचन स्थाने यदिपतेत्। अमुष्यपतितस्य किमभद्रमभूत् न किमपीत्यर्थः। विष्णुभक्ति-वासना सद्भावादिति भावः। अभजता भक्तिहीनेन स्वधर्मतः कोवा अर्थःप्राप्तः नकोऽपीत्यर्थः। विषय सुखे प्राप्तेऽप्यनर्थत्वादित्यर्थः १।५।१७ ॥ (४)

अनर्थत्वमेवाह। तस्यैवेति। हेतोरिति। सप्तम्यर्थे षष्ठी। यत्सुखतः सुखं भ्रमद्भिर्नलभ्यते। कारकोऽस्य श्रेषत्वविवक्षायां

NATIONAL ARCHIVES OF INDIA

तल्लभ्यते दुःखवदन्यतः सुखम्,
कालेन सर्वत्र गभीररंहसा ॥५॥
नवैजनो जातु कथञ्चनाव्रजे-
न्मुकुन्दसेव्यन्यवदङ्गसंसृतिम् ।
स्मरन् मुकुन्दाङ्घ्र्युपगूहनं पुन-
र्विहातुमिच्छेन्नरस ग्रहोजनः ॥६॥
श्रेयः सृतिं भक्तिमुदस्य ते विभो !
क्लिश्यन्ति ये केवलबोधलब्धये ।

षष्ठी (१)। तदर्थं प्रयतेत। यत्त्वन्यतः विषयजन्यं सुखं तत् सर्व्वत्र लभ्यते। नहि दुखं केनापि प्रार्थ्यते। तत्र हेतुः काले नेति। गभीररंहसा दुर्लक्ष्यवेगेन १।५।१८ ॥ (५)

त्यक्त्वेति श्लोके स्वधर्म्मं त्यागेन भजतः पतनमभ्युपेत्याभद्रत्वहानिमुक्ता इदानीं तु पतनमेव नास्तीत्याह। नवै इति। कदाचित्। प्रमादेनापि संसृतिं नाव्रजेत। अन्यवद् भक्तिहीन स्वधर्म्मनिष्ठवत्। स यथा स्खलित स्थानाच् च्यवते। तथा नायमिति व्यतिरेके दृष्टान्त। अङ्ग अहो व्यास। उपगूहनं मानसालिङ्गनम्। रसे रसवति वस्तुनि ग्रहो आग्रहो यस्य स तथा अतएव कथञ्चिद्विस्मृतमपि भक्ति सुखं पुनर्भ्रंटिति स्मरति। अतएव न च्यवते। नारदो व्यासम् १।५।१९॥ (६)

अथ पञ्चभिर्ज्ञानयोगाद् भक्तिमुत्कर्षयन् तद्वैकेन भक्तिं विना आत्मसाक्षात्कारो नभवतीत्याह श्रेयः सृतिमिति। श्रेयः सृतिं मुक्ति-

---

(१) पाणिनिः २।३।५० सूः।

तेषामसौ क्लेशल एव शिष्यते,
नान्यद् यथा स्थूलतुषावघातिनाम् ॥७॥
अथापि ते देवपदाम्बुजद्वय-
प्रसादलेशानुगृहीत एव हि।
जानाति तत्त्वं भगवन्महिम्नो-
न चान्य एकोऽपि चिरं विचिन्वन् ॥८॥
ज्ञाने प्रयासमुदपास्य नमन्त एव,
जीवन्ति सन्मुखरितां भवदीयवार्त्ताम्।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभि-
र्ये प्रायशोऽजित-जितोऽप्यसितस्त्रिलोक्याम् ॥९॥

मार्गम्। उदस्य त्यक्त्वा क्लिश्यन्ति। श्रम दमादीन् अनुतिष्ठन्तः श्राम्यन्ति। केवलो बोधोब्रह्मज्ञानम्। क्लेशलः श्रम एव शिष्यते नतुज्ञानम् स्वार्थे लच् प्रत्ययः। मन्नखीयानामपि स्वार्थिकत्वं (भु) द्रुमादिवत् १०।१४।४॥ (७)

ननु ज्ञानानामेव कार्त्स्न्येनानुष्ठानाज् ज्ञानं भविष्यति। किं भक्त्या उपाधिज्ञानाङ्गानुष्ठानेऽपि हि निश्चितं भक्तिस्तु(स्मृ)ति मात्रम्। अन्यः भक्ति त्यागेनापि ज्ञानेप्सुः। "एकोविजनस्थः विचिन्वत् आत्मानं पश्यन्" अयमर्थः। तथा साकार भजनेऽनायासेन तत्त्वाधिगमो नैवं सहसा निराकारप्रवेशे। तस्य बह्वक्लेशसाध्यत्वात्। तदुक्तम् "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्"(१) इति। तस्मात् साधनान्तरे श्रमंहित्वा जिज्ञासुना भक्तिरेवानुसर्त्तव्येत्याह, ज्ञान

---

(१) गीता १२।५ श्लोः।

पुरेऽहभूमन् बहवोऽपि योगिन-
स्त्वदर्पितेहा निजकर्ममलब्धया ।
विबुध्यभक्त्यैव कथोपनीतया,
प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥१०॥
तत्तेऽनुकम्पां सुसमीक्षमाणो
भुञ्जान एवात्मकृतं विपाकम् ।
हृद्वाग्वपुर्भिर्विदधन्नमस्ते,
जीवेत यो मुक्तिपदे स दायभाक् ॥११॥

इति। ज्ञाने ज्ञानविषये प्रयासं श्रमाद्यनुष्ठानं हित्वा भवदीयानां विष्णुभक्तानां वार्त्तां कथां नम(य)न्तः (मानवाः) श्रवणादिभिरादृियमाणा एव जीवन्ति। नान्यत्कुर्व्वन्ति सन्तोमुखरिता यया वाचंयमा अपि सन्तः कथासौन्दर्य्याद्वाचालतां भजन्तीत्यर्थः। स्थानएवस्थिताः। ननुतीर्थविशेषे। श्रुतिः "कर्णवेदश्च श्रस
इति संशय वचन मुक्ति विशेषार्थम्। यद्यपि तमन्वै रजितः। तथापि कथारूप मर्म्म ज्ञानाद् भक्तैर्ज्जितो वशीकृतोऽसि ज्ञातोऽसीत्यर्थः १०।१४।३ ॥ (८)

उक्तेऽर्थे सदाचारं प्रमाणयति। पुरेति। हेभुमन् व्यापिन् योगिनोऽपि इत्यपि शब्दाद् योगेन विलम्बितां सिद्धिमालोक्य भक्तिश्रिता इत्युक्तम्। त्वदर्पितेति विशेषणत्रयेण तत्त्व वाङ्मनोभिरित्येतद्विवृतम्। तत्र ईहामनश्चेष्टेति। मनसो व्यापार उक्तः। निजकर्म्मेति कायस्य, कथेति वाचः। उपनीता निकटीकृता भक्त्यैव न साधनान्तरेण। विबुध्य ब्रह्माऽस्मीति निश्चयेन ज्ञात्वा।

NATIONAL ARCHIVES OF INDIA

केचित् केवलया भक्त्या वासुदेवपरायणाः।
अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥१२॥
न तथाह्यघवान् राजन् पूयेत तप आदिभिः।
यथा कृष्णार्पित-प्राणस्तत्पुरुष-निषेवया ॥१३॥

अञ्जः सुखेन परां गतिं यतः परा गम्यं नास्ति। ते अच्युतस्य गतिम्। अच्युतस्थानम् ॥ १०।१४।५ (१०)

एवं ज्ञानयोगादुत्कर्षमुक्त्वोपसंहरति। तदिति। तत् तस्मादात्म कृतं स्वकर्म्मविपाकं विविधफलं भुञ्जान एव नत्वन्यान्यारभमाणः। दायभागिति वाचोयुक्त्या मुक्तेर्दायवदनपह्नुवनीयत्वाद् आवश्यकत्व-मुक्तम्। ब्रह्मा श्रीकृष्णम् ॥ १०।१४।८ (११)

ननु किं भक्त्या प्रायश्चित्तैरेव पापक्षयात् सत्त्वशुद्धौ ज्ञानमुदेष्य-तीति चेत्तत्राह। केचिदिति। केचित् केवला प्रायश्चित्तनिरपेक्षा कार्त्स्न्येनेति। यथा प्रायश्चित्तभेदाद्भिन्न (भिन्न)पापक्षयः नैवमत्रे-त्युक्तम्। भक्तिस्त्वैकैवसर्वपापक्षये क्षमेत्यर्थः। तदेव दृष्टान्तेन व्यङ्क्त्या। नीहारं हिमम् ॥ ६।१।१५ (१२)

प्रायश्चित्तैः सावशेषाशुद्धिः (१)। भक्त्या तु पुनः पापप्रवृत्ति-निवारणादात्यन्तिकीत्याह। न तथेति। हे राजन् परीक्षित्! आदिशब्दाज् जनपदान् तीर्थादयः। प्राणो जीवनम्। तत्पुरुषेषु वैष्णवेषु निषेव्या। वैष्णवो हि मुख्यमधिष्ठानं विष्णोः। न चाधि-ष्ठानं विना भक्तिः ॥ ६।१।१६ (१३)

---

(१) "प्रायश्चित्तानि पापक्षयमात्रसाधनानि चान्द्रायणादीनि"। वेदान्तसारः १।१।४।
"प्रयतत्वादीपचितमशुभं नाशयतीति प्रायश्चित्तमिति हारीतः। पापक्षयमात्रसाधनं कर्म्म।

NATIONAL ARCHIVES OF INDIA

सधीचीनोद्यमं लोके पन्थाः क्षेमोऽकुतोभयः ।
सुशीलाः साधवो यत्र नारायण-परायणाः ॥१४॥
प्रायश्चित्तानि चीर्णानि नारायण पराङ्मुखम् ।
न निष्कृणन्ति राजेन्द्र ! सुराकुम्भमिवापगाः ॥१५॥
एतावतालमघ निर्हरणाय पुंसाम्,
संकीर्त्तनं भगवतो गुणकर्म्मनाम्नाम् ।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि,
नारायणेति म्रियमाण इयाय मुक्तिम् ॥१६॥

किञ्च प्रायश्चित्तेभ्यो भक्तिरविघ्नेत्याह । सधीचीन इति । सधीचीनः साधुः । यत्र भक्तिमार्गे साधवः साधन भूताः साधनवैगुण्यादिघ्नः ॥ ६।१।१७ (१४)

इतोऽपि तेभ्यो भक्तिर्विशिष्टेत्याह । प्राय इति । न निष्कृणन्ति । निश्चयेन न पवित्रयन्ति । नारायणपराङ्मुखं यथा स्यात्तथा चीर्णानि । अयमर्थः । भक्तिहीनैः प्रायश्चित्तैर्ज्ञानपूर्वेषु पापेषु न कर्म्मक्षयः । किन्तु व्यवहार्य्यत्वमात्रम । तत्सहितैस्तयैवाहयमपीति भक्तेर्विशिष्टम् । अतएव बहिः शुद्धिः प्रायश्चित्तैरन्तःशुद्धिस्तु भक्त्यैवेति दृष्टान्तेन व्यञ्जितम् ॥ ६।१।१८ (१५)

भक्त्यैव सर्व्वपापक्षय इत्यत्र निदर्शनमाह एतावतेति । गुणाः सौन्दर्य्यादयः । कर्म्माणि सृष्ट्यादीनि । नामानि नारायणादीनि एषामन्यतमस्य संकीर्त्तनं पापक्षयाय समर्थं इत्येतावताऽनेनैव ज्ञातव्यम् । यदजामिलोऽपि मुक्तिमवाप । अजामिं अकुलीनां स्त्रियं दासीं लाति गृह्णातीति अजामिलः । सोऽपीत्यपिशब्दार्थः । नारायणेति

प्रायेण वेद तदिदं न महाजनोऽयम्,
देव्याविमोहितमतिर्बतमाययालम्।
वार्त्तायां जड़ीकृतमतिर्मधुपुष्पितायाम्,
वैतानिके महतिकर्म्मणि युज्यमानः ॥१७॥
एवं विमृश्य सुधियो भगवत्यनन्ते,
सर्वात्मना विदधते खलु भावयोगम्।
ते मे न दण्डमर्हन्त्यथ यद्यमीषाम्,
स्यात्पातकं तदपि हन्त्युरुगायवादः ॥१८॥
ते देवसिद्धपरिगीत पवित्रगाथा-
ये साधवः समदृशो भगवत्प्रपन्नाः।

विक्रुश्य। सम्यक् कीर्त्तयित्वा तच्च पुत्रं विक्रुश्य न तु हरिम्। किञ्चाघवानशुचिरपि अस्वस्थचित्तोपि म्रियमानः॥ ६।३।२४ (१६)

नन्वेवञ्चेत् किमिति सर्वे भक्तिमेव नानुतिष्ठन्तीत्यत आह। प्रायेणेति। तदिदं भक्तिमाहात्म्यम्, मधुना मधुरेणार्थवादेन पुष्पिता फलाशामात्रदा न तु कदाचित् फलिना। वैतानिके (१)यज्ञसम्बन्धिनि महति बहुक्लेशे मायामोहितत्वेन अज्ञाजाड्यादेवधर्म्मेषु प्रवर्त्तन्ते। न तु भक्तावित्यर्थः॥ ६।३।२५ (१७)

अमोहितास्तु भक्तिमेवानुतिष्ठन्ति इत्याह, एवमिति। भावो भक्तिः। सेयमस्य अथापि प्रमादेनेत्यर्थः। उरुगायो विष्णुः। वादः संकीर्त्तनम्॥ ६।३।२६ (१८)

---

(१) आश्वलायन श्रौतसूत्रम् १।२।५।

NATIONAL ARCHIVES OF INDIA

तान्नोपसीदतहरेर्गदयाभिगुप्तान्,
नैषां वयं न च वयः प्रभवामदण्डे ॥१९॥
तानानयध्वमसतो विमुखान् मुकुन्द-
पादारविन्दमकरन्दरसादजस्रम् ।
निष्किञ्चनैः परमहंसकुलैरसङ्गै-
र्जुष्टाद् गृहे निरयवर्त्मनि बद्धतृष्णान् ॥२०॥
जिह्वानवक्ति भगवद्गुण नामधेयम्,
चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नोनमति यच्चिर एकदापि,
तानानयध्वमसतोऽकृत विष्णु कृत्यान् ॥२१॥
पानेन ते देव कथा सुधायाः,
प्रह्लद्व भक्त्या बिशदाशयाये ।

एवं पूर्वरङ्गं कृत्वा भक्तस्तुतिद्वारा भक्तिसामान्यं स्तौति । ते देवेति । नोपसीदत समीपं मागच्छत । भयं कालः ॥ ६।३।२७ (१९)

तर्हि कान् प्रति प्रतिगन्तव्यमिति तानाह । तानानयध्वमिति । तानसुभूतान् । असकृदत्रागमनात् । अनुभूतवाची तच्छब्दोयच्छब्दं मापेक्षत इति प्रागुक्तम् । अजस्रं जुष्टात् ॥ ६।३।२८ (२०)

वैमुख्यमेवदर्शयति । जिह्वेति । गुणं सत्त्वादिकमधिकृत्य प्रवृत्तं नाम यद् येषाम् । यमः स्व दूतान् ॥ ६।३।२९ (२१)

ननु सांख्ययोगाभ्यासबलाद् विविक्त प्रकृतिपुरुषस्य मृत्युभयं न भविष्यति किं भक्त्या तत्राह । द्वाभ्यां पानेनेति । प्रथमं कथा सुधा-पानम् । ततः कथानायके भक्तिः । ततोऽन्यत्र वैराग्यम् । ततः

वैराग्य सारं प्रति लभ्यबोधम्,
यथाञ्जसान्वीयु र्विकुण्ठधिषाग्रम् ॥२२॥
तथापरेचात्म समाधियोग-
बलेन जित्वा प्रकृतिं बलिष्ठाम्।
तामेव धीराः पुरुषं विशन्ति,
तेषां श्रमः स्यान्न तु सेवया ते ॥२३॥
अहो ममामो वितरन्त्यनुग्रहम्,
हरिं गुरुं यन्न भुजामधोश्वरम्।
स्वधर्म्मयोगेन यजन्ति मामका-
निरन्तरंक्षौणितले दृढ़व्रताः ॥२४॥

कथानायकस्वरूपज्ञानम्, ततः समाधिः। अविच्छिन्नचित्तत्वं तदर्थं योगः स्वपदः प्राप्तिः ॥३।५।४६। (२२)

यथायंमार्ग (१) स्वथाऽन्योऽपोत्याह। आत्मनः (स्वस्य समाधिरविच्छिन्नचित्तत्वं तदर्थं योगो) (२) यमनियमादिसेवा। तद्बलेन प्रकृतिजयः। ततस्तद्रहित पुरुषप्राप्तिः। अनयोर्मार्गयोर्म्मध्ये द्वितीयेश्रमः। तत्त्वानि विष्णुम् ॥३।५।४७। (२३)

एवं भक्ति सामान्यं स्तुत्वा तद्विशेषान् स्तुवानः सात्त्विकी स्त्रिस्त्रिभिः स्तौति। अहो इत्यादिना। अहो सभ्याः, मम पृथोः।

---

(१) "विचित्ते चेतसि विक्षेपोपसर्जनीभूतः समाधियोंग पक्षे भवर्त्तते।" अतो योगोऽविच्छिन्न चित्तत्वं सन्ततं भगवदेकनिष्ठा इत्यर्थः। योगदर्शन १।२। सू: भा:।

(२) अयमधिकपाठः कुत्रचित् पुस्तकेऽस्ति।

NATIONAL ARCHIVES OF INDIA

मन्ये धनाभिजनरूप तपः श्रुतौजः,
तेजः प्रभावः बलपौरुषबुद्धियोगाः ।
नाराधनाय हि भवन्ति परस्य पुंसो-
भक्त्या तुतोष भगवान् गजयूथपाय ॥२५॥
विप्राद् द्विषड्गुण युताद्दरविन्दनाभ-
पादारविन्दविमुखाच्छ्वपचं वरिष्ठम् ।
मन्ये तदर्पित मनोवचने हितार्थ-
प्राणं पुनाति सकुलं नतु भूरिमानः ॥२६॥

अमी मदेशवासिनो यजन्ति पूजयन्ति। अत्र स्वधर्मेति विधि सिद्धार्था स्तुता पृष्टः सभ्यान् ॥४।२१।३६। (२४)

अभिजनः कुलम्। तपः कृच्छ्रादि। श्रुतं शास्त्रम्। ओजोमनः पाटवम्। तेजः कान्तिः। प्रभावः शौर्यादिजा। बलं देहसौष्ठवम्। पौरुषं सम्भावना। बुद्धिर्मन्त्रशक्तिः। योग उद्यमः हि यस्मात् धनादिहीनाय गजयूथपाय गजेन्द्राय तुतोष। अत्रकर्म्मक्षयार्था। गजोहि कर्म्मक्षयार्थं स्तुतवान् ॥७।६।८। (२५)

द्विषड् द्वादशगुणाः। धनाभिजनादयः। यद्वा (१) "शमोदमस्तपशौचं क्षान्त्यार्ज्जव विरक्तता:। मौन-विज्ञान सन्तोष सत्यास्तिक्ये द्विषड्गुणाः।" इत्यत्रोक्ताः। षड्गुणा इति पाठे यजनादयः (२)। श्वपचमन्त्यजम्। ईहितं कायचेष्टा अर्थः पश्वादि।

---

(१) श्रीमद्भागवतमहापुराणस्य नवमाध्याय-दशमश्लोकटीकायां श्रीधरस्वामिधृत महाभारतवचनम्।

(२) "अध्ययनमध्यापनं यजनं याजनन्तथा।
दानं प्रतिग्रहश्चैव षट्कर्म्माण्यग्रजन्मनः॥" मनुः १।८८।

देवर्षि भूताप्त नृणां पितृणाम्,
न किङ्करोनाय ऋणी च राजन्!।
सर्व्वात्मना यः शरणं शरण्यम्,
गतो मुकुन्दं परिहृत्य कर्त्तम् ॥२७॥
स्वपाद् मूलं भजतः प्रियस्य,
त्यक्तान्यभावस्य हरिः परेशः।
विकर्म्म यच्चोत्पतितं कथञ्चि-
द्धुनोति सर्वं हृदि सन्निविष्टः ॥२८॥

प्राणोजीवनम्। स श्वपचः। भूरिमानो बहुगर्व्वो विप्रः। अनेन विष्णु प्रीत्यर्था। अत्रहि वाक्ये सर्व्वस्य भगवदर्पणे तात्पर्य्यम्। प्रह्लादोनृसिंहम् ॥७।९।१०। (२६)

अथ कर्म्मज्ञानमिश्राभ्यां स्तुवन् तत्कर्त्तृ विधि निषेधातीतनां दर्शयति। देवेति। आप्तनृणां अवसरे प्राप्तानामतिथीनात्यर्थः। वैश्वदेव (१) ब्रह्मयज्ञ भूतबल्यतिथि पूजा नित्य श्राद्धाख्य पञ्च महायज्ञ करनेन देवादीनां नायमधीनःनाप्यकरने ऋणी। सर्वात्मना सर्वभूतेषु भगवद्भाव दर्शनेन कर्त्रभेदं 'क्रतोच्छेदने' (२) इत्यस्वरूपम् ॥११।५।४१। (२७)

विध्यतीतनामुक्ता निषेधातीता माह। स्वपादेति। अन्यभावो भेदबुद्धिः। विकर्म्म पापम्। उत्पतितं अकस्माद्घटितम्।

---

(१) "पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः।
एतेपञ्चमहायज्ञा ब्रह्म यज्ञादि नामकाः॥" स्मृतिः। मनुः ३।७०।

(२) "क्रतोच्छेदने" इत्यस्याद्यातोः 'कर्त्तृम् इतिरूपम् (श्रीधरः)।

शुद्धि नृणां नतथेड्य दुराशयानाम्,
विद्याश्रुताध्ययनदानतपक्रियाभिः ।
सत्त्वात्मनामृषभ ते यशसि प्रवृद्ध-
तच्छ्रद्धया श्रवण संभृतया यथास्यात् ॥२९॥
तेनाधीत श्रुतिगणा नोपासीत महत्तमाः ।
अव्रतास्तप्त तपसः सत्सङ्गान्मामुपागताः ॥३०॥
बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः ।
प्रायःप्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥३१॥

कथञ्चित् प्रमादेन। ननु निष्कामस्य भजनं नतु पापक्षयार्थं इत्यत आह हृदिसन्निविष्ट इति। वसुसामर्थ्यादित्यर्थः। करभाजनः निमिम् ॥११।५।४२। (२८)

वसुसामर्थ्यमेवाह। शुद्धिरिति। हे ईड्यस्तुत्य! विद्या वैश्वानरादुपासना। (१) श्रुतं शास्त्रम्। अध्ययनं वेदाक्षर ग्रहणम् दानं हिरण्यादेः सत्पात्रेऽर्पणम्। जपोमन्त्राहुत्तिः। क्रिया अग्निहोत्रादि कर्म्म। सत्वात्मनां ऋषभः सात्त्विक श्रेष्ठः विशुद्धो-ज्जितं सत्त्वकारणात्। ब्रह्माद्याः श्लोकपाम् ॥१०।६।८। (२७)

उक्तेऽर्थे निदर्शन माह। तेनेति। ते दैत्यादयः। अव्रताश्च ते अतप्त तपस श्च। श्रीकृष्ण उद्धवम् ११।१२।७। (३०)

अस्याश्च प्रवृत्तायां विषयाद्यनर्थश्च शाम्यतीत्याह। बाध्येति द्वाभ्याम्। भस्मसात् करोति काष्ठेन. भस्मीकरोति। कृत्स्नशः स संस्काराणि ११।१४।१८। (३१)

---

(१) "सम्प्रतीमात्मानं वैश्वानरमध्येति" छान्दोग्ये ५।११।१।

यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात्।
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥३२॥
न साधयति मां योगो न साङ्ख्यं धर्म्म उद्धव!।
न स्वाध्यायस्तपस्त्यागो यथाभक्तिममोर्ज्जिता ॥३३॥
भक्त्याऽहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम्।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात् ॥३४॥

संसारसिन्धुमतिदुस्तरमुत्तितीर्षो-
र्नान्यः प्लवो भगवतः पुरुषोत्तमस्य।
लीलाकथा रस निषेवनमन्तरेण,
पुंसो भवेद्विविधदुःखदवार्दितस्य ॥३५॥

अथ ज्ञानमिश्रां त्रिभिः स्तौति। न साधयतीति। न साधयति न वशीकरोति। "योग श्चित्तवृत्तिनिरोधः" (१) साङ्ख्यं प्रकृति पुरुष-विवेकः (२) धर्म्मो नित्यनैमित्तिकानुष्ठानम्। स्वाध्यायो मन्त्रजपः (३) तपः पराकादि। त्यागः सन्यासः ऊर्ज्जिता उत्कटा: ११।१४।२०। (३२)

अपि सम्भवात्सम्भवादपि। सम्भूतमात्रापि पुनाति। किं पुनः प्रौढ़ा? श्वपाकोऽन्त्यजः। श्रीकृष्ण उद्धवः ११।१४।२१। (३३)

अन्तरेण विना। दावोवनवह्निः। अत्रोर्ज्जितैका लीलाकथेति

---

(१) योगदर्शनं १।१।१ सूः।

(२) सांख्यशास्त्रोक्त-प्रकृतेः सत्त्वाद्या पुरुषो भिन्नः पुरुषात् प्रकृतिर्भिन्नावित्येवं रूपो मोक्षोपायः सत्वपुरुषाख्यताख्याति र्ज्ञानमिति।

(३) "तपः स्वाध्यायेश्वर प्रणिधानानि नियमाः" इत्यत्र सूत्रे व्याख्यातम्
—"स्वाध्यायः प्रणवादि पवित्राणां मन्त्राणां जप" इति।

NATIONAL ARCHIVES OF INDIA

अकामः सर्वकामोवा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥३६॥
यत्पाद पङ्कज पलाश विलास भक्त्या,
कर्म्माशयं ग्रथित मुद्ग्रथयन्ति सन्तः ।
तद्वन्नरिक्तमतयो यतयोऽपिरुद्धः,
स्रोतो गणास्तमरणं भज वासुदेवम् ॥३७॥
नालं द्विजत्वं देवत्वं ऋषित्वं वाऽसुरात्मजाः ।
प्रीणनाय मुकुन्दस्य नवृत्तं न बहुज्ञता ॥३८॥

पदानि ज्ञानमित्यत्रैवोक्तम् । शुकः राजानम् १२।४।४०॥(३४-३५)

अतःपरं शुद्ध भक्तिं स्तौति । अकाम इति । अकामोभक्तिमात्रकामः । सर्वेषु उक्तानुक्तेषु कामोयस्य । भक्तियोगः श्रद्धा-भक्तिः परं पुरुषं विष्णुम् । शुकः राजानम् २।३।१०। (३६)

मुक्तिकामस्तु विशेषतो भक्तिमेवाद्रियते इत्याह । यत्पादेति । पलाशं दलम् । अङ्ग्त्वा अवयवः । विलासः सौन्दर्य्यम् । कर्म्माख्याशेरतेऽस्मिन्निति कर्म्माशय चित्तम् । ग्रथितं गुम्फितम् । उद्ग्रथयन्ति त्रैगुण्यं ग्रन्थिं भिन्दन्ति । रिक्तमतयः सोऽस्मीति भावुकाः । स्रोतः इन्द्रियम् । तद्वदुद्ग्रथयन्ति । यद्वत्पूर्णमतयः तं प्रपद्य (त्यजति) । भावुकाः । भेदभावनायां ज्ञेयं पृथगस्तीतिमतेः पूर्णत्वम् । अभेदभावनायान्तु ज्ञातैवेति रिक्तता । अरणं शरणम् । कुमाराः पृथुम् ४।२२।३८ ॥ (३७)

न चास्या मन्येष्विव वृत्तजात्याद्येव प्रयोजक मित्याह । नालमिति । हे असुरात्मजाः । दैत्यपुत्राः वृत्तं सदाचारः ७।८।५१ ॥ (३८)

न दानं न तपोनेज्या नशौचं न व्रतानिच।
प्रीयतेऽमलयाभक्त्या हरिरन्यद्विरम्बनम् ॥३९॥
रायः कलत्रं पशवः सुतादयो-
गृहामही कुञ्जर कोष भूतयः।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः,
कुर्व्वन्ति मर्त्तस्य कियत् प्रियञ्चलाः ॥४०॥
एवंहि लोकाः क्रतुभिः कृता अमी,
क्षयिष्णवः सातिशया न निर्म्मलाः।
तस्माद्दृष्ट श्रुत दूषणं परम्,
भक्त्योक्तयेशं भजतात्म लब्धये ॥४१॥
भयन्द्वितीयाभिनिवेशतः स्या-
दीशादपेतस्य विपर्य्ययोऽस्मृतिः।
तन्मायया तोबुध आभजेत्तम्,
भक्त्यैकयेशं गुरुदेवतात्मा ॥४२॥

व्रतानि हरिदिनोपवासादीनि। अमला शुद्धा तया। विडम्बनं जीवनाय नटनम ७।८।५२॥ (३९)

ननु किं भगवत् प्रीत्या दृष्ट श्रुतविषयैरेवात्म-प्रीतिर्भविष्यतीति तत्राह। द्राग्यां राय इति। रायोधनानि। भूतिरैश्वर्य्यम्। कामाः कामसाधनानि। क्षणभङ्गुरायुषोमर्त्यस्य। यतश्चलाश्चपलाः (परोत्कर्षादसूयकाः)। प्रह्लादः बालान् ७।८।३९।४०। (४०-४१)

एकया दृत्युक्तम्। तत्र हेतुमाह। भयमिति। द्वितीये

भक्तिःपरेशानुभवो विरक्ति-
रन्यत्र चैषत्रिकएककालः ।
प्रपद्यमानस्य यथाश्नतःस्यु-
स्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥४३॥
इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या,
भक्तिर्विरक्तिर्भगवत् प्रबोधः ।
भवन्ति वै भागवतस्य राजन्!
ततः परां शान्तिमुपैति साक्षात् ॥४४॥

देहादावभिनिवेशाद् यद्भयं तत्तन्मायया स्यात्। किन्तद्भयं इत्यत आह। ईश्वराद्युपाधिना पृथग्भूतस्य। विपर्ययः (१) संसारित्वम्। भ्रम ईश्वरत्वाप्तिश्चेति। गुरौ देवताबुद्धिः ११।२।३७॥ (४२)

यदाचैवं भक्तिर्जायते अतएव सगुणोपासनादुपास्य साक्षात्कारे सति तस्यात्मतया स्फुरणात्तत्रैवानुपाधिः प्र (प्रे) मा। अविद्यायाश्चावरकत्वनिवृत्तिरात्मकामता च भवतीत्याह। भक्तिरिति। भक्तिः प्रेमात्मिका। यया विष्णुं विना क्षण मपि न वितिष्ठते। तत आत्मनोब्रह्मत्वानुभवः। तस्य च परमानन्द रूपतया अन्यत्र विरक्तिः अरुचिः। प्रपद्यमानस्य भक्त्यङ्गवर्गेण भजतः। एककालत्वे दृष्टान्तः। यथेति। यया भुञ्जानस्य प्रतिग्रासं सुखलब्धिः क्षुधानिवृत्तयः स्युः ११।२।४२॥ (४३)

त्रिषु जातेषु कृतकृत्यतामाह। इतीति अनुवृत्तिरविच्छेदः। कविः निमिम् ११।२।४३॥ (४४)

---

(१) विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्, योगदर्शन १।१।७ सूः।

एवं सुरासुर गणाः समदेशकाल-
हेत्वर्थ कर्म्ममतयोऽपि फलेविकल्पाः।
तत्राञ्जसा सुरगणा फलमञ्जसापु-
र्यत्पादपङ्कज रजः श्रयणान्नदैत्याः ॥४५॥
यद्युज्यतेऽसु वसु कर्म्ममनो वचोभि-
र्देहात्मजादिषु नृभिस्तदसत् पृथक्त्वात्।
तैरेव सत्भवति यत्क्रियतेऽपृथक्त्वात्,
सर्वस्य तद्भवति मूल निषेचनं यत् ॥४६॥
न तेऽरविन्दाक्ष पदोपसर्पणम्,
मृषाभवेत् सर्व सुहृत् प्रियात्मनः।
यथेतरेषां पृथगात्मनां सता-
मदीदृशोयद्भवपुरद्भुतं हिनः ॥४७॥

भक्त्यैव फलावाप्ति रित्यत्र निदर्शनमाह। एवमिति। हेतुः साधनम्। अर्थः प्रयोजनम्। कर्म्म उद्यमः फले विकल्पाः। षष्ठीस्थाने योगेतिवद "संज्ञामामप्यलुक्" (१)। अञ्जसा अक्लेशेन ८।८।२८॥ (४५)

गृहे एवाशक्तस्यापि भगवत् प्रीत्या उपायमाह। यदिति। यज्युज्यते तत्परीभूयते। असवः प्राणाः। तैर्देहादिभिः अपृथक्-त्वात् सर्वात्मकविष्णाराधन बुद्धया। विष्णुर्हिमूलम्। शुक्रः ८।८।२९॥ (४६)

नच राजादिवद्विष्णु भजने फलविकल्प इत्याह, नते इति।

---

(१) पाणिनिः (८९५) ६।३।८।

तस्मिन् भवन्तावखिलात्महेतौ,
नारायणे कारण मर्त्यमूर्त्तौ ।
भावं विधत्ते नितरां महात्मन् !
किम्बावशिष्टं युवयोः सुकृत्यम् ॥४८॥
यत्पाद सेवाभिरुचिस्तपस्विना-
मशेषजन्मोपचितं मलंधियः ।
सद्यः क्षिणोत्यन्वह मेधती सती,
यथा पदाङ्गुष्ठ विनिःसृता सरित् ॥४९॥
नह्यतोऽन्यः शिवः पन्था विशतः संसृताविह ।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥५०॥

सुहृत्त्वात् प्रत्युपकारमुपकारकत्वं प्रियत्वात् सुखसेव्यत्वम् । आत्मत्वान्निकटस्थत्वम् । यदयस्मात् पृथगात्मनः भेदबुद्धीनामपि नोऽस्मान् । अद्भुतं मात्स्यं वपुरीदृशं दर्शितवानसि । वैवस्वतः भगवन्तम् ८।२४।३०॥ (४७)

भगवत् प्राकट्ये सति कृतार्थतामाह । अस्मिन्निति । आत्मतात्विकं रूपं हेतुर्निमित्तम् । कारणेन सृष्ट्यादिना मूर्त्तिर्यस्य । तत्वतस्त्वमूर्त्तिः । भावं चित्तवृत्तिम् । हे महात्मन् नन्द युवयोः । यशोदानन्दयोः । उद्धवः नन्दयशोदे १०।४६।३३॥ (४८)

तस्मिन्नित्युक्तं स क इति तमाह । यत्पादेति । तपस्विनां तापत्रयासन्तप्तानां मलं कालुष्यम् । क्षिणोति नाशयति । एध तोवर्द्धमाना विषय सौन्दर्य्यात् । सती साध्वी विषय विशुद्धत्वात् । पृथुः सभ्यान् प्रति ४।२१।३१॥ (४९)

शुद्धभक्तेरन्यमुपायं षड्भिर्निन्दति । वस्तुतो गर्हनत्वेन निरा-

धर्म्मः सत्यदयोपेतो विद्या वा तपसान्विता।
मद्भक्त्योपेतमात्मानं न सम्यक् प्रपुणाति हि ॥५१॥
कथं विना रोमहर्षं द्रवता चेतसा विना।
विनानन्दाश्रुकलया शुध्येद्भक्त्या विनाशयः ॥५२॥
यथाग्निना हेममलं जहाति-
ध्मातं पुनः स्वं भजते च रूपम्।
आत्मा च कर्म्मानुशयं विधूय,
मद्भक्तियोगेन भजत्यथोमाम् ॥५३॥
तापत्रयेणाभिहतस्य घोरे,
सन्तप्यमानस्य भवाध्वनीश।

कारत्वे प्रतिपत्तये पुनः पुनर्वचनं न दोषायेत्याह। न ह्यत इति। दृष्टश्रुत सुखरूपायां संसृतौ। भगवतीति विशेषणं विषय-सौन्दर्य्यादेव भक्ति निर्व्वाह इत्येवमर्थं शुकः २।२।३३॥ (५०)

धर्म्मइति। आत्मानश्चित्तम् ११।१४।२२॥ (५१)

पुतात्मनश्चिह्नान्याह। कथमिति। प्रत्येकं विनाशब्दस्य निर्देशाद् रोमहर्षादीनां प्रत्येकं शुद्धिहेतुत्वम् ११।१४।२३॥ (५२)

भक्त्या सवासन चित्तशुद्धिरिति। दृष्टान्तेन स्पष्टयति यथेति। ध्मातं तप्तम्। कर्म्मानुशयोलिङ्गदेहम् (१)। भक्तियोगेन भजतीति भक्तिरेव भजनहेतुर्नफलाकाङ्क्षेत्युक्तम्। अतोशुद्धयनन्तरम्। भगवान् उद्धवम् ११।१४।२५॥ (५३)

---

(१) ज्ञानेन्द्रियपञ्चकं कर्म्मेन्द्रियपञ्चकं पञ्चप्राणाः, बुद्धिमनसी एतैः संघटितो देहः।

NATIONAL ARCHIVES OF INDIA

पश्यामि नान्यच्छरणं तवाङ्घ्रि-
द्वन्द्वातपत्राद्ममाभिवर्षात् ॥५४॥
मन्येऽकुतश्चिद् भयम च्युतस्य,
पादाम्बुजोपासन मत्र नित्यम् ।
उद्विग्नबुद्धेरसदात्मभावाद्-
विश्वात्मना यत्र निवर्त्तते भीः ॥५५॥
राजन् पतिर्गुरुरलं भवतां यदूनाम्,
दैवं प्रियः कुलपतिः क्वच किङ्करोवः ।
अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो-
मुक्तिं ददाति कर्हिचित्स्म नभक्तियोगम् ॥५६॥

शरणमाश्रयः अमृतं सुधा मोक्षश्च । उद्धवः श्रीकृष्णम् ११।१८।-८॥ (५४)

मन्ये इति । असति देहादावात्मभावादुद्वेगः । नन्वमरत्वम व्यकुतश्चिद्भयं नेत्याह । विश्वात्मना कार्त्स्न्येन, अमरत्वन्तुसावधिक-मित्यर्थः । "आभूत संप्लवं स्थानममृतत्वञ्च भाप्यते" इति वचनात् कविः निमिम् ११।२।३३॥ (५५)

शुद्ध भक्तिर्मुक्तेरपिदुर्लभा इत्याह, राजन्निति । राजन् हे परीक्षित् । पतिः दृष्टोपद्रवनिवारणात् । गुरुर्हितोपदेशात् । भवतां पाण्डवानाम् । दैवमदृष्टोपद्रव निवारणात् । प्रियः प्रीति-जननात् । कुलपतिः पोषणात् । किङ्करः आज्ञाकरणात् । अतः कारणादेवमस्तु । मुकुन्दोमुक्तिं ददाति नतु भक्तिम् । भक्तिदाने हि भक्तस्य सम्विधानं कार्य्यं न मुक्तिदाने । शुकः ५।६।१८॥ (५६)

NATIONAL ARCHIVES OF INDIA

यस्यास्ति भक्तिर्भगवत्यकिञ्चना,
सर्वैर्गुणैस्तत्र समासते सुराः।
हरावभक्तस्य कुतोमहद्गुणाः,
मनोरथेनासति धावतो बहिः ॥५७॥
तस्माद्रजोराग विषादमन्यु-
र्मानस्पृहा भयदैन्याधि मूलम्।
हित्वा गृहं संसृति चक्रबालम्,
नृसिंहपादं भजताकुतोभयम् ॥५८॥
न युज्यमानयाभक्त्या भगवत्यखिलात्मनि।
सदृशोऽस्ति शिवः पन्थायोगिनां ब्रह्मसिद्धये ॥५९॥
इति वोपदेव-विरचिते मुक्ताफले भक्तिमहिमा-
प्रकरणम्। षष्ठोऽध्यायः ॥

भजमानः पुमान् देवैरप्यास्रियत इत्याह। यस्येति। आकिञ्चना शुद्धा सुराः इन्द्रादयः। गुणा ऐश्वर्य्यादयः। गुणैः समासते। गुणद्वारा सम्यग्वसन्तीत्यर्थः। महतामिन्द्रादीनां गुणा महद्गुणाः असति विषये ५।१८।१२॥ (५७)

शुद्ध भक्तिं स्तुत्वोपसंहरति तस्मादिति। रजो रजःकार्य्यं तृष्णादि। रागः स्नेहपाशः। मन्युः क्रोधः मनोदर्पः। आधिर्मनोव्यथा। संसृतीनां दुरव (स्व, य) स्थानाम्। चक्रबालं मण्डलम् यस्मिन् गृहे। प्रह्लादः नृसिंहम् ५।१८।१४॥ (५८)

किं बहुना भक्तिमेवैकामाद्रियध्वमिति आह, नेति। युज्यमाना क्रियमाणा। ब्रह्मसिद्धिर्मोक्षः। कपिलः देवहूतिम् ३।२५।१८॥ (५९)

इति हेमाद्रिकृतायां कैवल्यदीपिकायां भक्तिमहिमाप्रकरणम्।
षष्ठोऽध्यायः ॥

NATIONAL ARCHIVES OF INDIA

सप्तमोऽध्यायः ।

अथ विष्णुभक्ताङ्गवर्गप्रकरणम् ।

तत्र विष्णुभक्ताङ्गवर्गलक्षणं भेदाश्च ॥

कायेन वाचा मनसेन्द्रियैर्वा,
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोति यद्यत् सकलं परस्मै,
नारायणायेति समर्पयेत्तत् ॥१॥

तदेवं भक्ति प्रकरणमुपायत्वेनेत्युक्तम् । तत्रेतिकर्त्तव्यतां वक्तुमिदमारभ्यते । अथेति । तत्राप्यङ्ग सामान्यं लक्षयति । कायेनेति । मनसा संशयः । इन्द्रियैश्चक्षुरादिभिरुपोपलम्भादि बुद्ध्यानिश्चयः आत्मना अहङ्कारेणाभिमानः । वाशब्दश्चार्थे । तेनानुसृतस्य सङ्कल्प हेतोर्ममहत्तत्त्वस्य समुच्चयः । इन्द्रियैरित्येव सिद्धे कायादुक्तिरेकैक व्यापारस्याप्यङ्गत्वार्थम् । अतएव तुल्य कक्षाणां विकल्पार्थः प्रथमो वाशब्दः । यद् यदिति । वोप्सया सर्वस्य यावद्देहं क्रियमाणस्यार्पणमित्युक्तम् । तत् किं निषिद्ध मप्यनुमतं नेत्याह । स्वभावमिति । स्वस्य भाव्यते प्राप्यते शास्त्रेनेति स्वभावम् । स्वविहितमित्यर्थः । तथापि किं विशिष्ट निस्तारबुद्ध्यार्पयेद् नेत्याह । अनुसृत इति । आत्मेश्वरयोः स्व स्वामि भावानुसन्धान मनुसरणं परस्मै भगवदादिरूपाय । इति शब्दः प्रकारे । तेनेदं नारायणायेत्यनेन प्रकारेणार्पयेत्, नान्यथेत्यर्थः । अत्रहि चतुर्थी निर्देशात्तादर्थ्याऽवगमात् सङ्कल्प मित्यन्वयः । ततश्च भगवदर्थत्वेन सर्वस्य सत्कर्मणः करणं भक्ताङ्गमिति लक्षणार्थः । कविः निमिम् ११।२।३६ ॥ (१)

NATIONAL ARCHIVES OF INDIA

स एकोनविंशतिधा। षड्विंशवर्गः। विंशद्वर्गः। षड्विंशतिवर्गः। पञ्चविंशतिवर्गः। चतुर्विंशतिवर्गः। त्रिंशतिवर्गः। एकोनविंशतिवर्गः। अष्टादशवर्गः। पञ्चदशवर्गः। त्रयोदशवर्गः। द्वादशवर्गः। एकादशवर्गः। दशवर्गः। नववर्गः। सप्तवर्गः। षड्वर्गः। पञ्चवर्गः। चतुर्वर्गः। त्रिवर्गः। एते त्रयः यथोत्तरमन्तरङ्गाः॥

तत्र षड्विंशवर्गः।

तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम्॥२॥

एवं वर्गलक्षणमुक्त्वा तद्भेदान् वक्तुमाह। स इति। स वर्गः। नन्वे कोन विंशती वर्गेषु किमुत्तरोत्तरस्य पूर्व्व पूर्व्वबाधकत्वं किम्वा यवव्रीहिवत् सर्वेषां विकल्पः। आद्ये सर्वबाधकस्यैव कथनेन चरितार्थत्वाद् अन्योक्त्यानर्थक्यम्। द्वितीये विषमशिष्टा विकल्पानुपपत्तिरितिचेत्तत्राह। एते चेति। अन्तरङ्गत्वञ्च पूर्व्व पूर्व्वस्माद्वर्गाद् उत्तरोत्तरस्मिन् सारभूतानामङ्गानां उपलम्भात्। वस्तुतस्त्वेकस्मिन्नेव सर्व्व व (स) ङ्गावादेकवर्गत्वम्। अवस्थाभेदेन तत्तदङ्ग परित्यागाद् अनेकत्वम्। तत्र षड्विंशवर्गं दर्शयन् द्वाभ्यां पूर्व्वरङ्गमाह। तस्मादिति। तस्माल्लोकद्वयस्यापि सदोषत्वात् प्रपद्येत निर्विण्णः "समित् पाणिराचार्य्यमुपनिष्ठेत्" (१) श्रेय उत्तमम्। श्रेयःसु सत्कर्म्मेसु मध्ये उत्तमं भक्त्यङ्गाख्यम्। शाब्दे ब्रह्मणि वेद

---

(१) मुण्डकोपनिषत् १।२।१२॥

तत्र भागवतान् धर्म्मान् शिक्षेद् गुर्वात्म दैवतः ।
अमायया ऽनुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥३॥
सर्व्वतो मनसोऽसङ्गमादौ सङ्गञ्च साधुषु ।
दयां मैत्रीं प्रश्रयञ्च भूतेष्वद्धा यथोचितम् ॥४॥
शौचं तपस्तितिक्षाञ्च मौनं स्वाध्यायमार्ज्जवम् ।
ब्रह्मचर्य्यमहिंसाञ्च समत्वं द्वन्द्वसंज्ञयोः ॥५॥

तात्पर्य्य विचारेण । परे चापरोक्षानुभवेन, निष्णातं निष्ठाप्राप्तम् । उपशमाश्रयमित्यनेनैव शिष्यवात्सल्यादयोऽन्येऽपिगुणाः ज्ञेयाः ११।३।२१॥ (२)

तत्रेति । तत्रगुरुकुले । गुरुरेव आत्मा दैवतञ्च यस्य । आत्मवद्देवञ्चगुरुं संस्कुर्य्यादित्यर्थः । गुरु भक्त्याहि सर्वं सफलं, तदुक्तम् । "यस्यदेवे पराभक्तिर्यथा देवे तथागुरौ । तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मन" इति । माया कपटम् । अनुवृत्तिः शुश्रूषा । यै धर्म्मैर्हरिस्तुष्येत । ननु कथं ज्ञेया हरि तुष्टिः । तत्राह । आत्मातुष्येत् । आत्मतुष्टया विष्णु-तुष्टिरनुमेया । विष्णुात्मनोर्बिम्बप्रतिबिम्बत्वादित्यर्थः । ननु हरौ तुष्टे किं तत्राह । आत्मदइति ११।३।२२॥ (३)

अथाङ्गान्याह । सर्वत इति । सर्वत्र (तः) इहामुत्र भोगेषु । असङ्गं अनासक्तिम् (अ) शिक्षेदिति सर्वैर्द्वितीयान्तैः सम्बध्यते । सङ्गः सान्निध्यं यथोचितमिति क्रमाद् दुःखि सुखि पुण्यवत्सु ददातीति त्रीणि । प्रश्रयोविनयः । अद्धा तत्त्वतः ११।३।२३॥ (४)

शौचमिति । शौचं मृज्जलाद्यैर्बाह्यम् । रागद्वेषादिराहित्यमान्तरम् । तपः एकादश्युपवासादि स्वधर्म्मनिष्ठा वा ॥ मौनं अभा-

NATIONAL ARCHIVES OF INDIA

सर्वचात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम्।
विविक्तचीरवसनं सन्तोषं येन केनचित् ॥६॥
श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि।
मनो वाक्कर्म्मदण्डञ्च सत्यं शमदमावपि ॥७॥
श्रवणं कीर्त्तनं ध्यानं हरेरद्भूतकर्म्मणः।
जन्मकर्म्मगुणानाञ्च तदर्थेऽखिलचेष्टितम् ॥८॥
दृष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम्।
दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम् ॥९॥

षणं मितभाषणं वा।—क्षमा स्वाध्यायोद्दादशाक्षरादि मन्त्र जपः। आर्জ्जवं सरलता—ब्रह्मचर्य्यं यस्य यथायोग्यम्। गृह स्थानां ऋतौ स्वदारगमनम्। अन्येषान्तु "स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रिया निर्व्वृतिरेवच" इति। अष्टाङ्ग मैथुनं वर्জ्जं ब्रह्मचर्य्यम्। अहिंसा द्रोहाद्यकरणम्। इन्द्वसंज्ञयो र्मानापमानादिकयोः समत्वं तुल्य बुद्धित्वम्, ११।३।२४॥ (५)

सर्व्वेति। सर्वभूतेषु आत्मनः आत्मन ईश्वरत्वे नानुवृत्त्या दर्शनम्। कैवल्यमेकाकिता अनिकेततां स्थानाभिमानराहित्यम्। विविक्त चीरवसनं पूतवस्त्रखण्डपरिधानम्। यदृच्छालब्धेनालं बुद्धिः सन्तोषः ११।३।२५॥ (६-७)

श्रद्धामिति भगवत् प्रतिपादके शास्त्रे श्रद्धाम्। अन्यप्रतिपादकेचानिन्दा मित्येकम्। दण्ड दुःसङ्कल्प पारुष्यचापलानां त्यागः। सत्यं मृषावादवर्জ्जनम्। शमः विषये भ्योबुद्धेरुपरतिः॥ दमश्चक्षुरादीनाम्। च शब्दो भिन्नक्रमः ११।३।२६॥ (८)

एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम् ।
परिचर्य्याश्चोभयत्र महत्सु नृषु साधुषु ॥१०॥
परस्परानुकथनं पावनं भगवद्यशः ।
मिथोरतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥११॥
स्मरन्तः स्मारयन्तश्च मिथोऽघौघ हरंहरिम् ।
भक्त्या सञ्जातया भक्त्या बिभर्त्युत्पुलकां तनुम् ॥१२॥

श्रवणमिति । हरेर्जन्मादीनां श्रवणादित्रयम् तदर्थे हर्य्यर्थे सर्व्वचेष्टा ११।३।२७॥ (९)

इष्टमिति भावे क्तः । इत्तमाचारतः प्राप्तस्याचरणम् । षष्ठी विषये द्वितीया । इज्यादेर्द्वारादेश्च तादर्थ्यम् । परस्मै इन्द्रादये सनिवेदनं समर्पणम्, यत्तस्यापि तादर्थ्यं शिक्षेत् । अत्राखिल चेष्टित शब्देन निर्देशात् । एकैकत्वं दारादीनां तादर्थ्यं शुश्रूषया ११।३।२८॥ (१०)

एवमिति । एवं यथाकृष्णेतथेत्यर्थः । कृष्ण आत्मा नाथो-धीर्येषां तेषु । सौहृदं अनिमित्तं बन्धुत्वम् । मनुष्येष्विति जाति विशेष विवक्षार्थम् ॥ किन्तदुभयं तदाह । महत्स्विति । महान्त उत्कृष्टाः साधवः सदाचाराः उभय ग्रहणमभेदेन परिचर्य्यार्थम् ११।३।२९॥ (११)

परस्परेति । अनु अनुवृत्त्या विच्छेदेन कथनं शिक्षेत् । किम्भूतं कथनं भगद्यशः भगवतोयशो यस्मिन् अनुकथने । किमिति परस्परं तत्राह मिथ इति । रतिर्भगवति इत्यर्थात्सिद्धम् । तुष्टिः सुखं । निवृत्तिरित्यर्थसिद्धम् । तुष्टिः सुखम् । निवृत्ति स्तापापगम इति द्वयमात्मनः । एतत्त्रयं परस्पर मनुकथनादे स्यात् । नैकाकोतयेति वक्तुं मिथः शब्दत्रयम् ११।३।३०॥ (१२)

NATIONAL ARCHIVES OF INDIA

क्वचिद्रुदन्त्यच्युतचिन्तया क्वचित्,
हसन्ति नन्दन्ति वदन्त्यलौकिकाः।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजम्,
भवन्ति तूष्णीं परमेत्यनिर्वृताः ॥१३॥
इति भागवतान् धर्म्मान् शिक्षन् भक्त्या तदुत्थया।
नारायण परोमाया मञ्जु स्तरति दुस्तराम् ॥१४॥
षट्विंशद्वर्गः।
सत्यं दया तपः शौचं तितिक्षेक्षा (ज्या) शमोदमः।
अहिंसा ब्रह्मचर्य्यञ्च त्यागः स्वाध्याय आर्ज्जवम् ॥१५॥

स्मरन्त इति। स्मरन्तः स्वयम् ११।३।३१॥ (१२)

यतोऽन्येषां अथषट्विंश वर्गानुष्ठानस्य फलमाह। भक्त्येति भक्तिरङ्गवर्ग भजनम्। तथा भक्तिः प्रेम। उत्पन्न भक्तेश्चिह्नान्याह। विभ्रतीति। उत्पुलकां उद्भूतरोमाञ्चाम्। क्वचिदिति रुदन्ति आनन्दाश्रूणि विमुञ्चन्ति। नन्दन्ति सुखमनुभवन्ति। अलौकिकाः लोकव्याहृत्ताः। अजं विष्णुम्। अनुशीलयन्ति तल्लीलामभिनयन्ति। अतः परं विष्णुं एत्य साक्षात्कृत्य तूष्णीं भवन्ति। उपशाम्यन्ति। यतोनिहृत्ताः समाप्तपरमानन्दाः ११।३।३२॥ (१३)

कुतः पुनरेषामङ्गत्व मित्यत आह इतीति। तदुत्थया भागवत धर्म्मोत्थया भक्ते रङ्गत्वे लिङ्गमितिभावः। प्रबुद्धोनिमिम्। ११।३।३३॥ (१४)

त्रिंशद्वर्गमाह। सत्यमिति। इज्या भगवदुद्देशेन हविस्त्यागः त्यागः काम्यनिषिद्धकर्म्मणाम् ७।११।८॥ (१५)

NATIONAL ARCHIVES OF INDIA

सन्तोषः समदृक् सेवा ग्राम्येहोपरमः शनैः ।
नृणां विपर्य्यये हेत्ता मौनमात्म विमर्षणम् ॥१६॥
अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः ।
तेष्वात्म देवताबुद्धिः सुतरां नृषु पाण्डव ! ॥१७॥
श्रवणं कीर्त्तनं चास्य स्मरणं महतां गतेः ।
सेवेज्या-वनतिर्दास्यं सख्यमात्मसमर्पणम् ॥१८॥
नृणामयं परोधर्म्मः सर्व्वेषां समुदाहृतः ।
त्रिंशल्लक्षणवान् राजन् सर्वात्मायेनतुष्यति ॥१९॥

सन्तोष इति । समदृशः रिपुमित्रोदासीनेषु तुल्य बुद्धयः । ग्राम्येहा विषयार्थं चेष्टा, नृणां विपर्ययेहेत्ता । स्वस्यार्थमिति । सुखार्थं प्रयत्नस्य दुःखफलत्वावेक्षणं । आत्मनोऽसङ्गोदासीनतयानुसन्धानम् । अन्नाद्यं भक्ष्य भोज्यादि । आदिशब्दात् फल मूलादेश्च । भूतेभ्यःखगकातिथिजलचरादिभ्यो गृहस्थाद्यैर्विभागः । यथार्हत इति । यस्य यत्संविभागेऽर्हता तथा तस्येत्यर्थः । तेषु भूतेषु । आत्मनः ईश्वरत्वेन ज्ञानम् । विशेषतोमनुष्येषु । ज्ञानाधिक्यात् । हे पाण्डव युधिष्ठिर ! । अस्येत्यभिनयेन पुरतः स्थं श्रीकृष्णम् निर्दिशति । महतां गतेर्गम्यस्य सेवा चित्तानुवृत्तिः । साचास्य श्रुति स्मृतिरूपज्ञानलङ्घनात् पूज्यापूजा । अवनतिः । प्रणामः । दास्यं किङ्करत्वम् । सख्यम् । "अहितात् प्रतिषेधश्च हिते चैव प्रवर्त्तनम् । व्यसनेचापरित्यागः त्रिविधं सखि-लक्षणम् ॥" इत्यत्रोक्तस्य सखिधर्म्मस्य भगवत्तत्वेन भावनम् । अन्यानि तु स्वगतानि । आत्मसमर्पणं स्वशरीरेऽस्य स्वातन्त्र्यलक्षणसङ्गम् ॥ येन धर्म्मेण साक्षादधर्म्मान्तरानुष्ठानाद्यव-

हंसे गुरौमयि भक्त्या ऽनुवृत्त्या,
विपणायाद्वन्द्वतितिक्षया च ।
सर्वत्र जन्तोर्व्यसनावगत्या,
जिज्ञासया तपसेहा निवृत्त्या ॥२०॥
मत्कर्म्मभिर्मत्कथयाच नित्यम्,
महेव सङ्गाद् गुणकीर्त्तनान्मे ।
निर्वैरसाम्योपशमेन पुत्त्राः !
जिहासया देहगेहात्म बुद्धेः ॥२१॥
अध्यात्मयोगेन विविक्त सेवया,
प्राणेन्द्रियात्माभि जयेन सश्रक् ।
सत्श्रद्धया ब्रह्मचर्य्येणशश्वत्,
असम्प्रमादेन यमेन वाचाम् ॥२२॥

धानेन। शेषं प्राग्वत्। नारदः युधिष्ठिरम् ७।१।८-१०-११-१२ (१६-१७-१८-१९)

षड्विंशतिवर्गमाह। हंसेत्यादि। अनुवृत्तिः परिचर्य्या। सा च भक्त्या तात्पर्य्येण। नतु यथाकथञ्चित्। हंसे गृहमार्ज्जनादिका (१) गुरौ लब्धार्पणादिका (२) विपणा दृष्ट श्रुत विषये वैपणाम् (३) द्वन्द्वं शीतोष्णादि (४) सर्व्वत्र ब्रह्मपदादिषु व्यसनं कालभयम् (५) जिज्ञासा आत्मनः (६) तपः अयाचितादि (७) दृष्टानिवृत्ति वर्जं चेष्टा (यः) त्यागः (८) मत्कर्म्मभिर्मदर्पित कर्म्मभिः (९) मत्कथाकथन मन्यं प्रति (१०) अहं देवोयेषां तेमहे वा विष्णुभक्ताः (११) कीर्त्तनं एकाकिना (१२) निर्वैरमहिंसा (१३) साम्यं

सर्वं त्व मद्भाव विचक्षणेन,
ज्ञानेन विज्ञान विराजितेन।
योगेन धृत्युद्दमसत्त्वयुक्तो,
लिङ्गं व्यपोहेत् कुशलोऽहमाख्यम् ॥२३॥
स्वधर्माचरणं शक्त्या विधर्म्माच्च निवर्त्तनम्,
दैवाल्लब्धेन सन्तोष आत्मविचरणार्ज्जनम् ॥२४॥

शत्रुमित्रोदासीनेषु तुल्यबुद्धिता (१४) उपशमो निरभिमानता (१५) हे पुत्रा देहेगृहेचाहंममेतिबुद्धेर्हानिच्छया (१६) अध्यात्मयोगो-मोक्षशास्त्राभ्यासः (१७) विविक्तमेकान्तः (१८) प्राणादीनामभिजयः क्रमात् प्राणायाम प्रत्याहार धारणादिभिः। अत्र प्राणायामादि बहुत्वेऽप्यभिजयस्यैकत्वादेकत्वम् (१९) सत्सुशास्त्रसम्यग् बुद्धिः (२०) ब्रह्मचर्य्यं प्राग्वत् (२१) समं प्रमादोभक्तिसाधनानामभावना (२२) वाचंयमोमौनम् (२३) सर्व्वचस्थिरचरेषु मद् भावो मत् सत्ता विज्ञायते दृश्यते येनतत्तथा। "सर्व्वं खल्विदं ब्रह्मो" (१) त्यादुपनिषदुत्थोबोधोज्ञानम् (२४) अनुभवो विज्ञानम् (२५) विराजित मुपहृंहितम्। योगोनिरोधसमाधिः (२६) धृतिः धैर्य्यफलसिद्धौ विकल्पनाभावः। उद्यमोऽनलसत्वम्। सत्वं क्लेश सहनत्वम्। एतान्यधिकारि-विशेषणत्वादुपाङ्गानि। नत्वङ्गानि, अतएवैषां द्वतीययापञ्चम्यावाननिर्द्देशः। कुशलः प्रत्यहं विशेषद्रष्टुं निपुणः। लिङ्गदेहंव्यपोहेद् मोक्तुंक्षमः। अहमहङ्कारः। ऋषभः पुत्रान् ५।५।१०।११।१२।१३॥ (२०-२१-२२-२३)

पञ्चविंश वर्गमाह। स्वधर्म्मेति। विधर्म्मोनिषिद्धः परधर्म्मश्च।

---

(१) छान्दोग्य ३।१४।१

ग्राम्यधर्म्म निवृत्तिश्च मोक्षधर्म्म रतिस्तथा।
मितमेध्याशनं शश्वद्विविक्तक्षेमसेवनम् ॥२५॥
अहिंसा सत्यमस्तेयं यावदर्थ परिग्रहः।
ब्रह्मचर्य्यं तपःशौचं स्वाध्यायः पुरुषार्च्चनम् ॥२६॥
मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः।
प्रत्याहारश्चेन्द्रियाणां विषयान् मनसाहृदि ॥२७॥
स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम्,
वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ॥२८॥
एतैरन्यैश्च पथिभिर्मनोदुष्टमसत्पथम्,
बुद्धा युञ्जीतशनकैर्ज्जित प्राणोह्यतन्द्रितः ॥२९॥

ग्राम्यधर्म्मस्त्रीद्युतादि सेवा। मेध्यं भिक्षा हविष्यादि, मितन्तु (१) "अर्द्धं सव्यञ्जनान्नस्य तृतीय मुदकस्य च। वायोः सञ्चरणार्थञ्च चतुर्थमवशेषयेत्॥" इति क्षेमं मशकाद्यनुपहतम् स्तेय मविधिना द्रव्यादानम्। पुरुषोविष्णुः। स्थैर्य्यमचञ्चलत्वम्। प्राणजयः प्राणायामः। शनैर्न्सहसा। आसनादिलक्षणम् जपोपायश्च पातञ्जले (२)। हृदिमनोऽधिष्ठाने। प्रत्याहारः प्रत्यानयनम् (३)। धिष्ण्यानां प्रागुक्तानां हृदयपुण्डरीकादिस्थानानाम्। एकदेशे विशिष्टा प्राणधारणाकार्य्या। प्राणित्यस्मादितिप्राणश्चित्तम्। "देशबन्ध-

---

(१) द्वौ भागौ पूरयेदन्नस्योदेनैकं प्रपूरयेत्।
वायूनां परिचारार्थं चतुर्थ-मवशेषयेत्॥ वैद्यके।

(२) योः दः २।१ सूः। "तज्जपस्तदर्थभावनम्"—जपः प्रणवादिमन्त्राणां द्वादशाक्षरषड्-क्षरमन्त्राणां वा।

(३) "स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः" २।५४ सूः।

NATIONAL ARCHIVES OF INDIA

मल्लिङ्गं मद्भक्तजन दर्शनस्पर्शनार्चनम् ।
परिचर्य्या स्तुतिःप्रह्वगुणकर्म्मानुकीर्त्तनम् ॥३०॥
मत्कथाश्रवणे श्रद्धामदनुध्यानमुद्धव ! ।
सर्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥३१॥
मज्जन्मकर्म्मकथनं मम पर्व्वानुमोदनम् ।
गीततण्डववादित्र गोष्ठीभिर्मद्गृहोत्सवः ॥३२॥
यात्राबलिविधानञ्च सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकीदीक्षा मदीय व्रतधारणम् ॥३३॥

श्चित्तस्य धारणे"ति हि पातञ्जले। एकस्मिन् देशे चित्तं धार्य्यमित्यर्थः। लीलास्मितावलोकादि समाधानं ध्यातुर्ध्येयरूपेणावस्थानम्। एतैरिति। स्वधर्म्माचरणाद्यैर्जितप्राणैर्जितचित्तः। अन्यैः कामादिभिर्दुष्टं सदसन्मार्गं गमनो बुद्ध्या ज्ञानरूपेण सन्मार्गं गमनबुद्ध्या (ज्ञानरूपेण सन्मार्गेण) तन्द्रितः अनलसः। कपिलः देवहूतिं प्रति ॥ ३।२८।२-३-४-५-६-७।(२४-२५-२६-२७ २८-२९)

चतुर्विंशतिवर्गमाह। मल्लिङ्गेति मल्लिङ्गानि ये मद्भक्तास्तेषां दर्शनादि चयम्। येषान्दर्शनादहं स्फुरामीति ते तथा यथाश्रुते च लिङ्गं मद्भक्तविषयत्वेन दर्शनादेः षट्त्वाच्चतुर्विंशतित्वानुपपत्तिः। परिचर्य्या पुष्पगुम्फनादि। प्रह्वोनम्रता ॥ ११।११।३४। (३०)

अनु अनुवृत्त्या ॥ ११।११।३५ (३१)

पर्व्व जन्माष्टम्यादि ॥ ११।११।३६ (३२)

यात्राद्वारकादिगमनम्। बलिविधानं पुष्पोपहारादि वार्षिकपर्व्व खितिविशेषनिर्देशः। तत्र फलाधिक्यादित्यर्थः। तन्त्रं (१) पञ्च-

---

(१) हयशीर्ष-पञ्चरात्रम्, नारदपञ्चरात्रम्, कपिलपञ्चरात्रम्, गणेशपञ्चरात्रम्-इत्यादि दैवागमाः। अहिर्बुध्न्य संहितादीनां एवन्तर्भावः।

ममार्च्चां स्थापने श्रद्धा स्वतः संहत्य चोद्यमः।
उद्यानोपवनाक्रीड़पुरमन्दिरकर्म्मणि ॥३४॥
समार्ज्जनोपलेपाभ्यां सेकमण्डलवर्त्तनैः
गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥३५॥
अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम्।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥३६॥
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः।
तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ॥३७॥

राचम्। व्रतं देवतार्च्चनादिनियमः ॥ ११।११।३७ (३३)

मम प्रतिमास्थापने उद्यानादिकरणे च श्रद्धा उद्यमश्च असामर्थ्येतु संहृत्य मिलित्वा उद्यानं पुष्पाणां। उपवनन्तु फलानाम्, आक्रीड़म् जलादिक्रीड़ास्थानम् ॥११।११।३८ (३४)

सम्मार्ज्जनं अवकरनिरसनम्। उपलेपोगोमयादिना। सेकोजल सेचनम्। मण्डलवर्त्तनं (च) चतुस्करङ्गमालिकादि वा एतैरेवा कपटेन गृह शुश्रूषणम् ॥११।११।३८। (३५)

मानोदर्पः। दम्भः परवञ्चनम्। यत्रापिशब्दस्ततोऽन्यत्र तात्पर्य्यम्। यथा "अश्नीयादिषमप्युग्रं ब्रह्मस्वन्तु नकर्हिचित्।" इत्यादौ अतोदीपावलोकमपीत्यस्य देवाय स्वयम्। अन्येन दत्तं वस्तुदेवोपभोगमाच्छिद्यनोपयुञ्ज्यादित्यत्र तात्पर्य्यम्। प्रसादबुध्या निवेदितं गृह्णीयात्। अन्यथा "निर्म्माल्यं शिरसा धार्य्यं नैवेद्यमुदरे हरेः। तयोपभुक्तस्रग्गन्ध वासोऽलङ्कार चर्च्चिताः। उच्छिष्ट भोजिनोदासा स्तवमायां जयेमहि।" इत्यादि (षु) वाक्यविरोधः दीपावलोक दोष परिहारार्थं देवस्याग्रे वक्तिहस्तेन दीपः कार्य्यः ॥११।११।४०। (३६)

मदर्चां संप्रतिष्ठाप्य मन्दिरं कारयेद्दृढम् ।
पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ॥३८॥
पूजादीनां प्रवाहार्थं महापर्व स्वयान्वहम् ।
क्षेत्रापणपुरग्रामान् दत्त्वामत्सार्ष्टितामियात् ॥३९॥
प्रतिष्ठाय सार्वभौमं सद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं विभिर्मत्साम्यतामियात् ॥४०॥

विंशतिवर्गः ।

निषेवितानिमित्तेन स्वधर्मेण महीयसा ।
क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥४१॥

सर्व्वलाभार्पणस्य फलमाह । यद् यदिति । इष्टं धर्म्म साधनम् । श्रीकृष्ण उद्धवम् ॥११।११।४०। (३७)

अर्चास्थापनादेः फलमाह । मदर्चामिति । आदिशब्दात् पूजकः नृत्य यात्रा प्रसादादीनाम् प्रवाहोनिर्व्वाहः । पूजा (प्रासादादीनाम्) तदर्थं पूजाद्याश्रितान् क्षेत्रादीन् नकारयेत् । तत्र पूज्यतेऽनेनेति पूजा पुष्पाणि । यात्रा यत्र नानादेश्याः सञ्चितानि वस्तुनि विक्रेतुं प्रत्यब्दं मिलन्ति सा । उत्सवः पूजाहर्षः क्षेत्रं केदारः आपनोहट्टः । पुरं पञ्चशतग्राममुख्यम् । ग्रामः केवल शूद्रवासः । सार्ष्टिता समान प्रभावत्वम् । इयात् प्राप्नुयात् ११।२७।५०-५१। (३८-३९)

प्रतिष्ठा परकृते देवकुले जीर्णोद्धाररूपेण प्रतिमास्थापनं । सद्म परप्रतिष्ठित तत् प्रतिमायाः प्रासादमात्रकरणम् । ब्रह्मलोकं तदाधिपत्यं ब्रह्मत्वं । विभिः स्वकृतैः प्रतिमाप्रासादपूजादिभिः । मत्साम्यतां मामेव । भगवान् उद्धवम् ॥ ११।२७।५२। (४०)

NATIONAL ARCHIVES OF INDIA

मद्विष्णादर्शनस्पर्शपूजास्तुत्यभिवन्दनैः ।
भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च ॥४२॥
महतां बहुमानेन दीनानामनुकम्पया
मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ।
आध्यात्मिकानुश्रवणान्नामसंकीर्त्तनाच्च मे ॥४३॥
आर्ज्जवेनार्य्यसंङ्गेन निरहङ्कृतया तथा ।
मद्धर्म्मणो गुणैरेतैः परिसंशुद्ध आशयः ॥४४॥

विंशतिवर्गमाह। निषेवितेनेति। अनिमित्तो निष्कामः। स्वधर्मो वर्णाश्रमधर्मः। महायान् प्रथमकल्पानुष्ठितः "तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" (१) तप उपवासादिकायिकं कर्म्म। स्वाध्यायो मन्त्रजपोवाचिकम् (२) ईश्वरप्रणिधानं विष्णुध्यानं मानसम्। तस्य त्रिविधस्य श्रस्तत्वम्। देशकालपुरुषवशाद् नातिहिंस्र (स) त्वं शरीरपीड़ाकरस्य त्यागात्। उक्तञ्च पातञ्जलभाष्ये (३) "तच्च चित्तप्रसादमवाधमानेना सेव्यमिति मन्यते" इति ॥ ३।२८।१५। (४१)।

मद्विष्णाद्रम् शालग्रामादि। तस्य दर्शनादि। सत्वमास्तिक्यम् ।८। असङ्गमो निःसङ्गत्वम् ॥ ३।२८।१६। (४२)

"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहायमाः"। "शौचः सन्तोषतपः स्वाध्यायेश्वर प्रणिधानानि नियमाः।" आध्यात्मिकं मोक्षशास्त्रम् १६। ॥ ३।३ ।१७-१८ (४३)

---

(१) योगदर्शन १।२३ सूः। तत्रैव २।१ सूः।

(२) प्रणिधानं "तस्मिन्परमगुरौ भगवति सर्वक्रियाणां समर्पणम्"। योगदर्शनव्याख्या १।२३ सूः।

(३) योगदर्शने वैयासिकं भाष्यम्।

NATIONAL ARCHIVES OF INDIA

पुरुषस्याञ्जसाभ्येति श्रुतमात्रगुणं हि माम् ॥४५॥

एकोनविंशतिवर्गः ।

सा श्रद्धया भगवद्धर्मचर्य्यया,
जिज्ञासयाध्यात्मिकयोगनिष्ठया ।
योगेश्वरोपासनया च नित्यम्,
पुण्यश्रवः कथया पुण्यया च ॥४६॥
अर्थेन्द्रियाराम सगोष्ठ्यतृष्णया,
तत्सम्मतानामपरिग्रहेण च ।
विविक्तरुच्या परितोष आत्मनि,
विना हरेर्गुण-पीयूषपानात् ॥४७॥

मद्धर्मो विष्णुभक्तिः । आशयोऽन्तःकरणम् ॥ ३।२९।१९ (४४)

श्रुतमात्रा न तु बस्तुतो दृष्टा गुणा य(स्य)स्मिन् । तं निर्गुणविषयं भवतीति भावः । कपिलः ॥ ३।२९।२० (४५)

एकोनविंशतिवर्गमाह । सच्छ्रद्धयेति । अत्र प्रथमश्लोकोक्तं गृहस्थस्य । द्वितीयश्लोकोक्तं वानप्रस्थस्य । तृतीयश्लोकोक्तं यतेः । ततःपरं नैष्ठिकब्रह्मचारिणो विष्णुभक्तिद्वीकारणमिति श्लोकचतुष्टयार्थः । भगवद्धर्मो वार्त्ताकू-वर्ज्जनादि । जिज्ञासा अध्यात्मशास्त्राभ्यासः । अध्यात्मयोगनिष्ठातदर्थानुष्ठानम् । पुण्यश्रवकथा विष्णुकथा । पुण्याविष्णुभक्तकथा । ४।२२।२२ (४६)

अर्थेन्द्रियारामाः अर्थकामलुब्धाः, तैः सहगोष्ठी । समानसभत्वम् । तत्र अतृष्णा तृष्णाया अप्यभावः । किं पुनः सेवायाः तत्सम्मताः सक्चन्दनादयः । विविक्तरुचिः विजनप्रीतिः । सा च

अहिंसया पारमहंस्यचर्य्यया,
स्मृत्या मुकुन्दाचरिताग्र्यसीधुना।
यमैरकामैर्नियमैश्चाप्यनिन्द्यया,
निरीहया द्वन्द्वतितिक्षया च ॥४८॥
हरेर्गुणस्तत्परकर्णपूर-
गुणाभिधानेन विजृम्भमाणया।
भक्त्या ह्यसङ्गः सदसत्यनात्मनि,
स्यान्निर्गुणे ब्रह्मणि चाञ्जसारतिः ॥४९॥

आत्मनः परितोषे सति। आत्मनि स्वरूपे परितोषः। सुखान्तरानपेक्षत्वं विना विविक्तरूपेर्मिथ्याचारत्वात्। तदुक्तं "कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते" (१) इति। स च परितोषो हरिकथां विना। हरिकथाकर्णनापेक्षात्वरूप्ये वेत्यर्थः॥ ४।२२।२३ (४७)

अहिंसयेति। पारमहंस्यं परमहंसधर्म्मः। अस्मृत्या वासनोच्छेदकेन। विष्णुकथामद्यपानेन। मद्यं हि स्मृतिभ्रंशहेतुः। पूर्वं केवलकथापानम्। अत्र तु शास्त्रद्वारेणेति वा। (२) यमनियमा व्याख्याताः आनन्दा योगान्तरस्य निरीहा योगक्षेमार्थचेष्टाराहित्यम्॥ ४।२२।२४। (४८)

हरेरिति। तत्परकर्णपूरा विष्णुभक्ताः कर्णालङ्कारभूता ये गुणाः ऐश्वर्य्यादयः तेषामभिधानम्। हरेर्गुणाभिधाने नेत्यसामर्थ्येऽप्यार्षत्वात्

---

(१) भगवद्गीता ३।६ श्लोकः।
(२) योगदर्शनम् २।२९-३० सूः।

NATIONAL ARCHIVES OF INDIA

अष्टादशवर्गाः ।

मयि भावेन सत्येन मत्कथा श्रवणेन च ।
सर्व्वभूतसमत्वेन निर्व्वैरेणाप्रसङ्गतः ॥५०॥
ब्रह्मचर्य्येण मौनेन स्वधर्मेण महीयसा ।
यदृच्छयोपपन्नेन सन्तुष्टोमित भुङ्मुनिः ॥५१॥
विविक्त शरणः शान्तो मैत्रः करुण आत्मवान् ।
सानुबन्धे च देहेऽस्मिन्नकुर्व्वन्नसदाग्रहम् ॥५२॥
ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ।
निवृत्तबुद्ध्यव स्थानो दूरीभूतान्य दर्शनः ॥५३॥
उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् ।
मुक्तलिङ्गं सदाभास मसति प्रतिपद्यते ॥५४॥

समासः । विजृम्भमाणयेति सर्वैस्तुतोयान्तैः सम्बध्यते । सदसति कार्य्यकारणरूपे । असङ्गोरतिश्चेति अनिष्टहानि रिष्टाप्तिश्चेतिद्वय मुक्तम् । सनत्कुमारः पृथुम् ।४।२२।२५ (४८)

अथ अष्टादश वर्गं माह । मयीति । मयि सत्यभावो निष्कामाभजन प्रवृत्तिः सर्वभूतेषु विष्णुरधिष्ठातेति समत्वम् । अप्रसङ्गोनिःसङ्गत्वम् । मुनिर्म्मननशीलः ॥ शरणं आश्रयः आत्मवान् जितमनाः । अनुबन्धः पुत्रादिः । असदाग्रहोममाहम्भावः ॥ दृष्टं प्रकृतिपुरुषयोस्तत्वं येन ज्ञानेन ॥ बुद्ध्यवस्थानं जाग्रदादि अन्यदर्शनं आत्मव्यतिरिक्त ज्ञानम् ।३।२।७।६-७-८-९॥ (५० ५१-५२-५३)

उपलभ्येति । आत्मना जीवेन । आत्मानं परमात्मानम् । चक्षुषा इन्द्रियावच्छिन्नेन सूर्य्येण । अर्कं गगनस्थं सूर्य्यम् । आत्म-

NATIONAL ARCHIVES OF INDIA

सतोवन्धुमसच्चक्षुः सर्व्वानुस्यूत मद्वयम् ॥५५॥

पञ्चदशवर्गाः।

श्र(शु) द्धामृत कथायां मेशश्वन्मदनु कीर्त्तनम्।
परिनिष्टा च पूजायां स्तुतिभि स्तवनं मम ॥५६॥
आदरः परिचर्य्यायां सर्व्वाङ्गै रभि वन्दनम्।
मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥५७॥
मदर्थेष्वङ्गचेष्टा च वचसामद्गुणोरणम्।
मय्यर्पणञ्च मनसः सर्वकाम विवर्ज्जनम् ॥५८॥

ट्टग् जीव स्वरूपम्। विमृशन् प्रथमम्। मुक्तलिङ्गं-लिङ्ग शरीर-रहितम्। प्रतिपद्यते जानाति। ततोऽसति असत्ये प्रपञ्चेस्थितस्य सतः सत्यरूपं परमात्मनः आभासकम् ।३।२७।१०॥ (५४)

(ततः) तस्यैव सतोवन्धुर्योऽसौ सोहऽमिति ज्ञानम्। ततोऽसतः प्रपञ्चस्य चक्षुर्मिथ्यात्म प्रकाशकम् तत् सर्वत्रात्मानुस्यूतम् व्याप्य-स्थितम्। ततोऽद्वयम् सोऽस्म्यहमेवेति ज्ञानम्। तदुक्तं शङ्करा-चार्य्यैः (१) "योऽसौ सोऽहं सोऽस्म्यहमेवेति विदुर्यमिति।" कपिलः देवहूतिम् ॥३।२७।११। (५५)

अथ पञ्चदश वर्ग माह श्रुद्धेति। अनुकीर्त्तनं नामोच्चारणम् परिकर्य्या पुष्पचन्दनादि। सर्व्वाङ्गैरष्टभिः। तथाच दोर्भ्यां पद्भ्याञ्च जानुभ्यां उरसा शिरसादृशा। मनसावचसाचेतिप्रणामो ऽष्टाङ्ग ईरीतः" (२), ॥११।१८।२०।२१। (५६-५७)

---

(१) शङ्कराचार्य्य गत्यावल्याम्।

(२) तत्सार मद्भक्तमदुत प्रणाम शब्देऽस्त् सर्व्वम् ।

मदर्थेऽर्थ परित्यागो भोगस्य च सुखस्य च ।
इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥५९॥
एवं धर्मैर्मनुष्याणामुद्धवात्म निवेदिनाम् ।
मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥६०॥

त्रयोदश वर्गाः ।

कुर्य्यात् सर्व्वाणि कर्म्माणि मदर्थं शनकैः स्मरन् ।
मय्यर्पित मनश्चित्तो मद्धर्म्मात्ममनोरतिः ॥६१॥
देशान् पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् ।
देवासुर मनुष्येषु मद्भक्ताचरितानि च ॥६२॥

अङ्गचेष्टा सम्मार्ज्जनोपलेपादि । ईरणं उच्चारणम् ॥ ११।१८। २२। (५८)

भोगोविषयार्ज्जनम् । सुखमुपभोगः । इष्टादेश्च मदर्थम् ॥११। १८।२३। (५९)

आत्मनिवेदनम् ज्ञानम् । आत्मनि वेदनमित्यलुक् । तदयथास्यात्तथाभक्तिर्जायत इति क्रियाविशेषणम् । आत्मसमर्पणमिति व्याख्याने समर्पणञ्च (मय्यर्पणञ्च) मनन इत्यनेन पौनरुक्त्यम् । भगवान् उद्धवम् ॥११।१८।२४। (६०)

अथ त्रयोदश वर्गं माह । कुर्य्यादिति । स्मरण मामेव मनः प्रवृत्ति निवृत्तिरूपम् मनः स्वच्छत्वादिरूपम् मद्धर्म्मसमद्धर्म्मानुष्ठातृषु मद्भक्तेषु मयिसमाविष्टेषु मनोरतिः मनोग्रहणम् मनः पूर्व्विकारतिरित्येवमर्थः ॥ ११।२८।८। (६१)

देशपूतावासेन देवादिषु येमद्भक्ताः तच्चरितानि च पूजयेत् श्रवणादिभिः ॥११।२८।१०। (६२)

पृथक् सवेण वा मह्यं पर्व यात्रा महोत्सवान्।
कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥६३॥
मामेव सर्वभूतेषु बहिरन्तरपावृतम्।
ईक्षेताप्मनि चात्मानं यथा खममलाशयः ॥६४॥
इति सर्वाणि भूतानि मद्भावेन महाद्युते।
सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥६५॥
ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके।
अक्रूरे क्रूरके चैव समदृक् पण्डितोमतः ॥६६॥
विसृज्य स्मयमानान् स्वान् दृशं व्रीड़ाञ्च दैहिकीम्।
प्रणमेद्दण्डवद्भूमावाश्वचाण्डाल गोखरम् ॥६७॥

सवेणान्यैर्मिलित्वा पर्वाणि शयनबोधनद्वादश्यादौ यात्रा महोत्सवाश्च। मह्यंमदर्थं विभूतयश्चामरायाः सर्वभूतेषु आत्मनि च मामात्मानम् अपावृतम् अतिरोहितम्। बहिः कालरूपम्। अन्तरन्तर्यामिरूपम्। केवलं शुद्धं ज्ञानं प्रपञ्चस्याधिष्ठानमिति मन्यमानः। मद्भावेन मद्बुध्या सभाजनं सेवा॥ ११। २८।१२। (६३।६४।६५)

पुक्कसोऽन्त्यज विशेषः। ब्राह्मणो ब्राह्मण्य सहितः। ब्राह्मणादिश्वष्टसु द्वयोर्द्वयोः क्रमाज् जातिक्रिया द्रव्यगुणकृतं वैषम्यं ज्ञेयम। विषयेष्वपि समं मत्स्वरूपम् पश्यतीति समदृक्॥ ११।२८। १४। (६६)

स्वयं स्वरूपेण। स्वाद्दृशं अहंबुद्धिम्। अन्यां ममबुद्धिम्। चकाराल्लोकं व्रीड़ाञ्च॥ ११।२८।१५। (६७)

NATIONAL ARCHIVES OF INDIA

यावत् सर्वेषु भूतेषु मद्भावो नोपजायते ।
तावदेवमुपासीत वाङ्मनः कायवृत्तिभिः ॥६८॥
नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् ।
स्पर्द्धासूया तिरस्काराः साहङ्कारा वियन्ति हि ॥६९॥

द्वादशवर्गाः ।

गुरुशुश्रूषया भक्त्या सर्वलाभार्पणेन च ।
सङ्गेन साधुभक्तानामीश्वराराधनेन च ॥७०॥

एतदनुष्ठानस्यावधिमाह । यावदिति । नोपजायते न साक्षाद्-भवति ॥ ११।२८।१६। (६८)

उपासनायाः फलमाह । नरेष्विति । मद्भावोमत्सत्ता नर शब्द उपलक्षणम् । सर्वभूतेष्वित्यर्थः । स्पर्द्धाधिकगुणैःसह साम्येच्छा । असूयागुणेषुदोषारोपः । तिरस्कारो मानभङ्गः । अहङ्कारोऽनात्मनि आत्मबुद्धिः गर्वो वा । वियन्ति विशेषाद् मच्छन्ति । संस्कारैः सहनश्यन्तीर्थः । हिस्फुटम् । नस्तुति मात्रम् । भगवान् उद्धवम् ॥११।२८।१५। (६९)

अथ द्वादशवर्गं माह । गुरुशुश्रूषेति । भक्त्या तात्पर्य्येण शुश्रूषा अर्पणं गुरावेव साधवश्च भक्ताश्च साधवः केवल स्वधर्मनिष्ठाः, ईश्वरः (१) "क्लेशकर्मविपाकाद्यैरपरामृष्टः पुरुषः"। तस्याराधनं (२) सर्वं कर्मार्पणम् ॥ ७।७।३०। (७०)

---

(१) योगदर्शनम १।२४ सूः ।

(२) "तत् कुरुष्व मदर्पणम्" गीता—९।२७ श्लोः । योगदर्शन १।२३,-२।४५ सूः ।

NATIONAL ARCHIVES OF INDIA

श्रद्धया तत्कथायाञ्च कीर्त्तनैर्गुणकर्म्मणाम्।
तत्पदाम्बुरुहध्यानात् तल्लिङ्गेचार्हणादिभिः ॥७१॥
हरिः सर्व्वेषु भूतेषु भगवानास्त ईश्वरः।
इति भूतानि मनसा कामैस्तैः साधुमानयेत् ॥७२॥
एवं निर्ज्जितषड्वर्गैः क्रियते भक्तिरीश्वरे।
वासुदेवे भगवति यथा संलभते रतिम् ॥७३॥

निशम्य कर्म्माणिगुणानतुल्यान्,
वीर्य्याणि लीलातनुभिः कृतानि।
यदातिहर्षोत्पुलकाश्रुगद्गदम्,
प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥७४॥
यदाग्रहग्रस्त इव क्वचिद्धस-
त्याक्रन्दते ध्यायति वन्दते जनम्।

कथायां श्रद्धा श्रवणेनेत्यर्थः, गुणैश्वर्य्यादयः। कर्म्माणि सृष्ट्यादीनि लिङ्गमधिष्ठानम् प्रतिमादि, ईक्षादर्शनम् अर्हणं पूजा नचादिशब्देनान्येषामप्युक्तत्वादद्वादशवर्गं प्रतिज्ञाभङ्ग इति शङ्क्यं, इह स्वशब्दनिर्दिष्टैरेवाङ्गैर्वा समाप्तेर्विवक्षितत्वात्॥ ७।७३१। (७१)

हरिरास्त इति मनसाकामैस्तत्तच्चित्तानुवर्त्तनैः साधु यथास्यात् ॥७।७।३२। (७२)

एवं द्वादशवर्गानुष्ठानेन षड्वर्गौ "मनःषष्ठानीन्द्रियाणि" ईश्वरे फलार्पणे समर्थे भगवति भजनीय सौन्दर्य्यादिगुणे यथाभक्त्या ७।७।३३। (७३)

NATIONAL ARCHIVES OF INDIA

मुञ्चः श्वसन् वक्ति हरे जगत्पते !
नारायणेत्यात्ममतिर्गतत्रपः ॥७५॥
तदा पुमान् मुक्तसमस्तबन्धनः,
तद्भावभावानुकृताशया कृतिः ।
निर्दग्धबीजानुशयो महीयसा,
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥७६॥

लब्धरतिरिक्ष्याह । निशम्येति । निशम्य श्रुत्वा । कर्म्माणि सृष्ट्यादीनि । लीलावतारैः कृतानि । लीलासाध्यानि ॥७।७।३४।(७४)

आक्रन्दनं नारायणेत्यादि सातत्येन शब्दम् । आत्मनि स्वरूपेमतिर्यस्य नतुलोके । अतएव गतत्रपः ॥७।७।३५। (७५)

रतेः फलमाह । तदेति । बन्धनानि-क्लेशकर्म्मविपाकाशयाः (१) तं विष्णुम् । भावयते प्राप्नोति इतितद्भाव स्तद्विषय इत्यर्थः । प्राप्यर्थोभूश्रुरादावस्ति । सचासौ भावो मनोविकारः । तस्मात् अनुकृते आशयाकृतौ (तोः) अर्थाद्विष्णोरेव येन पुंसा सतथा । आशयोऽन्तःकरणम् । आकृतिर्वेषः वर्हापीड़ादिः । विष्णु विषयेन भावेन विष्णोविराख्यसुप्रसन्नम् । चेतोवेषश्चतथास्यादित्यर्थः । बीजानि पुण्य पापानि । अनुशेरते अस्मिन्निति बीजानुशयो लिङ्ग-देहम् । महीयान् साधनसहस्रैर्दुर्लभः । समेति सङ्गतो भवति । अधः अक्षजं इन्द्रियजं ज्ञानमस्य तं अवाङ्मनसगोचरम् । रूपं प्राप्नोतीत्यर्थः । प्रह्लाद बालान् ॥७।७।३६ (७६)

---

(१) योगदर्शनम् २।२४ सूः । अविद्यादय क्लेशाः विपच्यन्ते इति विपाकाः जात्यायुर्भोगाः, शुभाशुभं कर्म्माहृत्वा, आफलविपाकात् चित्तभूमौशेरते इत्याशया वासनाश्च संस्काराः तत्रैव भाष्ये ।

एकादशवर्गाः।

सवैमनः कृष्णपदारविन्दयो-
र्वचांसिवैकुण्ठ गुणानुवर्णने।
करौ हरेर्म्मन्दिर मार्ज्जनादिषु,
श्रुतिञ्चकाराच्युत सत्कथोदये ॥७७॥
मुकुन्दलिङ्गालयदर्शने दृशौ,
तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम्।
घ्राणञ्च तत्पादसरोजसौरभे,
श्रीमत्तुलस्यारसनां तदर्पिते ॥७८॥
पादौ हरेः क्षेत्र पदानुसर्पणे
शिरो हृषीकेश पदाभिवन्दने।
कामञ्चदास्ये तु काम काम्यया,
यथोत्तमःश्लोकजनाश्रया रतिः ॥७९॥

अथैकादशवर्गं माह। सवै इति। स अम्बरीषः अच्युतस्य सतां भक्तानां कथा ॥९।४।१८। (७७)

लिङ्गं प्रतिमा। आलयोऽधिष्ठानम्। चशब्दो भिन्नक्रमः तुलस्याश्च सौरभे। तत्पादसरोजेति। तत्पादकल्पित सरोज सौरभ इति श्लेषम्। रूपकपक्षेऽपिसाम्यमात्रम्। नतु गन्धसङ्गावः। तदर्पितेनैवेद्ये ॥९।४।१९। (७८)

क्षेत्रं द्वारकादि। पदं विरजादि। कामममिलाषम्। दास्ये नतु रूप्यादिसेवायाम। कामेनहिरतिः माधा साचात्र विष्णुजनाश्रया

दृश्यवर्गाः ।

आयुर्हरतिवैपुंसामुद्यन्नस्तञ्चयन्नसौ ।
तस्यर्त्तेयत् क्षणोनीत उत्तमः श्लोकवार्त्तया ॥८०॥
तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत ।
न खादन्ति नमेहन्ति किं ग्रामपशवोऽपरे ॥८१॥
श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ।
नयत्कर्णं पथोपेतो जातुनाम गदाग्रजः ॥८२॥
विलेवतोरुक्रमविक्रमान् ये
न शृण्वतःकर्णपुटे नरस्य ।

यथा येन दास्यकामेन। तत्र पायुवर्जानामिन्द्रियाणां शिरश्च व्यापारैरेकादशाङ्गानि। शुकः॥ ८।४।२०। (७९)

एवमन्वयमुखेन प्राग्वर्गानुक्त्वा व्यतिरेकमुखेन दर्शयन्नाह। आयुरिति। उद्यन् उदयन्। अस्तं पश्चिमाद्रिञ्चयन् गच्छन्। असावभिनयेन सूर्यं दर्शयति। तस्यर्त्ते तस्यायुर्विना यदृक्षेन। हृतमपि तस्यायुः सफलत्वादहृतवदित्यर्थः। अत्रवार्त्तयेत्यन्यमति गुणाभिधानमेकमङ्गमित्यभिप्रेतम्। उत्तरत्र गाथोपगान मेकाकिनः ॥२।३।१७। (८०)

ननु कथमायुषोवैयर्थ्यं भोगसद्भावादित्यत आह। तरव इति। उत अहो ॥२।३।१८। (८१)

विड्वराहो ग्राम्यशू (सू) करः। श्वादिभिः सहसंस्तुतः तत्। प्रस्तावे गृहीतनामा ॥२।३।१९। (८२)

(विलेति)। विलेच्छिद्रे नलिन्द्रिये। वत कष्टम् न शृण्वत इति नर विशेषणम्। अत्र कर्णपथोपेत इति न शृण्वतोये (इति च)

NATIONAL ARCHIVES OF INDIA

जिह्वासतीदार्दूरिवेवसूत !
नचोपगायत्युरगायगाथाः ॥८३॥
भारः परं पट्ट किरीट जुष्ट-
मप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्य्याम्,
हरेर्लसत् काञ्चन कङ्कणौवा ॥८४॥
वर्हायिते ते नयने नराणाम्
लिङ्गानिविष्णोर्न निरीक्षतो ये ।
पादौ नृणांतौ द्रुमजन्मभाजौ,
क्षेत्राणि नानु व्रजतो हरेर्यौ ॥८५॥
जीवञ्जवो भागवताङ्घ्रिरेणून्
नजातु मर्त्योऽभिलभेत यस्तु ।
श्रीविष्णुपद्यामनुजस्तुलस्याः
श्वसञ्जवो यस्तु नवेद गन्धम् ॥८६॥

कथा श्रवण मुक्तम्। दर्दूरो मण्डूकः। चगब्दश्चेदर्थे गाथाः कथाः २।३।२०। (८३)

पट्टं पट्टवस्त्रम् शवस्येमौ शावौ। वा शब्दो यद्यर्थे ॥२।३।२१। (८४)

वर्हं मयुरपिच्छम्। द्रुम जन्म वृक्षमूलत्वम् ॥२।३।२२। (८५)

नाभिलभेत न स्पृशेत। श्रीशब्दोनाम्नः पूजार्थः। विष्णोः

तदश्मसारं हृदयं बतेदम्,
यद्गृह्यमाणैर्हरिनामधेयैः।
न विक्रियेताथ यदाविकारो-
नेत्रेजलं गात्ररुहेषुहर्षः ॥८७॥

नववर्गाः।

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥८८॥
इति पुंसार्पिताविष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियेत भगवत्यद्धा तन्मन्येऽधीत मुत्तमम् ॥८९॥

सप्तवर्गाः।

अनिमित्तं निमित्तेन स्वधर्मेणामलात्मना।
तीव्रयामयि भक्त्याच श्रुतसम्भृतयाचिरम् ॥९०॥

पादौ एति गच्छति इति विष्णुपदो विष्णुचरणस्तेत्यर्थः। इलकान्ता-वितिदीर्घोऽप्यस्ति अदादौ ॥२।३।२३। (८६)

अश्मसारं पाषाणवद् लोहवद्वाकठिनम्। विकृतं कथं लक्ष्यं विक्रियायोगात्? यदाविकार स्तदा अश्रूणि रोमहर्षश्च शौनकः सूतम् ॥२।३।२४। (८७)

अथ नववर्गमाह। श्रवणमिति। पादसेवनं पादयोः सेवनम् नमनमित्यर्थः। वन्दनं स्तुतिः। सख्यं प्राग्वत् ॥७।५।२३। (८८)

नवलक्षणा नवाङ्गा। प्रह्लादः पितरम् ॥७।५।२४। (८९)

सप्तवर्गमाह। अनिमित्तेति। अनिमित्तं निमित्तत्वाभावः।

NATIONAL ARCHIVES OF INDIA

ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा।
तपो युक्तेन योगेन तीव्रेणात्मसमाधिना ॥९१॥
प्रकृतिः पुरुषस्येह दह्यमानात्वहर्निशम्।
तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥९२॥

निमित्तं प्रयोजकं यस्य तेन। (१) "एवं नृणां क्रियायोगाः सर्व्वे संसृतिहेतवः। तएवात्म विनाशाय कल्पन्ते कल्पिताः परे" इत्युक्तेन अमल आत्मा चित्तं यस्मात्तेन। शुद्धमन्तद्रव्यात्मकेनेत्यर्थः। श्रुतं कथाश्रवणम् तेन संभृता उपचिता ॥३।२७।२१। (९०)

दृष्टतत्त्वेन सत्व पुरुषान्यताख्याति रूपेण। वैराग्येण गुणसङ्ग-जनितरागरूपमलापनुत्या। बलीयसा वशीकार संज्ञा (२) लक्षणेन। योगोध्यानम् (३) "योगः सन्नहनोपायःध्यानं सङ्गति युक्तिषु" इतिनानार्थात्। ध्यानमेव "तदेवार्थमात्रनिर्भासं स्वरूप शून्यमिव समाधि" (४) रिति समाधि लक्षणम् ॥३।२७।२२ (९१)

अत्र स्वधर्म्मादिभिः षड्भिः तीव्रया श्रुत सम्भृतया च भक्त्या दह्यमाना प्रकृति स्तिरोभवित्रीति प्रतिपत्तव्यम्। यथा श्रुते तु स्वधर्म्मादिवद्भक्तेरप्यङ्गकोटिनिविष्टत्वानुपपत्तिः, प्रक्रान्तं चाङ्गित्वम्। भवित्रीतिसाधुकारिणि ट्रन्। यत्र न पुनराविर्भावः स साधुः न तिरोभावः, यथाह्यरणि रग्निमुत्पाद्य तत्तेजसा नश्यति। तथा प्रकृति भक्तिमुत्पाद्य प्रकटीकृत्य तत्तेजसा नश्यतीत्यर्थः। कपिलः ॥३।२७। २३। (९२)

---

(१) भागवतं १।५।३४ श्लोः।
(२) योगदर्शनं १।१५ सूः।
(३) अमर-नानार्थ कोषः।
(४) योगदर्शनं ३।३ सूः।

NATIONAL ARCHIVES OF INDIA

षड्वर्गाः ।

वाणीगुणानुकथने श्रवणौ कथायाम्,
हस्तौ च कर्म्मसु मनस्तवपादयोर्नः ।
स्मृत्यां शिरस्तवनिवासजगत्प्रणामे,
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥९३॥

पञ्चवर्गाः ।

शृण्वतां गदतां शश्वदर्हतां त्वाभिवन्दताम् ।
नृणां संवदतामन्तर्हृदिभास्यमलात्मनाम् ॥९४॥

चतुर्वर्गाः ।

तस्मादेकेनमनसा भगवान् सात्त्वतां पतिः (१) ।
श्रोतव्यः कीर्त्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥९५॥

षड्विंश वर्गमाह । वाणीति । पादयोः स्मृत्यां मनः शिरः प्रणामे हि निवास जगद् जगद् निवासो यस्येति निवास शब्दस्य सप्तमी विशेषणे बहुव्रीहाविति पूर्व्व निपातः । नलकूवरः श्रीकृष्णम् ॥१०।१०।३८ (९३)

पञ्चवर्गमाह । शृण्वतामिति । श्रुतदेवः श्रीकृष्णम् ॥१०।८६। ४६। (९४)

चतुर्व्वर्गमाह तस्मादिति । यस्मात् सर्व धर्म्माणां विष्णुभक्तिः फलम् । सात्वतां सत्ववताम् । सच्छब्देन सत्वमुच्यते । सूतः शौनकम् ॥१।२।१४। (९५)

---

(१) सात्त्वतां पतिर्गोपानामधीश्वरः । एवं सात्त्वतसंहितायाम् ।

NATIONAL ARCHIVES OF INDIA

त्रिवर्गाः।

तस्माद् भारत सर्व्वात्मा भगवान् हरिरीश्वरः।
श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताऽभयम् ॥९६॥
तस्मात् सर्व्वात्मना राजन् हरिः सर्व्वत्र सर्व्वदा।
श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान्नृणाम् ॥९७॥
पुनर्व्वचनं त्रिवर्गस्यान्तरङ्गतमत्वख्यापनार्थम्।

इति वोपदेव विरचिते मुक्ताफले विष्णुभक्त्यङ्गवर्ग लक्षणं भेदाश्च। इति सप्तमोऽध्यायः।

त्रिवर्गमाह। तस्मादिति। तस्माद् यस्मादन्येषां सदोषत्वात् सर्व्वात्मत्वादात्मीयत्वं भगवत्त्वाद्रमणीयत्वम् ईश्वरत्वादरदत्वम्। श्रवणादि प्रवृत्तिहेतुः। अभयं मोक्षम्। शुकः राजानम् ॥२।१।५ (९६)

तस्मादिति। तस्माद् यस्माद् भक्तावेव वेदस्य तात्पर्य्यम्। सर्वात्मना सर्वावस्थेनापि सर्वदेशेषु सर्वकालेषु च शुकः ॥२।२।३६। (९७)

ननु वर्गान्तराणि सकृदेवोक्तानि त्रिवर्गस्तु किमर्थं पुनरुच्यते इत्यत आह। पुनर्व्वचनमिति। मतवर्थीह्यतिशयः। स चान्य स व्यपेक्ष (इत्यर्थः) इत्यर्थात् पूर्वस्य वर्गनवकस्यान्तरङ्गतरत्वम्। तत् पूर्वस्यत्वन्तरङ्गत्वमित्युक्तं भवति॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्त्यङ्ग लक्षणं भेदाश्च। इति सप्तमोऽध्यायः॥

NATIONAL ARCHIVES OF INDIA

अष्टमोऽध्यायः ।

अथ विष्णु श्रवणम् ।

कानामतृप्येद्रसवित्कथायाम्,
महत्तमैकान्त परायणस्य ।
नान्तं गुणानाम गुणस्य जग्मु-
र्योगेश्वराये भवपाद्ममुख्याः ॥१॥
तन्नो भवान् वै भगवत् प्रधानो,
महत्तमैकान्त परायणस्य ।

एवं भक्त्यङ्गान्युक्ता तेषु सर्व्वेषु स्तोतव्येषु प्राधान्यात्त्रिवर्गमेव स्तौति । वर्गस्येति । महिमेति शेषः । तेष्वपि श्रवण माहात्म्यमाह अथेति । कोनामेति । महत्तमाः एकान्तेन नियमेन परायणं परम आश्रयो यस्य स तथा । महत्तमैः कथमज्ञानः प्रत्यक्षइव भवतीति भावः । अन्तं निश्चयं इदं रूपं ईदृशं रूपं इत्यश्चमत्करोतीत्यादि । अगुणस्य गुण सुखाधिकस्वरूपसुखलुब्धत्वाद् अगृहीत गुणस्य स्वरूप सुखमेव गुणेष्वभिव्यक्तमन्यान् सुखयति । अभिव्यक्ति तारतम्यात् सुखतारतम्यम् । भवोरुद्रः । पाद्मो ब्रह्मा । मुख्य-शब्दात्सनकादयः योगस्य समाधेः । ईश्वरावशेक्षत समाधयः । समाधिवलात् कलित सकल पदार्था अपि विष्णुगुणान्न कलयन्ती-त्यर्थः ॥१।१८।१५। (१)

तत इति । भगवत् प्रधान इति बहुव्रीहिः । महत्तमेति तत्-

हरे रुदारं चरितं विशुद्धम्,
शुश्रूषतान्नो वितनोतु विद्वन् ॥२॥
कोनाम लोके पुरुषार्थ सारवित्-
पुरा कथानां भगवत् कथासुधाम्।
आपीयकर्णाञ्जलिभिर्भवापहा-
महोविरज्येत विना नरेतरम् ॥३॥
निवृत्ततर्षैरुपगीयमाना-
द्भवौषधाच्छ्रोत्रमनोरभिरामात्।
क उत्तमः श्लोक गुणानुवादात्,
पुमान् विरज्येत विनाऽपशुघ्नात् ॥४॥
कस्तृप्नुयात्तीर्थ पदोऽभिधानात्,
सत्रेषु वः सूरिभिरीड्यमानात्।
यः कर्णनाड़ीं पुरुषस्य यातो-
भवप्रदां गेहरतिं छिनत्ति ॥५॥

पुरुषः। विशुद्धं कर्त्रन्तरासंकीर्णम्। शौनकः सूतम् ॥१।१८।१५। (२)

कोनामेति। पुराकथानाम् मध्ये। नरेतरं पशुं। मैत्रेयः विदुरम् ॥३।१८।५०। (३)

तर्षो विषयेच्छा। अनुवादाद् अन्यैः क्रियमानादित्यर्थः। निवृत्ततर्षादिभिस्त्विभिर्मुक्त मुमुक्षु सकामा नात्र विरज्यन्त इत्युक्तं पशुघ्नो हिंसानिरतः। राजा शुकम् ॥१०।१२।४। (४)

कस्तृप्नुयादिति। तीर्थपादो विष्णुः। सत्रेषु पुराणेषु। विष्णु-

NATIONAL ARCHIVES OF INDIA

को वा भगवतस्तस्य पुण्यश्लोकेड्य कर्म्मणः
शुद्धिकामो न शृणुयाद् यशः कलिमलापहम् ॥६॥
वयन्तु न विपृथाम उत्तमःश्लोकविक्रमे ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥७॥
श्रुतस्य पुंसां सुचिरश्रमस्य,
नन्वञ्जसा सूरिभिरीड़ितोऽर्थः ।
तत् तद्गुणानुश्रवणं मुकुन्द-
पादारविन्दं हृदयेषु येषाम् ॥८॥
पिबन्ति ये भगवत आत्मनः सताम्,
कथामृतं श्रवणपुटेषु संभृतम् ।

महिम्नः साकल्येन वक्तुमशक्यत्वात् पुराणानां सूचना रूपेन सूत्रत्वम् ॥ कर्णनाड़ीं कर्णमूलम् । विदुरः मैत्रेयम् ॥३।५।११। (५)

एतेहि श्लोकाः शुश्रूषोर्व्वचसा । श्लोकः कीर्त्तिः । ईड्यं स्तुत्यम् ॥ १।१।१६। (६)

वयन्त्विति । यदुयेविक्रमाः । स्वादु स्वादु स्वादवः स्वादवः । उभय सुपांसुलुक् पूर्व्व सवर्णेति सुलुक् (१) पदे पदे क्षणे क्षणे । शौनकः सूतम् ॥१।१।१८। (७)

श्रुतस्येति । मुकुन्द पादारविन्दं येषां हृदयेषु तत्तेभ्यस्तस्य मुकुन्दस्य गुणान् श्रवणं श्रुतश्रमस्यफलम् । विदुरः मैत्रेयम् ॥ ३।१३।४। (८)

---

(१) "सुपांसुलुक् पूर्वसवर्णस्य" पाणिनिः ७।१।३९ सूः ।

NATIONAL ARCHIVES OF INDIA

पुनन्ति ते विषयविदूषिताशयम्,
व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥९॥
ज्ञानं यदा प्रतिनिवृत्तगुणोर्म्मिचक्रम्,
आत्मप्रसाद उभयत्र गुणेष्वसङ्गः।
कैवल्यसम्मतपथस्त्वथभक्तियोगः,
को निर्वृतो हरिकथासु रतिं न कुर्य्यात् ॥१०॥
तस्मिन्महन्मुखरिता मधुभिश्चरित्र-
पीयूषशेष सरितः परितः स्रवन्ति।
ता ये पिबन्त्यविषो नृपगाढ़कर्ण-
स्तान्न स्पृशन्त्यशनतड्भयशोकमोहाः ॥११॥

पिबन्तीति। सतामात्मनः सद्भिरात्मत्वेन ज्ञातस्य। शुकः राजानम् ॥२।२।३७। (९)

ज्ञानमिति। हरि कथासु कोनिर्वृतः कोवारतिं न कुर्य्यात्। यद् यस्मात् तास्वेव ज्ञानादयोगुणाः। आ इति स्मरणे। भागवत सङ्गं शुकः स्मरति। प्रतिनिवृत्तं यत्रोदितं तत्रैव लीनम्। गुणोर्म्मि चक्रम्। महदादिपरः पूरोवेन ज्ञानेन तत्तथा। आत्मप्रसादः शुद्धसत्वात्मकत्वम्। उभयत्रगुणेष्वसङ्गइहामूत्रभोगविरागः। कैवल्य-मित्येव संमत पन्थाः फलसाधनत्वेपि फलरूपत्वात् शर्करादिवच्चन-वत्शुकः ॥ २।३।१२। (१०)

तस्मिन्निति। तस्मिन् भागवत सदसि महद्भिर्मुखरिता वाचालो-कृतास्वयमेवात्मानं यथा प्रकाशयन्ति तथोच्चारिताः महन्मनोवृत्ता-पुरणस्य तदवस्थत्वाच्चेशत्वम्। परितः सर्व्वान् श्रोतॄन्प्रति।

गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम् ।
मद्वार्त्तां यातयामानां न बन्धाय गृहा मताः ॥१२॥

कुतोऽशिवं त्वच्चरणाम्बुजासवम्,
महन्मनस्तो मुखनिःसृतं क्वचित् ।
पिबन्ति ये कर्णपुटैरलं प्रभो !
देहं भृतां देहकृदस्मृतिच्छिदम् ॥१३॥

विभ्यस्त्रयामृतकथोदवहास्त्रिलोक्याः,
पादावनेजसरितः शमलानि हन्तुम् ।
आनुश्रवं श्रुतिभिरङ्घ्रिज मङ्गसङ्गै-
स्तीर्थद्वयं शुचिषदस्त उपस्पृशन्ति ॥१४॥

अविद्यषः विविधतृष्णारहिताः । तदेकाभिलाषा इत्यर्थः । अशनं क्षुद्वयम् । जरामरणक्षुत्पिपासेति षड्ऊर्म्मयः । (१) "मनसःशोकमोहौ च प्राणस्य च क्षुधा । जरामृत्यू शरीरस्य षड्ऊर्मिरहितः शिवः" इति वचनात् । नारदः प्राचीनबर्हिषम् ॥४।२८।४०। (११)

गृहेति । आवेशःस्थितिः । कुशलं विहितम् । वार्त्तायाश्रुता तया । यातोनीतः यामः प्रहरो यैः । भगवान् प्रचेतसम् ॥४।३०।१८(१२

कुतइति । आसवः पुष्परसः कीर्त्तिश्च । महतांमनस्तो-मुखान्निःसृतम् । मनस्त इति प्रथमार्थेतसि ततः समासः । मनः शुद्धग्रामहद्भिर्व्वर्णित मित्यर्थः । क्वचित् कदाचित् । देहंभृता-मित्यार्षोनुमागमः । संसारापादिका या स्मृतिः स्वरूपाज्ञानम् । कुरुक्षेत्रे मिलिता सुहृदः श्रोक्ष्णाम् ॥१०।८३।३। (१३)

विभ्य इति । विभ्यः प्रगल्भाः । अमृतं सुधा । उदवहानद्यः ।

---

(१) श्रेयदर्शनकारिका स्यन्दीपिका व्याख्या च ।

यस्तूत्तमःश्लोकगुणानुवादः,
सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः।
तमेव नित्यं शृणुयादभीक्ष्णम्,
कृष्णेऽमलां भक्तिमभीप्समानः ॥१५॥
ये तु त्वदीयचरणाम्बुजकोशगन्धम्,
जिघ्रन्तिकर्णविवरैः श्रुतिवातनीतम्।
भक्त्या गृहीतचरणाः परया च तेषाम्,
नापैषि नाथ हृदयाम्बुरुहात् स्व पुंसाम् ॥१६॥

सरितोगङ्गात्रयम्। अतएव त्रिलोक्या इत्युक्तम्। अमलानि पापानि। अनुश्रूयत इत्यनुश्रवं कथातीर्थम्। श्रुतिभिः श्रवणाहत्या अङ्घ्रिजं गङ्गाङ्गसङ्गैः स्नानादिभिः। शुचौ सीदन्तीतिशुचिषदः। उपस्पर्शं आचमनम्। सामीप्येन सेवा च। तीर्थद्वयोपस्पर्शं साध्यस्य शुचिषत्त्वस्य सिद्धवन्निर्देशः कार्य्यकारणयोः पौर्व्वापर्य्यरूपातिशयोक्तिरियम्। ये उपस्पृशन्ति तेशुचयः स्युरित्यर्थः। ब्रह्माद्या श्लोकृष्णम् ॥११।६।१८। (१४)

यस्त्विति। अमङ्गलघ्नत्वेन गीयते। प्रतिवाक्यं सातत्यार्थम् शब्दत्रयम्। गानश्रवणाभीप्सानां प्रकर्षार्थं शुकः ॥१२।३।१५। (१५)

ये त्विति। गन्धः कीर्त्तिरामोदश्च। कोषोभाण्डारागारम्। कुड्मलपक्षेहि गन्धाभावः। श्रुतिर्व्वेदः (१)। चरण ग्रहणं कीर्त्यैकदेशस्यैव श्रुतिगोचरत्वम्। न सर्वकीर्त्तेरिति विज्ञापनार्थं भक्त्या प्रणय पर रसनया। नापैषि नापयासि। ये च कीर्त्तिश्रवण निष्ठास्तेषां मनो न त्यजसीत्यर्थः। ब्रह्मा विष्णुम् ॥३।८।५। (१६)

---

(१) श्रुतिः—श्रूयतेऽनादिकालतो गुरुपरम्परयाऽलौकिकार्थो न तु केनापि क्रियत इत्यर्थः।

NATIONAL ARCHIVES OF INDIA

इत्थं परस्य निजधर्म्मरिरक्षयात्त,
लीलातनोस्तदनुरूपविडम्बनानि।
कर्म्माणि कर्म्मकषणानि यदूत्तमस्य,
शृण्वादमुष्यपदयोरनुवृत्तिमिच्छन् ॥१७॥

इति विष्णु श्रवणम्।

अथ विष्णु-कीर्त्तनम्।

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि।
यदव्याजहारविवशो नाम स्वस्त्ययनं हरेः ॥१८॥

श्रवणस्य माहात्म्यं विषय (दिश)मुक्ता उपसंहरति। इत्थमिति। परो निराकारः। रिरक्षा रक्षितुमिच्छा। आर्षं मनिट्त्वम्। तस्यानुरूपविडम्बनानि। अनुचितानि। तत्स्वरूप माहात्म्य पर्य्यालोचने त्वसदृशानीत्यर्थः। जगत्सृष्टयादि कर्त्तुर्हि कंसादि कोट निरसने कियत् कौतुकम्। कर्म्म पापम्। कषणं हिंसा। शृण्वादमुष्यपदयोरनुवृत्तिमिच्छन्निति राज्ञः। आशीः। अनुवृत्तिं भक्तिम्। शुकः॥ १०।८०।४६। (१७)

श्रवणं स्तुत्वाकीर्त्तनं स्तौतीत्ययमिति। अयमजामिलः। निर्व्वेशः प्रायश्चित्तम् (१) ॥६।२।७। (१८)

---

(१) "प्रयतत्वाद्योपचितं नाशयतीति प्रायश्चित्तम्।
"प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि"। वेदान्तसारः १।३।५।
"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतम्भवेत्। प्रायश्चित्ततत्त्वम्।
कामतोऽप्यवहार्य्यस्तु वचनादिह जायते" ॥ याज्ञवल्क्य स्मृतिश्च।

NATIONAL ARCHIVES OF INDIA

एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम्।
यदा नारायणायेति जगाद चतुरक्षरम् ॥१९॥
स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः (१)।
स्त्री राज पितृगोहन्ता ये च पातकिनोऽपरे ॥२०॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्।
नामव्याहरणं विष्णोर्यतस्तद्विषयामतिः ॥२१॥
न निष्कृतैरुदितैर्ब्रह्मवादिभि-
स्तथाविशुद्ध्यत्यघवान्व्रतादिभिः।
यथा हरेर्नामपदैरुदाहृतै-
स्तदुत्तमःश्लोकगुणोपलम्भकम् ॥२२॥

एतेनेति। अघोनः मद्यवच्छब्दवद्रूपम्। यदा यस्मिन्नेव काले। एतेनैव कालेन। निमेषत्रयमात्रेण। किं द्वादशाब्देन यतो नाम व्याहरणाद् मद् विषयामतिर्भवति ॥ ६।२।८। (१९)

तदितरैः प्रायश्चित्तैस्तुल्यं पापक्षयमात्रफलत्वात्। इति चेन्न तत्रार्हैः न निष्कृतैरिति।

निष्कृतं प्रायश्चित्तम्। पदग्रहणं सुसंस्कृतेषु नामसु शक्त्यतिशयार्थम्। यत् पुनरुत्तमःश्लोकगुणोपलम्भकं व्याहर्त्तुं विष्णुगुणज्ञानं करोति। तदितरेभ्योऽधिकं पुनः पापप्रवृत्तिनिवारणात् ॥ ६।२।११। (२०—२२)

---

(१) 'स्तेनो हिरण्यस्य सुरां पिबंश्च गुरोस्तल्पमावसन् ब्रह्महा पतत्येते चत्वारः पञ्चमश्चावरन् तैः।" छान्दोग्ये। ५-१०-९ :

NATIONAL ARCHIVES OF INDIA

नैकान्तिकं तद्धि कृतेऽपि निष्कृते,
मनः पुनर्धावति चेदसत्पथे ।
तत्कर्म्मनिर्हारमभीप्सतां हरे-
र्गुणानुवादः खलु सत्त्वभावनः ॥२३॥
साङ्केत्यं पारिहास्यं वा स्तोभंहेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥२४॥
पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः ।
हरिरित्यवशेनाह पुमान्नार्हति यातनाः ॥२५॥

[नैकान्तिकमिति] तस्मात्तत् प्रायश्चित्तं नैकान्तिकं नावश्यकम् । हि यस्माद् असत्यर्थे (असत्पथे) धावति । भुक्त्यर्थं काम्यं कर्म्मकरोति । तत् तस्मान्निर्हारं अत्यन्तनाशम् । गुणानुवादः विष्णोर्गुणान् अनुवृत्त्या । नैरन्तर्य्येण वादयति यद् नामव्याहरणम् तत्तेभ्योऽधिकं । काम्यकर्म्मप्रवृत्तिनिवारणात् । सत्वं भावयति विशुद्धोर्ज्जितसत्वं स्वन्तःकरणं करोति ॥ ६।२।१२ (२३)

ननु अजामिलेन पुत्रनामगृहीतं न तु विष्णुनामेति चेत्तत्राह साङ्केत्यमिति । साङ्केत्यमन्यत्रपुत्रादौ सङ्केतितम् । पारिहास्यं विष्णुरसीति परिहासेनारोपितम् । स्तोभं गीतालापपरिपूरणार्थं गृहीतम् । हेलनं किं विष्णुनेति निन्दार्थं । विष्णोरिदं नामेति ज्ञानञ्चेत् तात्पर्य्यं विनापि फलप्रदमित्यर्थः ॥ ६।२।१४ (२४)

यद्यपि विष्णुनामैव पुत्रनामज्ञातञ्च तथापि सम्भ्रमादज्ञातमिति चेत्तत्राह,—पतित इति । अवशेन सङ्केत्यं विना व्यथावेगाद्यैर्निर्गता वर्णास्ते दैवाद् विष्णुनामरूपा जाता इत्यर्थः । तथापि यातनां नार्हति । पापक्षयात् कीर्त्तनं हि तत्र निष्कारणम् । अवणमु

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्।
ततः सद्यो विमुच्येत यद् बिभेति स्वयम्भयम् ॥२६॥
न यद्वचश्चित्रपदं हरेर्यशो-
जगत् पवित्रं प्रगृणीत कर्हिचित्।
तद्वायसंतीर्थमुशन्ति मानसा-
न यत्र हंसा निरमन्त्युशिक्क्षयाः ॥२७॥
तद्वाग् विसर्गो जनताघविप्लवो
यस्मिन् प्रतिश्लोकमबद्धवत्यपि।

निष्प्रयोजनमेवान्यकीर्त्तितनामवद् यस्यान्यवस्थायां सङ्कल्पं विना कीर्त्तयति न च तच्छृणोति तस्यां न पापक्षयः। अतिप्रसङ्गात्। अकारो हि प्रसिद्धं विष्णुनाम। तद् यथा कथञ्चि दृष्टेन कीर्त्तितं श्रुतं (स्मृतं) वा स कोऽपि नास्ति। तस्मादिदं विष्णुनाम तच्च मया कीर्त्तितं श्रुतं स्मृतञ्चेति यस्य ज्ञानं तस्यैव पापक्षयः इत्यश्लोकर्त्तव्यम्। विष्णुदूता यमदूतान् ॥ ६५ (२५)

आपन्न इति। गृणान् कीर्त्तयन्। सूतम् ॥१।१।१४। (२६)

यदित्यादि। वचो वाक्यं चित्रानिपदानि यत्र तत्तथा। जगत् पवित्रं यस्मात् तत्तथा। कर्हिचिदुशन्ति मन्यन्ते मानसाः हंसाः। ब्रह्म मनसि भवाः सनकादयः। विरमन्ति विशेषाद्रमन्ते। उशिक् उत्तमः क्षयो निवासो येषां ते तथा। काकतीर्थपक्षे मानसमरोवरस्थाः ॥१।५।१०। (२७)

विष्णु महिम्नाशून्यं वाक्यं निन्दितत्वात् तत् महिमं स्तौति।

नामान्यनन्तस्य यशोऽङ्कितानियत्,
शृण्वन्ति गायन्ति गृणन्ति साधवः ॥२८॥

इदं हि पुंसस्तपसः श्रुतस्य वा,
स्विष्टस्य सूक्तस्य च बुद्वदत्तयोः ।
अविच्युतोऽर्थःकविभिर्निरूपितो-
यदुत्तमः श्लोकगुणानुवर्णनम् ॥२९॥

प्रायेण मुनयो राजन् निवृत्ता विधिसेधतः ।
नैर्गुण्यस्था रमन्तेस्म गुणानुकथने हरेः ॥३०॥

तद्वागिति। वाग्विसर्गो वाक्यप्रयोगः। जनता जनसमूहस्तस्या अघं पापं तस्य विप्लवो विनाशहेतुः कोऽसौ यस्मिननन्तस्य नामानि अवद्यं दुष्टं पदं यद् यस्मात् तंवाग्विसर्गं साधवः वक्तरि सति शृण्वन्ति। श्रोतरिसति गृणन्ति। उभयाभावे स्वयं गायन्ति ॥ १।५।११। (२८)

इदं इति। सर्व्वस्य सत्कर्म्मणो विष्णुभजनं फलमिति श्लोकार्थः। सूक्तं सदुपदेशः। तस्य ग्रहणं श्रुतं (तस्यार्थावधारणाद्-बुद्वम्) तस्यानुध्यानं स्विष्टम्। दत्तं तपश्च। अविच्युत अविनाशो। नारदः व्यासम् ॥१।५।२२। (२९)

प्रायेणेति। नैर्गुण्यं परंब्रह्म (१) शुकः ॥ २।१।७ (३०)

---

(१) "स वै पुंसां परोधर्मो यतो भक्तिरधोक्षजे" इत्यादितस्त.—१।११।

यन्नामश्रुतमनुकीर्त्तयेदकस्मात्,
आर्त्तो वा यदि पतितः प्रलम्भनाद्वा।
हन्त्यंहः सपदि नृणामशेषमन्यम्,
कंशेषाद्भगवतः आश्रयेन्मुमुक्षुः ॥३१॥
एतन्निर्विद्यमानानामिच्छतामकुतोभयम्,
योगिनां नृपनिर्णीतं हरेर्नामानुकीर्त्तनम् ॥३२॥

पतितः स्खलितश्चार्त्तः क्षुत्त्वा वा विवशोब्रुवन्।
हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥३३॥

संकीर्त्यमानो भगवाननन्तः,
श्रुतानुभावो व्यसनं स्वपुंसाम्।
आविश्यचित्तं विधुनोत्यशेषम्,
यथा तमोऽर्कोऽभ्रमिवातिवातः ॥३४॥

यन्नामेति। यस्यनामश्रुतंसन्नृणां अंहःपापंहन्ति। यश्चानुकीर्त्तयेत् तस्यापि आर्त्तोरोगो। प्रलम्भनं परिहासः। ततः शेषादनन्तात्। अन्यं कं मुमुक्षुराश्रयेत् शुकः ॥५।२५।११। (३१)

एतदिति। योगिनः समाहिताः। शुकः ॥२।१।११। (३२)

पतित इति। क्षुत्त्वा क्षुतं कृत्वा ॥११।१२।४७। (३३)

संकीर्त्यमानेति। अनुभावो महिमा। व्यसनं मलम्। तच्चेद्द्विधा मायिकं कार्य्यञ्च। तत्रोभयोरपि निर्वर्त्त्य विवक्षया क्रमात्तयो (भ्रमयो) रुपादानम्। शुतः ॥११।१२।४८। (३४)

NATIONAL ARCHIVES OF INDIA

मृषागिरस्ताह्यसतीरसत्कथा,
न कथ्यते यद् भगवानधोक्षजः ।
तदेव सत्यं तदुहैव मङ्गलम्,
तदेव पुण्यं भगवद् गुणोदयम् ॥३५॥
तदेव रम्यं रुचिरं नवं नवम्,
तदेव यज्ञवद् मनसो महोत्सवम् ।
तदेव शोकार्णव शोषणं नृणाम्,
यदुत्तमःश्लोकयशोऽनुगीयते ॥३६॥
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥३७॥
यन्नामधेयं म्रियमाण आतुरः,
पतन् स्खलन् वा विवशोऽगृणन् पुमान् ।

मृषेति । मृषा असत्याः । वाच्यस्य मिथ्या भूतत्वात् । असतीः अमङ्गलाः । असत्कथा अपुण्यरूपाः यद् याभिः ॥ ७ अहोऽप्रसिद्धम् । भगवतां श्रीमतां गुणानामुदयो यस्मात्तत्तथा । कास्तर्हि समीच्याह तदेवेति ॥१२।१२।४८। (३५)

(तदेवेति)। रुचिरंप्रीतिवर्द्धनम् । तदेवरम्यं आयतो सुन्दरम् । अतोनवं नवं प्रयच्छत् आपद्यनापदि च । शोक शोषकम् महोत्सवश्च यस्मिन् । सूत श्रोनकादीन् ॥१२।१२।५०। (३६)

कलेरिति । परं वैकुण्ठम् शुकः ॥१२।३।५१। (३७)

यदिति । आतुरः सरोगः । कर्मापापम् । उत्तमागतिर्मोक्षः ।

NATIONAL ARCHIVES OF INDIA

विमुक्तकर्म्मार्गल उत्तमां गतिम्,
प्राप्नोति यच्यन्ति न तं कलौ जनाः ॥३८॥
इत्थं हरेर्भगवतो रुचिरावतार-
वीर्य्याणि बालचरितानि च शन्तमानि ।
अन्यत्र चेह च श्रुतानि गृणन् मनुष्यो-
भक्तिं परां परमहंस गतौ लभेत ॥३९॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुकीर्त्तनमहिमा-
नामाष्टमोऽध्यायः । इत्यष्टमोऽध्यायः ॥८॥

नोयच्यन्ति नपूजयन्ति । शुकः राजानम् ॥१२।३।४४। (३८)

उपसंहरति—

इत्थमिति । रुचिरेति । प्रौढ़चेष्टितानामुक्तिः । सन्तमानि सुख्यात्मकानि, श्रुतानि प्रस्तानि । चकारद्वयमुभयत्र प्राधान्यार्थम् । परां प्रेमात्मिकाम् । शुकः राजानम् ॥ ११।३१।२८ (३९)

इति श्रीहेमाद्रिविरचितकैवल्यदीपिकायां विष्णुकीर्त्तनमहिमा-
नामाष्टमोऽध्यायः ॥८॥
समाप्तोऽष्टमोऽध्यायः ।

NATIONAL ARCHIVES OF INDIA

नवमोऽध्यायः ।

अथ विष्णु-स्मरणम् ।

तस्मिन् प्रविष्टेऽसुरकूटकर्म्मजा,
मायाविनेशुर्महिना महीयसः ।
उप्तो यथाहि प्रतिबोध आगते,
हरेः स्मृतिः सर्वविपद्विमोक्षणम् ॥१॥
एतावान् सांख्ययोगाभ्यां स्वधर्म्मपरिनिष्ठया ।
जन्मलाभः परं पुंसामन्ते नारायणस्मृतिः ॥२॥
यशः श्रियामेव परिश्रमः परा-
वर्णाश्रमाचार तपः श्रुतादिषु ।

तस्मिन् विष्णौ कुटकर्म्म माया प्रदर्शनम् । महिनामाहात्म्येन । हिशब्दो भिन्नक्रमः । हरेस्मृतिर्हीत्यर्थान्तरन्यासः । शुकः राजानम् ॥ ८।१०।५५। (१)

एतावानिति । सांख्यं प्रकृतिपुरुष-विवेकः । योगश्चित्त वृत्ति निरोधः (१)। स्वधर्म्म परिनिष्ठा नित्य नैमित्तिकानुष्ठानम् । एभिस्त्रिभि रेतावान् परोजन्म लाभः । जन्मनः साफल्यम् यदन्ते नारायणस्मृतिः । शुकः राजानम् ॥२।१।६। (२)

यश इति । यशसां श्रीणाञ्च सम्बन्धिषु यशोनिमित्तेषु श्रीनिमित्तेषु आचारादिषु यःपरः केवलः परिश्रमः क्लेश एव नतु

---

(१) पातञ्जलदर्शनं १।१।२ सूः ।

NATIONAL ARCHIVES OF INDIA

गुणानुवाद श्रवणादरादिभि-
रविस्मृतिः कृष्णपदारविन्दयोः ॥३॥
अविस्मृतिः श्रीधरपादपद्मयोः,
क्षीणोत्यभद्राणि च सन्तनोति।
सत्त्वस्य शुद्धिं परमाञ्च भक्तिम्,
ज्ञानञ्च विज्ञानविरागयुक्तम् ॥४॥
विद्या तपो प्राण निरोधमैत्री-
तीर्थाभिषेक व्रतदानजप्यैः।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा,
यथा हृदिस्थे भगवत्यनन्ते ॥५॥

फलम्। यद् भगवत् पादयोरविस्मृतिः। साच गुणानुवादादिभिः ॥ १२।१२।५४। (३)

ननु किमविस्मृत्येति तत्राह। अविस्मृतिरिति। क्षिणोति छिनत्ति। अभद्राणि दुर्व्वासनाः। शंसुखम्। सत्त्व शुद्धिनीरुजकता। ततो भगवति प्रेम। ततोऽन्यत्र विरागः। ततः परोक्षबोधः। ततः साक्षात्कारइत्यर्थः। सूतः शौनकम् ॥१२।१२।५५। (४)

विद्या वैराजोपासना (वैश्वानराद्युपासना) (१)। प्राण निरोधः प्राणायामः। जप्यं प्रणवादि नान्यत् (२) ॥१२।३।४८। (५)

---

(१) छान्दोगो—५।११।१।

(२) "तत्प्रणवस्यार्थं भावनम्" पातञ्जलदर्शनं १।१।२८ सू।

NATIONAL ARCHIVES OF INDIA

तस्मात् सर्वात्मना राजन् हृदिस्थं कुरु केशवम् ।
म्रियमाणो ह्यवहितस्ततो यासि परां गतिम् ॥६॥
म्रियमाणैरभिध्येयो भगवान् परमेश्वरः ।
आत्मभावं नयत्यङ्ग सर्वात्मा सर्वसम्भवः ॥७॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुस्मरणं नाम नवमोऽध्यायः ॥९॥

[illegible] त्मात्। ततो हरिः स्मरणात्। पुरुषः परां गतिं [illegible] नम् ॥१२।३।४८। (६)

[illegible] रिति। आत्मभावं स्वरूपप्राप्तिम्। सर्वात्मना [illegible] सर्वात्मत्वात् सर्वसम्भवत्वात्। भक्तस्य विष्णु [illegible] वापत्तिः। शुकः राजानम् ॥१२।३।५०। (७)

[illegible] विरचितायां कैवल्यदीपिकायां विष्णुस्मरणं नाम [illegible] नवमोऽध्यायः ॥९॥ इति नवमोऽध्यायः।

NATIONAL ARCHIVES OF INDIA

दशमोऽध्यायः ।

अथ विष्णुश्रवणकीर्त्तने ।

एकान्तलाभं वचसोऽनुपुंसाम्,
सुश्लोकमौलेर्गुणवादमाहुः ।
श्रुतेश्च विद्वद्भिरुपाकृतायाम्,
कथामुधायामभिसम्प्रयोगम् ॥१॥
शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम् ।
कालेन नातिदीर्घेण भगवान् विशते हृदि ॥२॥
यथायथात्मा परिमृज्यतेऽसौ,
मत्पुण्य गाथा श्रवणाभिधानैः ।
तथातथा पश्यति तत्त्व सूक्ष्मम्,
चक्षुर्यथैवाञ्जन संप्रयुक्तम् ॥३॥
एतन्मुहुःकौर्त्तयतोनु शृण्वतो
न रिष्यते जातु समुद्यमः क्वचित् ।

एवं प्रत्येकं श्रवणादिभिः स्तुत्या व्यतिषङ्गेणस्तोतुमाह । एकेति । नु स्वाहो । उपकृता निरूपिता मैत्रेयो विदुरम् ॥३।६।-३६। (१)

शृण्वत इति । नाति दीर्घोऽत्यल्पः ब्रह्मा नारदम् ॥२।८।४। (२)

यथेति । तत्त्वेषु प्रकीर्त्त्यादिषु सूक्ष्मं पुरुषाख्यम् । श्रीभगवान् उद्धवम् ॥११।१४।२६। (३)

NATIONAL ARCHIVES OF INDIA

यदुत्तमः श्लोकगुणानुवर्णनम्,
समस्त संसार परिश्रमापहम् ॥४॥

इति वोपदेव विरचिते मुक्ताफले
विष्णुश्रवण कीर्त्तने ॥

अथ विष्णु स्मरण कीर्त्तने ।

वयन्विह महायोगिन् भ्रमन्तः कर्म्मवर्त्मसु ।
त्वद्वार्त्तया तरिष्याम स्तावकै र्दुस्तरंतमः ॥५॥
स्मरन्तः कीर्त्तयन्तस्ते कृतानि गदितानि च ।
गत्युस्मितेक्षण क्ष्वेलिर्यन्नृलोक विडम्बनम् ॥ ६ ॥

अथ विष्णु-श्रवण-कीर्त्तन-स्मरणानि ।

अशेष संक्लेश शमंविधत्ते

एतदिति । एतद्विष्णुयशः । नोरिष्यते नोनश्यति । यत् यस्मात् अनुवर्णनमिति । पक्षे द्विर्निजन्तम् । तथाच सति अन्यस्मिन् वक्तरि स्वस्य श्रवणम् । स्वार्थनिजन्तपक्षेतु कीर्त्तनमिति इदमपि सुतम् । शुकः राजानम् ॥ ८।१२।४६ (४)

इति कैवल्यदीपिकायाम् विष्णुश्रवण कीर्त्तने ॥

अथ विष्णुस्मरणकीर्त्तने । (वयन्विहेति) त्वद्वार्त्तया । अनुसंहितया । कीर्त्तितया वा । अन्यथास्येहपाठश्चिन्त्यः । तावकैर्भक्तैः सहतरिष्यामः ॥ ११।६।४८ (५)

स्मरन्त इति । तस्मिन् उत्तमं श्लोक्यम् । 'क्ष्वेलिः परिहासः । "इन्द्वैकत्वात् पुंसकत्वम्" । उद्धवः श्रीकृष्णम् ॥ ११।६।४८ (६)

अथ विष्णुश्रवण-कीर्त्तन-स्मरणानि । अशेषेति । अशेष

गुणानुवादश्रवणं मुरारेः।
किम्वा पुनस्तच्चरणारविन्द
परागसेवारति रात्मलब्धा ॥७॥
अयातयामास्तस्यासन् यामाः स्वान्तर यापनाः।
वृत्रघ्नतोध्यायतो विष्णोः कुर्व्वतोव्रवतः कथाम् ॥८॥
श्रवणात् कीर्त्तनाद्ध्यानात् पूयन्तेऽन्तेवसायिनः।
तव ब्रह्ममयस्येशकिमुतेज्याभिमर्शिनः ॥९॥
मर्त्यस्तया ननु समेधितया मुकुन्द-
श्रीमत्कथा श्रवण कीर्त्तण चिन्तयेति।

संक्लेशाः। "अविद्याऽस्मितारागद्वेषाभिनिवेशाः"। अनुवादः कीर्त्तनम्। सेवामनसःसन्निधानम्। तत्परतिः प्रीतिः। आत्मलब्धा स्वाभाविकी। मैत्रेयो विदुरम् ॥ ३।७।१४ (७)

अयातेति। तस्य स्वायम्भुवस्य। यात यामाः उपभुक्ताः। तद्विपरीता अयातयामाः। पुनः पुनरूपभुज्यमानाऽप्यपूर्व्ववदुपभोग्येत्यर्थः। यावद्वियामैर्मन्वन्तरं समाप्तं तावन्तो यामाः। विष्णुकथासम्बन्धादुत्तरोत्तरम् रमणीयाजाता इत्यर्थः। कुर्व्वतः स्ववाक्यैर्ब्रुवतः। मैत्रेयः ॥ ३।२२।३५ (८)

श्रवणादिति। अन्तेवसायिनोऽन्त्यजाः। ब्रह्ममयो ब्रह्मरूपः। ईज्यादर्शनम्। अभिमर्शः स्पर्शः। तौ विद्येते येषां ते तथा। नारदः श्रीकृष्णम् ॥ १०।७०।४३ (९)

मर्त्य इति। तया ब्रह्मसभादौ प्रसिद्धया श्रवणकीर्त्तनचिन्तयेति। इन्द्वैकत्वेऽपि नपुंसकत्वमिति कीर्त्यजयेति अत्रोक्तम्।

NATIONAL ARCHIVES OF INDIA

तद्धाम दुस्तर कृतान्तजवापवर्गं
ग्रामाद्वनं क्षितिभुजोपिययुर्यदर्थाः ॥१०॥
यानोह विश्व विलयोद्भवहेतुः
कर्म्माण्यनन्यविषयाणि हरिश्चकार ।
यस्त्वङ्ग गायति शृणोत्यनुमोदते वा
भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥११॥
तस्याविताः स्थिरचरेशितुरङ्घ्रिमूलं
यत्स्थं न कर्म्म गुणकाल रजः स्पृशन्ति ।
यद्वै स्तुवन्ति निनमन्ति जपन्त्यभीक्ष्णं-
ध्यायन्ति वेद-हृदयाश्रुनयस्तदाप्त्यै ॥१२॥

तद्धाम वैष्णवं स्थानम् । कृतान्तस्य यवो वेगः । अपवर्ज्जनं निवृत्तिर्यस्मिन् तत् । अकालकलितमित्यर्थः । यदर्था मद्धामाभिलाषाः । शुकः ॥ १०।८०।५० (१०)

यानोति । हृत्तिः स्थितिः । अनन्यविषयाणि अनन्यसाध्यानि गानं कीर्त्तनम् । अनुमोदनम् मानसस्वीकारः । स च स्मरणपूर्व्वकः । शुकः ॥ १०।६८।४५ (११)

तस्येति । अवितुः रक्षकस्य ईशितुः स्रष्टुः । संहर्त्तुश्चाङ्घ्रिमूलम् । तदुत्तरश्लोकस्थेन भजामीत्यनेनान्वयः । यत्स्थं यत्र स्थितम् कर्म्म । पुण्यपापे । गुणारजप्रभृतयः । कालोमृत्युः । तएव विकारापादकत्वात् रजो रोगाः । एते स्पृशन्त्यपिनो-दूरे बाधवार्त्ताः । स्तुतिर्व्वाचा गुणकीर्त्तनम् । जपो मनसा । "जपक्रुदुच्चार" इति धातुसूत्रात् । निनमन्ति नमन्ति । उपसर्गयोगादयमर्थः । "धात्वर्थं

मनसोवृत्तयोनःस्युः कृष्णपादाम्बुजाश्रयाः ।
वाचाभिधायिनोर्नाम्नां कायस्तत् प्रह्वणादिषु ॥१३
कर्म्मभिर्भाम्यमाणानां यत्तत्रापीश्वरेच्छया ।
मङ्गलाचरितैर्दानैरतिर्नः कृष्ण ईश्वरे ॥१४॥

इति श्रीमदेवविरचितेते मुक्ताफले विष्णुभक्त्यङ्ग
वर्गप्रकरणं नाम दशमोऽध्यायः ॥*॥
इति दशमोऽध्यायः ॥१०॥

वाधते कश्चित् कश्चित्तमनुवर्त्तते" इत्युपसर्गवृत्ती । वेदो हृदये येषां ते तथा ॥ तदाख्ये विष्णुप्राप्तये । मार्कण्डेयः नारायणम् ॥१२।८४२(१२)

मन इति । अभिधायिनोः अभिधायिन्यः । तेषु नामसु । प्रह्वणम् नम्रता । सा च कीर्त्तनस्य पृथगुक्तत्वात् । श्रवणादरेणेयर्थ सिद्धम् । आदिशब्दात् तालस्वरादि ॥ १०।४७।६६ (१३)

कर्म्मभिरिति । मनसो वृत्तय इत्येव सिद्धे सति न इति पुनर्व्वचनं त्रिवर्गमध्येऽपि स्मरणस्यान्तरङ्गतां वक्तुं एतान्येव हि शास्त्रेषु श्रवणमननिदिध्यासनशब्दैरुच्यन्ते । नन्दादय उद्धवम् ॥ १०।४७।६७ (१४)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां
विष्णुभक्त्यङ्गवर्गप्रकरणम् ।
[इति दशमोऽध्यायः । समाप्तं पूर्व्वार्द्धम् ॥]

NATIONAL ARCHIVES OF INDIA

एकादशोऽध्यायः ।

अथ विष्णुभक्तप्रकरणम् ।

तच्च विष्णुभक्तस्य लक्षणं भेदाश्च ।

सकृन्मनः कृष्ण पदारविन्दयो-
र्निवेशितं तद्गुणरागियैरिह ।
नते यमं पाशभृतश्च तद्भटान्-
स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥१॥

एवमियता प्रबन्धेन "विष्णुं पञ्चात्मकम्" (१) इत्यस्य पादत्रयम् विविच्य शिष्टं व्याख्यातुमिदमारभ्यते। अथेति। तत्रापि "नाग्रहीतविशेषणा बुद्धिर्विशेष्ये चोपजायते" (विशेषणमुपसंक्रामतीति) इति न्यायात् सामान्यपरिहारेण विशेषप्रतिपत्त्यसम्भवात् भक्त सामान्य लक्षणमवतारयितुमाह तत्रेति। सकृदिति। सकृदित्यादिषु अपिशब्दः प्रत्येकं [सम्बध्यते]। सकृदपि किंपुनः अभ्यासेन। मनः संशयात्मकमन्तः करणम्। किं पुनर्निश्चयात्मिका बुद्धिः। पदारविन्दयोरपि किं पुनः सर्वमुर्त्तौनिवेशितम् बलादपि। किंपुनः स्वतोनिविष्टम्। तद्गुणेष्वपि रागि किंपुनः तत्स्वरूपे। यैरिहेति सामान्य वाचिभ्यां सर्वनामभ्यां मनोनिवेशने जातिदेश विशेषानपेक्षेति गम्यते। यैर्निवेशितं ते बलादपि ते भक्ता इति शेषः। तेषां फलमाह। नेति चकारादृयमञ्च पाशभृतं पाशग्रहणमन्यस्यापि कराल दंष्ट्रत्वादेः भीषणस्योप लक्षणं यममपि न पश्यन्ति किम्पुनर्निरयम्। स्वप्नेऽपि किंपुनः प्रत्यक्षेण न पश्यन्ति किंपुन-

---

(१) मुक्ताफलम् १।१। श्लोकः।

स नवधा भक्तः नवविधत्वे हेतुमाह भक्तीति।
भक्तिर्विहिताविहिता च।
भक्तिरसस्यैव हास्य-शृङ्गार-करुणरौद्र-भयानक-
वीभत्स-शान्ताद्भुत-वीररूपेनानुभवात्।
इति मुक्ताफले भक्तानां लक्षणं भेदाश्च॥
व्यासादिभिर्वर्णितस्य विष्णोर्विष्णु
भक्तानाम्बाचरित्रस्य नवरसात्मकस्य श्रवणादिना-
जनितश्चमत्कारो भक्तिरसः॥

तत्र हास्यरसे गोप्यः। स च त्रेधा। वत्सान्
मुञ्चन् क्वचिद् समये क्रोश सञ्जातहासः
स्तेयं स्वाद्वत्यथदधिपयः कल्पितैःस्तेययोगै॥
मर्क्कान् मोक्ष्यन् विभजति सचेन्नात्तिभाण्डंभिनत्ति
द्रव्यालाभे स्वगृह कुपितो यात्यु प क्रोश्यतोकान्॥२॥

स्तर्ज्जनादि। कुत एतद् हि यस्मात् चौर्णनिस्तता आचरित प्रायश्चित्ताः। पापोपप्लुतानां हि यमदर्शनादि, भक्त्या च सर्व्वपाप क्षय इत्यसकदुक्तम्। ततश्च भगवन्निविष्टचित्तो भक्त इति लक्षणार्थः। शुकः॥ ६।१।१८ (१)

एवं भक्त सामान्य लक्षण मुक्ता तद् विशेषमाह। सभक्तः नवविधत्वे हेतुमाह। भक्तीति। भक्तिर्विहिताविहिता च। सैव-परां प्रकष रेखामापन्ना रसः। यदाहुः "भावाएवाति सम्पन्नाः प्रयान्तिरसतामसौ"ति भक्तिरसानुभवाच्च भक्तः। यथा हास्यानुभवात् हास्यइत्युच्यते। सचानुभवो नवधा। हास्यादि भक्ति भेदेन,

NATIONAL ARCHIVES OF INDIA

हास्यादय एवहि भगवति प्रयुज्यमाना। "तस्मात् केनाप्युपायेन मनः कृष्णेनिवेयेदिति" (१)। भक्ति लक्षणाक्रान्तत्वाद् भक्तिरस पदवी भासाधयन्ति इति भावः। हास्यादि लक्षणन्तु वक्ष्यते ते वामी नवापि सुख दुःख महात्मक त्रैगुण्य व्यतिकरोद्भवाः। तथाहि प्रथमे त्रयो रजोमूलाः। मध्यास्तुतमोमूलाः। चरमे सत्वमूला इति। हास्यदयोहि रजः प्रभृतीनां विकार इत्युक्त मेकादशस्य पञ्चविंशाध्याये तथापि प्रथमेषु त्रिषुक्रमात् सत्त्व संमिश्रम्। तमः संमिश्रम्। सत्त्वतमः संमिश्रञ्च। रजोमूलं मध्येषु रजोमिश्रं सत्त्वमिश्रं रजःसत्त्वमिश्रञ्च तमः। चरमेषु तमोमिश्रं रजस्तमोमिश्रञ्च सत्त्वं हेयाभिधान क्रमेण चैष रौद्रादीनां तामसत्वेनामङ्गलत्वात् प्रथम मनभिधानम्। ननु तथापि कार्ष्ण्य स्नेहनीयत्वेन सर्व्व प्राणीनामत्यन्त परिचितत्वात् (२) "शृङ्गारोनायकोरसः" इति नाट्याचार्य्य प्रसिद्धेः। शृङ्गार प्राधान्य मियत्तिप्रप्नोतीति व्युत्पत्तेश्च। रसेषु शृङ्गारस्य प्राधान्य मितिगम्यते। ततश्च तस्यैव धुरिनिवेशनमुचितम्। किमिति हास्यरसोऽभिनिवेशितः। सत्यं किन्तुनात्र केवल्यपरे शास्त्रे भक्तिपरः शृङ्गारः प्रधानमिति द्योतयितु माचार्य्येण नेषः प्रथम मुक्तः। एवं सति कस्मिन्नपि प्रथम मभिधातव्ये हास्यरसस्याल्प परिकरत्वात् सएवोक्तः। स्थायिभावादय स्त्वेषां भरतादावुक्ताः। तथाहि "हासोरति शोकरोषभो-जुगुप्सा-श्रम स्मय-उत्साहश्च क्रमादेषु "स्थायिभावा रसेष्वमी" (३)। तत्र वाग्वेषादि वैकृतेश्चेतोविकाशोहासः। परस्पर माश्लेषन्धोरतिः।

---

(१) भागवतम् ७।१।३१ श्लोकः।

(२) भरतप्रणीतनाट्यशास्त्रे शृङ्गाररसनिरूपणे।

(३) भरतमुनि-प्रणीतनाट्यशास्त्रं, भरतप्रणीतामरटीकायां, भक्तिरसामृतसिन्धौ दक्षिणभागेप्रथमलहर्य्यां साहित्यदर्पणे—तृतीयपरिच्छेदे विशेषतोऽस्ति।

NATIONAL ARCHIVES OF INDIA

इष्टनाशादि प्रभवं चित्तस्य वैधुर्य्यं शोकः। प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोधः। रौद्र शक्त्यादि जनितं लोभश्च प्रकृतिः क्वचित्तस्य वैक्लव्यं भयम्। दोषदर्शनादिभिः पदार्थानां गर्हणाजुगुप्सा। पदार्थेषु तृष्णाक्षयः शमः। तेष्वेव लोकसीमातिक्रमस्य दर्शनात् चित्तस्य विस्मृति र्विस्मयः। कार्य्यारम्भेषु संरम्भः स्थेयानुत्तम प्रकृतिरुत्साहः। 'तथा' सितः श्यामः कपोतश्च रक्तः कृष्णश्चनीलकः। विशदः पीत गौरौचेत्येषु वर्णाःक्रमादमी" (१)। तदुपयोगस्तु "चित्ते ध्याने च ध्याता च ते मुखरोगं निर्हरन्तो" त्यभिनवगुप्तपादाः। "प्रथमो मन्मथयमौरुद्रकालौ यथाक्रमम्। महाकालाजितौ ब्रह्म महेन्द्रास्तेषु देवताः" (२)। एव मेवम्विधहास्यादि नवक भङ्ग्या भक्तिरसोऽनुभूयते। ननु कथं भक्ते रसत्वं रसलक्षणाभावात्। तत्र दशरूपकादौ (३) "विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः। आनीयमानः स्वाद्यत्वं स्थायिभावोरसःस्मृतः॥ (४)

एतद्विवृणवते। वक्ष्यमाणस्वभावैर्विभावादिभिः काव्योपात्तैरभिनयोपदर्शितैर्वा श्रोतृप्रेक्षकानामन्तर्विपरिवर्त्तमानो रत्यादिस्थायि स्वादगोचरतां निर्भरानन्द सम्विदात्मतां नीयमानो रसस्तेन रसिकाः सामाजिकाः। काव्यन्तु तथाविधानन्द सम्विदुन्मीलनहेतुत्वेन रसवत्। "आयुर्घृतमिति वद्" (५) विभावादि लक्षणन्तु "कारणान्यथ कार्य्याणि सहकारीणि यानि च। रत्यादौ स्थायिनो लोके तानिचेन्नाट्य काव्ययोः॥" विभावा अनुभावास्ते

---

(१) अमरटीकायां भरतः। भरतमुनेः प्रणीतनाट्यशास्त्रं च।

(२) भरतसूत्रव्याख्याने परमभट्टारकाभिनवगुप्तपादाचार्य्याः।

(३) दशरूपके

(४) उज्ज्वलनीलमणौ भक्तिरसामृतसिन्धौ काव्यप्रकाशे च।

(५) ब्रह्म संहिता प्रथम श्लोकटीकायां श्रीजीव गोस्वामी।

कथ्यन्ते व्यभिचारिणः ॥" (१) विभावादेधा केचिदालम्बनरूपाः। तथा शृङ्गारे गोप्योगोविन्दश्च। केचिदुद्दीपका यथात्रैव चन्द्रतपादयः। अनुभावास्तु कटाक्षादयः। "पृथग्भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विकाः। सत्त्वादेव समुत्पत्तेस्तच्च तद्भाव भावनम् ॥" ते च "स्तम्भ प्रलय रोमाञ्चा स्वेदोवैवर्ण्यवेपथुः। अश्रुवैस्वर्य्यमित्यष्टौ स्तम्भोऽस्मिन्निक्रियाङ्गता। प्रलयोनष्टसंज्ञत्वं शेषाःस्युर्व्यक्त लक्षणाः ॥ विशेषादाभिमुख्येन चरन्तोव्यभिचारिणः। स्थायिन्युन्मग्ननिमग्नाः कल्लोलाइव वारिधौ ॥" ते च "निर्वेद ग्लानिशङ्काऽमर्ष धृति जड़ता हर्षदैन्योग्रचिन्ता, त्रासेर्ष्यामर्षगर्व्वाः स्मृति मरणमदाःसुप्तिनिद्रावरोधः। व्रीड़ापस्मार मोहाः समति रलसता वेगतर्कावहित्था, वाध्युन्मादौ विषादौत्सुकचपलता त्रिंशदेतेत्रयश्च ॥" "विशुद्धैरविशुद्धैर्व्वा भावै र्विच्छिद्यतेनयः। आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥" (२) एवम्बिधविभावादि संयोगाद्रसो निष्पद्यते। तस्य च मुख्यया वृत्त्या रामादावनुकार्य्येवृत्तिः। नटरूपवलादित्येकः पक्षः अनुकर्त्तर्य्येवेति द्वितीयः सामाजिकेष्विति तृतीयः। रससंविद उभयतोदत्तपादत्वादनुकर्त्तरि सामाजिकेषु चेति चतुर्थः (३) स च रसः कार्य्य इति केचित् ज्ञाप्यइत्येके भोग्यइतन्ये व्यङ्ग्य इत्यपरे सुधीभिस्तु तत्रैवानुसन्धेयाः ग्रन्थ गौरव भयान्नेति प्रतन्यते।

---

(१) काव्य प्रकाशे,—"विभावाचनुभावाश्च कथ्यन्ते व्यभिचारिणः।
व्यक्तः सतैर्विभावाद्यैः स्थायी भावो रसः स्मृतः" ॥

(२) भावस्त्रिविधः। स्थायि व्यभिचारि सात्त्विकाः। रतिहास शोक क्रोध उत्साह भय जुगुप्सा विस्मयादयः स्थायिभावाः। निर्वेदग्लानि शङ्का असूयादयः व्यभिचारिणः। खेद स्तम्भ रोमाञ्च स्वरभङ्गादयः सात्त्विकाः इत्यमरटीकायां भाव शब्दे भरतः उज्ज्वल नीलमणौ अनुभावविहति प्रकरणे।

(३) दशरूपके नाट्यसूत्र व्याख्याने च।

तस्मादिभावादि रससामग्री विरहान्न भक्तेरसत्वम्। अतएवाय मन्यैरेवं भक्तावपिवाच्यमिति वदद्भि प्रत्यादिष्टः। अत उत्तरं पठति व्यासदिभिरिति वर्णितस्य चरित्रस्य विष्णुभक्ता गोप्यादयः श्रवणादिनेत्यादि शब्दादर्शन कीर्त्तन स्मरणाभिनयाः। चमत्कारः सामाजिकानां हि यस्मादेवं सामग्रीको भक्तिरसस्तस्मात् अनपह्नवनीय इत्यर्थः। तचैषा—सामग्रो केनाप्युपायेन मनोनिवेशः स्थायी। चरित्र श्रवणादय. उद्दीपन विभावाः। विष्णु भक्ताश्चालम्बनमनुभावास्तु स्तम्भादयो वक्ष्यमाणा यथायोग्यं धृत्यादि व्यभिचारिणश्च। उपायस्तुरति हास्यादि कविभिर्वर्णितस्येत्यनेन महाकवि प्रबन्ध समर्प्यमाणेष्वेव रस व्यवहारो नान्यत्रेत्युक्तम्। एवमेवैतत् अनुकार्य्येषु हि जानकी राम भद्रादिषु रत्यादिमात्रम् नतु रसत्वं तस्य लोकोत्तर चमत्कार रूपत्वात्। चमत्कारश्च यद्यपि शृङ्गारादौ क्वचिदस्ति तथापि भयानकादावनुलम्भान्न तत्र स व्यवहारः। अतएव च तानिचात्राद्य काव्ययो रित्यादि विशेषणानि। अभिनयैरुपदर्श्यमाणादपि सन्दर्भे समर्प्यमाणोरसोऽतिशेदते। अतएवोक्तं "कविवागभिनेयश्च तदुपायोद्विधेष्यते। वस्तुशक्ति महिम्नातु प्रथमोऽत्रविशिष्यत" इति (१)। यस्त्वभिनव गुप्त हेमचन्द्राभ्या मेवं भक्तावपि वाच्यमित्युक्तम् (२)। तदसत् रसत्वस्य दर्शितत्वात्। सामग्रीसङ्गावेऽपि प्रत्याख्यान मरोचकतामात्र शरणम्। नवसङ्गच्छमानोऽप्ययं असर्व्वविषयत्वाद्रसत्वात्च्यवतामिति चोद्यम्। तथासति सार्वरसोच्छेदापातात्। तथाहि श्रोत्रियजरन्मीमांसकादयो हि

---

(१) श्रीमदभिनवगुप्तपादाचार्य्येण भरतमुनेर्नाट्यशास्त्रस्य धन्यालोकस्य सविस्तृतं व्याख्यानं कृतं तत्र तत्र सर्वं विशदमस्ति। तेन शैवदर्शने गीतार्थो अत्यन्तं ज्ञानेकि सन्दर्भोविरचिताः।

(२) सूरि हेमचन्द्राचार्य्योऽनेनालङ्कारचूडामणौ सर्वमुक्तम्। कैश्चिन्नयेऽयं जैनाचार्य्यो नृपतिकुमारपालस्य गुर्जराधिपस्य गुरुरिति।

NATIONAL ARCHIVES OF INDIA

नाट्यमण्डपान्त अपि चमत्कारामावात् मौलिक-प्रायाएव। एवं प्रशान्त ब्रह्मचारि प्रभृतय: शृङ्गार रसास्वादे वहिरङ्गागाढ़ रागाणाञ्च शान्तरस चर्व्वणानभिज्ञत्वम्। अननुभूत शोक स्पर्शाणां च करुण रसास्वादावसरे पाषाण प्रख्यत्वम्। तस्मात् सवासनस्यैव रस-चर्व्वणेति सर्वथा निस्तूषं भक्तिरसदर्शनम्॥ ननु तथाप्यल्प मिदमुच्यते। सनवधेति। सत्येव हि रसान्तराख्यपि (१) भोज-राजादिभि र्दर्शितानि। तथाहि स्नेह: स्थायिभाव:। प्रेयान् यथा "यदेव रोचते मह्यं तदेव कुरुते प्रिया। इतिवेति न जानाति तत् प्रियं यत् करोति सा॥" अत्र वत्सल प्रकृते धीर ललित नायकस्य प्रियालम्बन विभावो विषय:। सौन्दर्य्यादयुद्दीपन विभावो, मोहमति धृति स्मृत्यादि व्यभिचारो। स्नेह: प्रेयानिति प्रतीयते। तथा सतिस्थायिभावादुदात्त:। यथा (२) "साधारणो निरातङ्क: कन्यामन्योपि याचते। किंपुनर्जागतां जेता प्रप्रोत्र: (प्रयोक्तृ:) परमेष्ठिन:॥" अत्र हिरामस्योदात्त प्रकृते: सीतेयं मम स्त्रीकार योग्येत्येवं रूपेण प्रवृत्तामति:। रावण प्रार्थना लक्षण प्रोत्साह-नाभ्यासुह्यमाना जायमान वितर्कवितर्क व्रीड़ाऽसहिष्णु स्मृत्यादिभि: कालोचितोत्तरानुमोयमानेश्च विवेक चातुर्य्य धैर्य्यौदार्य्यादिभि: संसृ-ज्यमाणोदात्त रसरूपेन निष्पद्यते। गर्व स्थायिभाव उद्धत:। यथा "धृतायुधोयावदहं तावदन्यै: किमायुधै:। यदाण सिद्धमन्त्रेण मम तत्केनसेत्स्यति (३) इति। मेवं मौलिकस्य स्थायिन एवात्र सद्भावात् स्नेहादयो हि व्यभिचारिषु तेवेर पठिता:। "गर्व स्नेहो धृतिर्व्रीड़ि" त्यादिना। व्यभिचारिण: स्थायिनश्चेतितु 'मम

---

(१) श्रीमद्भोराज प्रणीत सरस्वतीकण्ठाभरणे, साहित्य दर्पणे चन्द्रालोके च।

(२) भरत प्रणीतामरव्याख्यायां, अलङ्कार कौस्तुभे च कविकर्णपुरीये।

(३) उज्ज्वल नीलमनौ व्यभिचार भावप्रकरणे।

NATIONAL ARCHIVES OF INDIA

मातावन्ध्येति वत् विप्रतिसिद्धं वचसि एवमप्यूच्यमाने व्यभिचारि संख्ययारससंख्यापत्तिःस्यात्। अतएवेदमस्यृष्टं भरतादिभिः। एतेन गर्व स्थायिभावो लोल्यनामाऽपरः रस इत्यपि प्रत्यु(यु)क्तम्। तस्मादयुक्त मुक्तं आचार्येण स नवधेति॥

(१) भक्तिरस एव रसस्यादिरूपेन नवधानुभूयत इत्युक्तम्। तत्र निदर्शनानि ब्रुवानो हासः स्थायिभावे। विकृतवेषालङ्कार धार्ष्ट्य लौल्य कुहकाः सत्प्रलाप व्यङ्गदर्शन दोष उदाहरणादि विभावेनाऽऽसावष्ट (स्व) कपोल स्यन्दन दृष्टि व्याकोशाकुञ्चन स्वेदाख्यराग पार्श्व-ग्रहणाद्यनुभावेऽपि अवहित्थालस्य तन्द्राचपा स्वप्नादि सञ्चारिणि। हास्यरसेगोप्योभक्ता इत्यादि (ङ)। तत्रेति। सचत्रेधा। उत्तम मध्यमाधमेषु स्मितादिभेदात्। यदाह भरतः। (२) "ईषद्विकसितैर्गण्डैः कटाक्षै सौष्ठवान्वितैः। अलक्षित द्विजंधीर मुत्तमानां स्मितं भवेत्। आकुञ्चिताक्षि गण्डं यत् श्वसनं मधुरं तथा। कालागतं साम्यरागं तद्विहसितभवेत्। अस्थान हसितं यत्तु साश्रुनेत्रं तथैव च। उत्कम्पितांसकशिरः तच्चापहसितं भवेत्। तत्रापि त्रीणि च। (३) प्रकृतावेव भूयिष्टं दृश्यते रसः इति भरत वचनादृयशोदादिषु तमाह। वत्मानिति। क्रोशे मानेत्याक्रोशे। स्तेयं चौर्य्यलभ्यं नतु दत्तम् दधिपयश्च। योगे रूपायैः। मर्कान् मर्कटान्। भोक्ष्यन् भोक्ष्यमाणः सन्। वैशब्दश्चेदर्थे। उपक्रोश्य रोदयित्वातोकान् बालान्॥ १०।८।२९ (२)

---

(१) अभिनव गुप्तपादाचार्य्येण नाट्यसूत्र व्याख्याने।

(२) नाट्यसूत्रे तद्व्याख्याने च।

(३) भरत प्रणीत नाट्य शास्त्रे अमरटीकायां भरत कृताया च। भक्तिरसामृत सिन्धूत्तर विभागे प्रथम लहर्य्यां। साहित्य दर्पणे तृतीय परिच्छेदे। गरुड़ पुराणे ६६ अः, ४७ श्लोक।

हस्ताग्राह्यैरचयतिविधिं पीठकोलूखं ।
श्छिद्रं ह्यन्तर्निहित वयुनः शिक्यभाण्डेषु तद्वित् ।
ध्वान्तागारेध्रुतमणिगणं साङ्गभर्थं प्रदीपं
काले गोप्योयर्हिगृहकृत्येषु सुव्यग्र चित्ताः ॥३॥

एवं ध्यार्ह्यान्युशति कुरुतेमेहनादीनिवास्तौ
स्तेयोपायैर्विरचित कृतिः सुप्रतीको यथास्ते -
दृत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिः ।
व्याख्यातार्थां प्रहसितमुखीनह्युपालब्धुमेच्छत् ॥४॥

हस्तेति। विधिरुपाय। अन्तर्निहितस्य नवनीतादेः। वयुने ज्ञानेसति। अर्थं प्रदीपं अर्थं प्रकाशकम्। स्वाङ्गं रचयति। यरहीति रेफ हकारयोर्विश्लेषःछन्दोहनुरोधात् ॥ १०।८।३० (३)

एवमिति। स कृष्णः। उशति कमनीये वस्तुनि। वास्तुर्वेश्मभूः। विरचितकृतिः कृतकार्य्यः। सुप्रतीकः शोभनावयवः। नैश्चल्य लक्षण सभ्यत्व नाट्यात् सभये भयविलोल नयने। यस्मिन् श्रीमति भगवन्मुखे तदालोकिनीभिः व्याख्यातः अर्थो वत्स्य मोचनादिर्यस्य सा यशोदा। उपालब्धुं तर्जितुम्। अत्र यशोदाया उत्तम प्रकृतिकत्वात् उत्तम हास्यम्। प्रहसितमुखी अतएव प्रकर्षार्थः प्रशब्दादेव आलम्बनम्। वत्समोचनादिधार्ष्टर्यम् विभावः। अनुभावः यशोदायां रसाभिव्यक्तिः। सञ्चारिणस्तुत्वाः ।१०।८।३१॥ (४)

NATIONAL ARCHIVES OF INDIA

कृष्णस्य गोप्योरुचिरं रीक्ष्य कौमार-चापलम्।
शृण्वत्याः किलतन्मातुरिति होचुः समागता ॥५॥
गोपकन्याः।
तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः।
व्रीड़िताः प्रेक्ष्यचान्योन्यं जातहासाननिर्ययुः ॥६॥

इति मुक्ताफले हास्यरसः ॥

कृष्णस्येति श्लोको वक्तृकथनार्थः। गोप्यो यशोदा।१०।८।२८। (५)

मध्यम हास्यमाह। तस्येति। तस्य श्रीकृष्णस्य। तद्-वस्त्रादान रूपम् क्ष्वेलनं परिहासचेष्टा। व्रीड़िता नग्नत्वात्। न निर्ययुर्लज्जयात्। अत्र दैव आलम्बनम्। क्ष्वेलनं विभावः। अन्योन्य प्रेमलक्षणमनुभावः। व्रीड़ासञ्चारो। न चात्र शृङ्गार एव हास्याङ्गभूतोवेतिवाच्यम्। अद्यापितासां कौमारानपगमात्। शृङ्गारोहि युवप्रकृतिः। अतएवाचार्य्येण 'गोपकन्या' इत्युक्तम्। तासाञ्च यशोदापेक्षया मध्यमत्वेन हास्य मध्यमत्वं तृतीयं स्वयं स्वसंज्ञेयम् शुकः।१०।२२।१२॥ (६)

इति हेमाद्रि विरचितायां कैवल्यदीपिकायां हास्यरसः ॥

NATIONAL ARCHIVES OF INDIA

शृङ्गाररसो द्विविधः। सम्भोगो विप्रलम्भश्च।
तत्र सम्भोगशृङ्गारे कौरवेन्द्र पुरस्त्रियः॥
सर्वे किलायं पुरुषः पुरातनो
य एक आसीदविशेष चात्मनि।
अग्रे गुणेभ्यो जगदात्मनीश्वरे
निमीलितात्मन् निशिसुप्तशक्तिषु॥७॥

अथरति स्थायिन मुज्ज्वल वेषात्मक मुक्तम् युवप्रकृतिकं स्त्रीपुंसहेतुकं माल्य-ऋतु-शैल-पुर-हर्म्य-नदी चन्द्रोपवन-दोर्घिका जलक्रीड़ादि श्रूयमानानुभूयमान विभावं जुगुप्सालस्यौष्टवर्जसञ्चारिणं गुणं दीर्घापाङ्गस्मिताद्यनुभावं शृङ्गारं सप्रभेदमाह। शृङ्गारेति। स्त्रीपुंसयोः सम्बन्धतया भोगः सम्भोगः। स च सम्बन्धश्चतुर्धा। परस्पर दर्शन स्पर्शन संजल्प सम्प्रयोगभेदात्। भेदान्तराणां तत्रैवान्तर्भावः। तथाहि कुसुमावचयदर्शने। चुम्बनालिङ्गना क्रीश्रग्रहादयो हि स्पर्शने। चन्द्रोदय वर्णनादयस्तु संजल्पे संसक्ततयापानं संस्पर्शने। एवमच्च जलक्रीड़ादीनां सम्प्रयोगस्यतु स्पर्शरूपत्वेऽपि प्राधान्यात् पार्थक्यम्। विप्रकर्षेण लभः प्राप्ति विप्रलभः। स च विप्रकर्षचतुर्धेति वक्ष्यते। तत्रापि सम्भोगपूर्वको विप्रलभ्भ इति सम्प्रयोगस्य प्रागुक्तिः। स च सुखमय धृति-स्मृति मति हर्षादि सञ्चारी। रोमाञ्च खेदकम्पाश्रु मेखला—स्खलन स्वसित साध्वसक्रीश्रवस्त्रन वस्त्रसंयमन वस्त्राभरण माल्यादि सम्यङ्निवेशन विचित्रेक्षण गुणवर्णन चाटु प्रभृति वाचिक कायिक व्यापारानुभावः। विभावास्तु प्रागुक्ताः तत्र नायक प्रयुक्तादपि सम्भोगादनुराग प्राचुर्य्येण नायिका

NATIONAL ARCHIVES OF INDIA

स एव भूयो निजवीर्य्य चोदितां
स्वजीवमायां प्रकृतिं सिसृक्षतीं।
अनामरूपात्मनिरूपनामनो
विधित्समानोऽनुससार शास्त्रकृत् ॥८॥

प्रयुक्त एव प्रकृष्यत इति तं दर्शयन् दर्शनसम्भोगमवतारयति। तत्रेति। कौरवेन्द्र पुरं हस्तिना पुरम्। सर्वे इत्यादि। वैशब्दः स्मरणे। किलशब्दस्तूत्प्रेक्षायाम्। उत्प्रेक्षा च दुर्निरूप्यत्वात् य एकोऽद्वितीयः पुरुषः सोऽयं कृष्णः पुरातनः। आद्यः कदा एकः। आत्मन्यविशेषे भेदहेतूपाधि रहिते स्वरूपे तदपिकदा अग्रेगुणेभ्यः गुण स्वीकारात् पूर्वम् तथानिर्गु गुणत्यागादनन्तरम्। कदागुणत्यागः जगदित्यादि। प्रपञ्चाकारेण दर्शितमात्मानं यदा न दर्शयति। तथासुप्तशक्तिषु चिच्छक्त्यादयः शक्तयो यदा सुप्ता भवन्ति। आत्मन्नित्यत्र (१) सपांसुलुक् पूर्व्वसवर्णेति सप्तम्यालुक् (१)।१।१०।२१॥ (७)

निराकारमुक्त्वा साकारं निरूपयति। स एवेति। स एव निराकार एव। प्रकृति मनुससार। अधिष्ठितवात्। भूयः सृष्टि प्रवाहस्यानादित्वात्। निजवीर्य्य-चोदितां कालप्रेरिताम्। अतएवं स्वजीवमायां सिसृक्षतीं स्वस्मिन्नीश्वरे जीवमायां असत्यं जीवत्वं सृष्टुमिच्छन्तीं। अरूपस्य रूपाणि, अनाम्नोनामानि, सञ्चित्यानुससार। तानिचान्ये जानन्त्विति। शास्त्रकृत् शास्त्रं वेदः॥ १।१०। २२ (८)

---

(१) पाणिनिः ७।१।३९ सूत्रम्।

NATIONAL ARCHIVES OF INDIA

स वाऽयं यत्पदमच सूरयो
जितेन्द्रिया निर्ज्जितमातरिश्वनः ।
पश्यन्ति भक्त्युत्कलितामलात्मना
नन्वेष सत्त्वं परिमार्ष्टुं महंति ॥९॥

दुर्ल्लभस्य सुलभतां निरूपयन्ति सवाऽयमिति। यत्तुरीयपदं समाधौ सूरयः पश्यन्ति सोऽयं भक्त्या उत्कलितः अमलश्च यः आत्मा तेनात्मनि जितमातरिश्वन इति व्यत्ययात् प्रथमार्थे द्वितीया। नु अहो एष कृष्णः सत्त्वं प्रत्यक्षत्वं। परिमार्ष्टुं नाशयितुं अर्हति। देशान्तरगमनेनाप्रत्यक्षो माभूत् सदैवास्मद्दृग्गोचरो भूयादिति भावः। एतदेव दर्शनसम्भोगो द्योतकम्। न चात्र परमार्थनिरूपणादेः प्रशान्त इति मन्तव्यम्। भगवति सकामत्वेन तासां तृष्णात्ययरूप शमस्याभावात्। अतएव "नन्वेष सत्त्वमि" त्यत्र व्याख्यान्तरं नाद्रियते। रतिरेव स्थायीत्युत्तरश्लोकेषु सुव्यक्तम्। नापि "निहु अरमणा सिलो अणवहस्मि पडि अगुरुणा मज्जस्मि स अत्त परिहार हियया वणगमणं चेय यह इवहु" इत्यादौ सकलपरिहारवनगमनयोः शान्तानुभावयो रिवात्रास्तित्व प्रतिपादनस्यशान्तविभावत्वेन शृङ्गारविरुद्धत्वात् प्रतिकूलविभावादिग्रहलक्षणो रसदोषः प्रसज्यत इति चोद्यम् रत्युत्कर्षभङ्गादि दोषत्वं। 'मुख्यार्थ इति दोषः प्रसज्यत इति वचनात्। साचात्र भगवद्गुणानुवादेन पुष्यतीति न दोषत्वम्। पुरुषान्तरालम्बनत्वे तु (वि) भावादि प्रातिकूल्यं दोष एव वा यथा "प्रसादेवर्त्तस्व प्रकटय मुदं सत्यजरुषं प्रिये शृण्वन्त्यङ्गान्यमृतमिव ते मिश्चतु वचः। निधानं सौख्यानां क्षणमभिमुखं स्थापयमुखम्। न

स वाऽयं सख्यनुगीत सत्कथो
वेदेषु गुह्येषु च वेदवादिभिः।
य एक ईशो जगदात्मलीलया
सृजत्यवत्यत्ति न तत्र सज्जते ॥१०॥

यदा ह्यधर्मेण तमोधियो नृपाः
जीवन्ति तत्रैष हि(सा) सत्त्वतः किल।
धत्ते भगं सत्यमृतं दयां यशो
भवाय रूपाणि दधद्युगे युगे ॥११॥

अहो अलं श्लाघ्यतमं यदोः कुलं
अहो अलं पुण्यतमं मधोर्वनम्।

सुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः॥" इत्यत्र "(गतः) काल-हरिण" इत्यनित्यता प्रकाशनं शान्तानुभावः॥ १।१०।२३ (९)

उत्तमःश्लोकत्वं निरूपयति इत्यादि। स इति यो वेदवादिभिः अनुगीत सत्कथः सोऽयं गुह्येषु वेदान्तेषु वेदवेदान्तरहस्य प्रतिपादनकुशलैरित्यर्थः। कोऽसौ सत्कथः य एक ईशः आत्मलीलया जगत्सृष्ट्यादि करोति न च तत्र सज्जते इत्येवं रूपः॥१।१०।२४(१०)

अवताररूपं निरूपयति यदेति। सात्त्वतः कृष्णः। रूपाणि दधत् जगदादौनिधत्ते। भगं भजनीयत्वं। सत्यं सत्यप्रतिज्ञात्वं ऋतं सत्योपदेशकत्वम्। दयां भक्तानुकम्पाम्। यशोऽङ्गीकर्मत्वम्। भवाय स्थित्यै॥ १।१०।२५ (११)

कृष्णसङ्गमस्पृहां निरूपयन्ति। अहो इत्यादि। अहो आश्चर्यम्। अलं अत्यर्थम्। मधोर्वनं मथुरा, यत्कुलं वनञ्च स्वजग्म

NATIONAL ARCHIVES OF INDIA

यदेष पुंसा मृषभः श्रियः पतिः
स्वजन्मना चङ्क्रमणेन चाञ्चति ॥१२॥
अहोवत स्वर्यशसस्तिरस्करी
कुशस्थली पुण्ययशस्करी भुवः ।
पश्यन्ति नित्यं यदनुग्रहेषितं
स्मितावलोकं स्वपतिं स्म यत् प्रजाः ॥१३॥
नूनं व्रतस्नानहुतादिनेश्वरः
समर्चितो ह्यस्य गृहीतपाणिभिः ।
पिबन्ति याः सख्यधरामृतं मुहु-
र्व्रजस्त्रियः सम्मुमुहुर्यदाशया ॥१४॥

चंक्रमणाभ्यां अञ्चति गच्छति। पूजयति मानयति च। पुंसां ऋषभः। श्रियः प्रिय इत्याभ्यां स्त्रीणां स्पृहणीयं चिरललितत्वं उक्तम् ॥ १।१०।२६ (१२)

अहो इति। अहो वत अहो आश्चर्यम्। कुशस्थली द्वारका। यच्छब्दाभ्यां सैव स्मितयुक्त अवलोको यस्य तं। स्वपतिं कृष्णम्। स एव हि स्वस्यात्मनः पतिः। अन्यदेहस्य। यदुकुलादीनि धन्यानि। नत्वन्यस्य कस्यचित् कुलमेतत् परं वा। यदीदृशेन नायकरत्नेनालङ्कृतमिति भावातिशयः ॥ १।१०।२७ (१३)

स्पर्शसम्भोगमाह नूनमित्यादि। नूनं शब्दो वितर्के कृष्णस्य गृहीतपाणिभिः पत्नीभिः ईश्वरोऽर्चितः। पूर्वजन्मसु अयमिति वाच्यं ईश्वरोक्तिर्लोकदृष्टया। यस्याधरामृतस्याशया अभिलाषेण

या वीर्य्यशुल्केन हृता स्वयम्वरे
प्रमथ्य चैद्यप्रमुखान् विरुक्मिणः ।
प्रद्युम्नशाम्बाम्बसुतादयो परा
याश्चा हृता भौमवधे सहस्रशः ॥१५॥
एताः परंस्त्रीत्वमपास्तपेशलं
निरस्त शौचं वत साधुकुर्व्वते ।
यासां गृहात् पुष्करलोचनः पति-
र्नजात्वपैत्याहृतिभिर्हृदिस्पृशन् ॥१६॥

व्रजस्त्रियः संमुमुहुः । व्रजस्त्रीणां पुरस्त्रीत्वात् । स्वधर्म्मत्यागात् सम्मोहाख्य नवमस्मरदशोत्पत्तेश्च पुरुषोत्कर्षः ॥ १।१०।२८ (१४)

या इति । विरुक्मिणो बलिष्ठान् प्रद्युम्नसूता रुक्मिणो । साम्बसूता जाम्बवंतो । जाम्बसुता नाग्नजितो । भौमो नरकासुरः । सहस्रशः । सहस्रं सहस्रं यावत् षोड़श ॥ १।१०।२९(१५)

एता इति । एताः परं केवलं स्त्रीत्वम् । साधुकुर्व्वते । पेशलं प्रियम्बदत्वम् । शौचं शुचित्वम् । आहृतिभिः पारिजातादि प्रियवस्तुनामाहरणैः । हृदिस्पृशन् उत्कण्ठां जनयन् । न च पुरस्त्रीणां । सकामत्वेऽपि भगवतो निरपेक्षत्वेन परस्परानुभावात् रसाभासानुवादात । रसाभासोऽयमिति वाच्यम् । "एवम्विधां वदन्तीनां सगिरः पुरयोषिताम् । निरीक्षणेनाभिनन्दन् सस्मितेन ययौ हरिः" (१) इत्युत्तरत्र भगवतोऽपि स्वभावत्वानुवादात् । सूतशौनकम् ॥ १।१०।३० (१६)

---

(१) भागवतं १।१०।३१ श्लोकः ।

NATIONAL ARCHIVES OF INDIA

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता
ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम् ।
भेजुर्मुदा विरत मेधितयानुराग
हासावलोक नवसङ्गम जल्पलज्जाः ॥१७॥
प्रत्युद्गमासनवरार्हण पादशौच
ताम्बूलविश्रमण वीजनगन्धमाल्यैः ।
केशप्रसारशयन स्नपनोपहार्यैः-
र्दासीशता अपि विभो विदधुः स्म दास्यम् ॥१८॥
मनांसि तासामरविन्दलोचनः
प्रगल्भलीलाहसितावलोकनैः ।
जहारमत्तद्विरदेन्द्रविक्रमो
दृशान्ददच्छौरमणात्मनोत्सवम् ॥१९॥

इत्थमिति। पदवीं मार्गम्। एधितया भजनेनानुरागेण हासावलोको नवसङ्गमाश्च जल्पलज्जा यासाम् तास्तथा। सङ्गमः सन्निधानम् ॥ १०।५८।४४ (१७)

भजनमेवाह। प्रत्युद्गमेति। प्रत्युद्गमः प्रत्युत्थानम्। आसनं स्वासने उपवेशनम्। अर्हणमुपायनम्। पादयोः शौचम् प्रक्षालनम्। विश्रम्यतेऽनेनेति विश्रामणम्। अङ्गसम्वाहनम्। प्रसारः प्रसाधनम्। स्वयं पचनम्। परिवेषणञ्च। दासीनां शतानि सन्ति यासाम्। स्म शब्दो वाक्यपूरणार्थः ॥ १०।५८।४५ (१८)

स्वर्गनान्तरत्वात् अनन्तरं सम्भयोगमाह। मनांसीति। माथुरेति। तासां मथुरास्त्रीणाम्। प्रगल्भप्रौढालीलाविदग्धचेष्टा

NATIONAL ARCHIVES OF INDIA

दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं
तत्प्रेक्षणोत्स्मित सुधोक्षणलब्धमानाः।
आनन्दमूर्त्तिमुपगुह्य दृशात्मलब्धम्
हृष्यत्त्वचो जहुरनन्तमरिन्दमाधिम् ॥२०॥
पुण्यावत व्रजभुवो यदयं नृलिङ्ग—
गूढ़ःपुराणपुरुषो वनचित्रमाल्यः।
गाः पालयन् सहबलं क्वणयंश्च वेणुं
विक्रीड़याञ्चतिगिरित्वरमार्च्चिताङ्घ्रिः ॥२१॥

विक्रमो गमनं गतिः। शक्तिर्वा दृशां दृष्टीनाम् श्रीरमणात्मना लक्ष्मीमुपभुञ्जानेन शरीरेण, उत्सवं प्रीतिम् ॥ १०।४१।२७ (१९)

दृष्टेति। मुहुर्ब्भारं वारं श्रुतम्। श्रीकृष्णं दृष्ट्वा अनुद्रुतचेतसः। गच्छन्तं श्रीकृष्णम्। चित्तेनानुगच्छन्त्यः तत् किं अश्रुप्रहता एवनेत्याह। तदिति। तत्तथाविधं भावाववोधनक्षमं यत्प्रेक्षणमुत् क्षष्टञ्च स्मितं। तदेव निर्वापकत्वात् सुधा तयोक्षणं सेचनं तेन लब्धमानाः कृतस्वीकाराः। उपगूहनं आलिङ्गनम्। तत् किं प्रकाश-मेव नेत्याह। दृशा आत्मना बुद्ध्या लब्धम् प्राप्तमेव मादावन्तर्बहि-रिह प्रयोज्यमित्यादि कामतन्त्रानुसारेण वाह्यान्तर मुक्ता आधिं जहुरित्यन्तरमाह। आधिं तदप्राप्तिदुःखम्। अनन्तं चिरं सञ्चि-तम्। यद्वा अनन्तं यथा स्यात् तथा जहुः ॥ १०।४१।२८ (२०)

अत्रैव सात्त्विकानुभावमाह। हृष्यत्त्वचेति। प्रगल्भलीलादय उद्दीपनविभावाः। सञ्चारिणः स्वयमुह्याः। स एव भगवता पुरस्त्री-बुद्धिकामिनीनाम् संश्लेषरूपः कविना मानसः सम्प्रयोग उक्तः। शरी-रन्तु पशुधर्म्मत्वेन ग्राम्यत्वात् एतत् प्रकर्षत्वात् विशिष्टदेवताविषय-

गोप्य स्तपः किमचरन् यदमुष्यरूपं
लावण्यसारमसमोर्द्ध्वमनन्य सिद्धम् ।
दृग्भिः पिवन्त्यनुसवाभिनवं दुरापं
एकान्त धामयशसः श्रिय ऐश्वरस्य ॥२२॥

त्वेन वर्णनीयत्वाच्च नोक्तः । रत्यादिशब्दवाच्यत्वेनाचारु (त् क्षुभ्य-त्वच इत्यनुभव द्वारैवोक्तः । हे अरिन्दम ! परोक्षित् । अरयोऽत्र कामादयः षड्वर्ग्यमान शृङ्गारनिर्भरचित्तो माभूदयमिति उचितम् । सम्बोधनम् । शुकः ॥ दीर्घसम्भयोगस्य स्मृहया तं प्राप्तवतीर्गोपीः स्तुवन्ति पुण्या इत्यादि । वत विस्मये । पुण्याः पुण्याधिकाः । व्रजभुवो गोप्यः । नृलिङ्गेन मर्त्य मूर्त्या गूढं गूढतामेवाह । वनचित्रेति । त्रिभिः वनमाल्यैश्चित्र इत्यर्थः । यत् या गोपी अञ्चति गच्छति । उपभुङ्क्ते विक्रीड़या विविधक्रीड़या । विचित्रैः कामकरणैरित्यर्थः । गिरित्रो रुद्रः । रमा लक्ष्मीः । अनेन सकामविचित्रैः कामैरयमेव सेव्य इत्युक्तम् ॥ १०।४४।१३ (२१)

आस्तामनेन सह सम्भयोगो दर्शनमप्यस्य दुर्लभमित्याहुर्गोप्य इति । यद् यस्मात् अमुष्य पुरुषरत्नस्य लावण्यसारम् अशेषलावण्येन गृहीतसारात्मकम् । लावण्यरूपयो रभेदप्रतिपत्तिः । सामान्याधिकरण्ये व्यङ्ग्यम् । अतएव असमोर्द्ध्वं अविद्यतुल्याधिकम् । तच्च स्वभावसिद्धम् । न तु केनचित् कर्त्रा निर्म्मितम् । अतएवाभिनवं सर्वक्षणं प्रतिदर्शनेन नवं नवं भक्ततपोभिः एकान्तधामस्वाश्रयभिचारि, स्थानम् । ऐश्वरः ऐश्वर्य्यम् । एतेन दुर्भगत्व दुर्व्विधत्व दुर्व्वलत्वानि भर्त्तुर्दोषाः । स्त्रीणां वैराग्यहेतवोऽत्र न सन्ति इत्युक्तम् ॥ १०।४४।१४ (२२)

NATIONAL ARCHIVES OF INDIA

यादोहनेऽवहनने मथनोपलेप
प्रेङ्खेङ्खनार्भरुदितोक्षणमार्ज्जनादौ
गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो
धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः ॥२३॥
प्रातर्व्रजाद्व्रजत आविशतश्च सायं
गोभिः समं क्वणयतोऽस्य निशम्य वेणुम्।
निर्गम्य तूर्णमबलाः पथिभूरि पुण्याः
पश्यन्ति सस्मितमुखं सदयावलोकम् ॥२४॥
मैवं विभोऽर्हति भवान् गदितुं नृसंशम्
सन्त्यज्य सर्वविषयान् तव पादमूलम्।
भक्त्या भजस्व दुरवग्रहमात्यजास्मान्
देवो यथादि पुरुषो भजते मुमुक्षून् ॥२५॥

या इति। या एनम् दोहनादौ गायन्ति चकारात् पश्यन्ति। अवहनने कण्डने। प्रेङ्खेङ्खनं हिन्दोलनम्। मार्ज्जनं अवकरनिरास:॥ १०।४४।१५ (२३)

प्रातरिति। आविशत: आगच्छत: निर्गम्यगृहद्वारि स्थित्वेत्यर्थ:। शुक:॥ १०।४४।१६ (२४)

संजल्पसम्भोगमाह गोप्य इति। गोप्य: हे विभो! स्वामिन् एवं "तदृयातमाचिरंघोष"मित्येवं रूपं नृशंसं कठिनं भक्त्या भजनं कर्त्तुमारब्धा: "आदिकर्म्मणि क्त: कर्त्तरि च" (१) दुरवग्रह: दुरा-

---

(२) पाणिनि: ३।४।७१ सूत्रम्।

NATIONAL ARCHIVES OF INDIA

यत् पत्यपत्य सुहृदामनुवृत्तिरङ्ग-
स्त्रीणां स्वधर्म्म इति धर्म्मविदा त्वयोक्तम्।
अस्त्वेव मेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किलबन्धुरात्मा ॥२६॥
कुर्व्वन्तिहि त्वयिरतिं कुशलाः स्म आत्मन्
नित्यप्रिये पतिसुतादिभिरार्त्तिदैः किम्।
तन्नः प्रसीदवरदेश्वरमास्मच्छिन्द्या
आशां भृतां त्वयिचिराद्दरविन्दनेत्र ! ॥२७॥

राध्यः। यद्यपि वयं तवानुरूपाः तथापि सर्व्वस्व त्यागेन भजतः सर्व्वस्यापि स्वीकार एव सत्पुरुषधर्म्म इति दृष्टान्ते व्यङ्ग्यम् ॥ १०।२८। ३१ (२५)

ननु किं मद्भजनेन भर्त्तुः शुश्रूषणमित्युक्तम्। स्वधर्म्म एवाद्रियतामिति चेत्तत्राहुः यत्पत्येति। हे अङ्ग! यत्पत्याद्यनुवृत्तिः स्त्रीणां निजधर्म्म इति। यत्त्वयोक्तं तत्त्वय्येवास्तु। न तु प्राकृते पत्यादौ किल यस्मात्त्वं प्रेष्ठः। नान्यवत् प्रियमात्रत्वम्। तनुभृतां प्रेष्ठो नान्यवद् हितार्थानां। बन्धुः सुहृत्। आत्मेति। त्वद्भजनादपत्यं भजनमेव भविष्यति। आत्मैवाद्य (यद) पत्यरूपः। त्वञ्च सर्व्वात्मा। न चैवं विशेषात् पत्यादि भजनमेव कार्य्यमिति वाच्यम्। त्वं हि धर्म्मवित् यथास्थितं धर्म्मं वेत्सि। उपदेशपदं गुरुः। यथाज्ञानं कथयसीत्यर्थः। ईशः कथितुं कर्त्तुमकर्त्तुं च योग्यः फलदाने क्षम इत्यर्थः। पत्यादयस्त्वमेवं रूपाः। तस्मात् लाघवेनैव फलसिद्धौ किं गौरवेण इत्यर्थः ॥ १०।२८।३२ (२६)

किञ्चातोऽपि त्वद्भजनमेव श्रेय इत्याहुः। कुर्व्वन्तीति।

चित्तं सुखेन भवतापहृतं गृहेषु
यन्निर्विशत्युत करावपिगृह्यकृत्ये।
पादौ पदं न चलतस्तवपादमूलाद्
यामः कथं व्रजमथो करवाम किंवा ॥२८॥
सिञ्चाङ्ग नस्त्वदधरामृतपूरवेण्या
हासावलोककलगीतजहृच्छयाग्निम्।
न चेदयं विरहजाग्न्युपयुक्तदेहा
ध्यानेन याम पदयोः पदवीं सखे ते ॥२९॥

कुशला दीर्घदर्शिनः। स्वेतरो स्वादिभिः (त्रिभिः) सप्तम्यन्तैः पतयादयः त्रय उक्ताः। "हे नित्य त्वं नित्यः," पतयादयस्तु अनित्यत्वादार्त्तिदाः। ततस्तैः किं नो किमपि इत्यर्थः। तत्तस्मादन्यभजनस्य सदोषत्वात्। स्वभजनस्य सुगमत्वाच्च। आसामङ्गसङ्गस्पृहाम्। चिरात् अशरीरग्रहणात्। अरविन्देक्षत्वात् आशा वरदेशत्वेऽप्यस्मदाशाच्छेदनमकौर्त्तिकरमिति भावः एवमपि गमनादेशे गन्तुमपि न शक्यत इत्याहुः॥

चित्तमित्यादि। सुखेन सुखरूपेण। निर्विशति। व्यापिपर्त्ति। उत अहो योकरौ निर्विशतः। तावपिहतौ। आस्तां तावत् गृहगमनवार्त्ता। गृहप्राप्तिरप्यशक्या इत्याहुः॥ १०।२८।३४ (२८)

अतः कथं यामः। अतो न यामश्चेत् किं करवाम तवस्वीकारं विनेति भावः। करवामेति संप्रश्ने लोट्। तस्मादयमस्मात् प्रणयो मान्य इत्याहुः। १०।२८।३३ (२७) सिञ्चेति। अङ्ग अहो। अमृतं सुधापूरकः प्रवाहो हृच्छयाग्निं कामाग्निम्। हासादिभिरिभ्य-

यर्ह्यम्बुजाक्ष तव पादतलं रमाया
दत्तक्षणं क्वचिदरण्यजनप्रियस्य ।
अस्प्राक्ष्मतत्प्रभृति नान्य समक्षमङ्ग
स्थातुं त्वयाभिरमितावत पारयामः ॥३०॥
श्रीर्यत् पदाम्बुजरजश्चकमे तुलस्या
लब्ध्वापि वक्षसि पदं किलभृत्यजुष्टम् ।

नैरुह्योपितम् । कलं मधुरं । अधरसुधां पाययस्वेत्यर्थः । नोचेन्न-सिञ्चसिचेत् तत्राहुः । उपयुक्तं दार्ढ्यं (दग्धं) शाब्दमात्रम् तवावश्येष्यति । वयन्तु तत्पादसन्निकृष्टा भविष्याम एवेत्यर्थः ॥ १०।२९। ३५ (२९)

तथाप्यज्ञानरक्तेषु जनेषु प्रसङ्गोऽनुचित इव तत्राहुः । यर्हीति । दत्तक्षणं दत्तावसरम् । क्वचित् कस्मिन्नपि संकेतस्थाने अस्प्राक्ष्मः पृष्टवत्यः । त्वत्तोऽन्यं न जानीम इत्यर्थे कृतदिव्याः । अरण्यगन (जन) इत्यात्मानं निर्दिशन्ति । एते (न) रमारमणस्यापि ते स्वानुरागमवेक्ष्येदमस्माभिर्दिव्यं कृतम् । न स्वरुचिमात्रेणेत्युक्तम् । तत्प्रभृति अन्येषां पतीनां समक्षं स्थातुमपि न पारयामः न शक्नुमः किं पुनरन्तुम् । अञ्जसा स्वारस्येन बलादुपभुञ्जते ते वतनिश्चितम् । अतस्त्वय्येवानुराग इत्यर्थः ॥ १०।२८।३६ (३०)

आस्तामङ्गसङ्गः तत्पादशुश्रूषणमप्यनुमन्यस्वेत्याहुः । श्रीरिति । यत् यस्मात् श्रीरपि पादरज एव चकमे । वक्षसि स्थानं लब्ध्वापि किम्भूतं रजः भू(भृ)त्यै जुष्टम् । तथा तुलस्याः सम्बन्ध्यपि किल प्रसिद्धौ । यस्याः श्रियः उतेत्यपि अर्थे । अन्ये ब्रह्मादयः ।

NATIONAL ARCHIVES OF INDIA

यस्याः स्ववीक्षण उतान्य सुरप्रयास
स्तद्धृदयञ्च तव पादरजः प्रपन्नाः ॥३१॥
तन्नः प्रसीदह्रजिनार्दन तेऽङ्घ्रिमूलं
प्राप्ता विसृज्यवसतीस्तदुपासनाशाः ।
त्वत् सुन्दरस्मितनिरीक्षण तीव्रकाम
तप्तात्मनां पुरुषभूषणदेहिदास्यम् ॥३२॥
वीक्ष्यालकावृततमुखं तव कुण्डलश्री
गण्डस्थलाधरसुधं हसितावलोकम् ।
दत्ताभयञ्च भुजदण्डयुगं विलोक्य
वक्षः श्रियैकरमणञ्च भवाम दास्यः ॥३३॥

प्रयासः तपः क्लेशः । तद्वत् श्रीवत् । वक्षसि स्थितापि श्रीः । भृत्योपभुक्तं सपत्नीसम्बन्ध्यपि पादरज एव चकम इति अतिशयः ॥ १०।२८।३७ (३१)

तन्न इति । तत् तस्मात् श्रियापि काम्यमानत्वात् । हे ह्रजिनार्दन ! दुःखनाशक वसतीर्गृहान् तवसुन्दराभ्यां स्मितनिरीक्षणाभ्यां य स्तीव्रः कामः तेन तप्त चित्तानामस्माकम् ॥१०।२८।३८(३२)

ननु सन्त्यत्र पुरुषान्तराणीति किं ममैव प्रार्थनयेति चेत्तत्राहुः वीक्ष्येति । अलकाश्चूर्णकेशाः कुण्डलश्रीश्च गण्डस्थलञ्चाधर-सुधा-चेति इन्द्वैक्यम् । हसितञ्चावलोकश्च श्रिया एक रमणम् । आर्षोऽवर्णागमः सन्धिर्वा । अनाद्यप्येतं वक्षः श्रीप्रलोभकमित्येक शब्दार्थः । भवाम इत्याशिषि लोट् ॥ १०।२८।३८ (३३)

NATIONAL ARCHIVES OF INDIA

का स्त्र्यङ्ग ते कलपदामृत वेणुगीत
सम्मोहितार्य्यचरितान्नचलेत्त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदञ्च निरीक्ष्यरूपं
यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥३४॥
व्यक्तं भवान् व्रजभयार्त्तिहरोभिजातो
देवो यथादिपुरुषः सुरलोकगोप्ता ।
तन्नो निधेहि करपङ्कजमार्त्तबन्धो
तप्तस्तनेषु च शिरःसु च किङ्करीणाम् ॥३५॥
इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
सम्भोगशृङ्गारो नाम एकादशोऽध्यायः ॥११॥

तथापि परपुरुषप्रसङ्गाच्च सन्मार्गातिक्रमोऽनुचित इति चेत्तत्राहुः । का स्त्रीति । कलैर्मधुरैः पदैरमृतम् सुधीभूतं यद् वेणुगीतम् । तेन सम्मोहिता उत्पन्नसम्मोहाख्य नवम स्मरदशाः त्रैलोक्यस्य सौभगं सौभाग्यं जनप्रियत्वं यस्मिन् रूपे यत् यस्मात् वेणुगीतादूपाद्दा गवादयः पुलकानबिभ्रन् नितरां धृतवन्तः । द्विजाः पक्षिणः । अयोग्येष्वपीति । मंचु भावाविर्भावात् । का कथाऽस्माकम् स्मरवैवश्यादिदं चेष्टितं स्यादिति भावः ॥ १०।२९।४० (३४)

व्यक्तमिति । व्यक्तं स्पष्टम् । भयं परहेतुकम् । आर्त्तिर्मनःपीड़ा । अभेदेऽपि देवो यथेति भेदोपमया सम्मोहितत्वं विहृतं । तत् तस्मात् । शब्दद्वयमुभयत्र प्राधान्यद्योतनार्थम् । गोप्ता श्रीकृष्णम् ॥ १०।२९।४१ (३५)

इति श्रीहेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां सम्भोगशृङ्गार नाम एकादशोऽध्यायः ॥११॥

NATIONAL ARCHIVES OF INDIA

CALCUTTA ORIENTAL SERIES

No. 5.

MUKTA-PHALAM

(मुक्ताफलम्)

BY

VOPADEVA

WITH THE COMMENTARY OF

HEMADRI

PART II.



EDITED BY

PANDIT ISVARA CHANDRA SASTRI

Sankhya-Vedanta-Nyaya-Darsana-Tirtha.

AND

PANDIT HARIDAS VIDYABAGISH

Bhagavatacharyya.

WITH A PREFATORY DISSERTATION

by

NARENDRA NATH LAW, M. A. B. L.

Premchand Roychand Scholar,

All rights reserved.]

[Re. 3.

NATIONAL ARCHIVES OF INDIA

NATIONAL ARCHIVES OF INDIA

COPY RIGHT
by
NARENDRA NATH LAW
Calcutta.

CALCUTTA ORIENTAL SERIES

1.	Yukti-kalpa-taru ...	Rs. 2—8—0
2.	Chanakya-Rajaniti-Sastram (Second Edition)	0—14—0
3.	Harilila by Vopadeva ...	1—4—0
4.	Inter-state Relations in Ancient India, Part I. ...	2—0—0
5.	Mukta-phalam in 2 Parts ...	6—0—0
6.	Chanakya-katha with Bengali Translation. ...	1—0—0
7.	Yogachintamani (in Press)	

To be had of the Sanskrit Press Depository,
30, Cornwallis Street, Calcutta.

Prefatory Dissertation printed by Bishnu Pada Hazra at the Sanskrit Press, 124/2/1 Maniktola Street, Calcutta, and the rest by Sukhamoy Mitra at the New Arya Mission Press, 9 Sibnarain Das Lane, Calcutta. Published by Baidya Nath Dutt, 26 Vidyasagar Street, Calcutta.

NATIONAL ARCHIVES OF INDIA

NATIONAL ARCHIVES OF INDIA

सूचीपत्रम् ।

विषय:	अध्याय:	पृष्ठा
विप्रलम्भशृङ्गार:	१२	२०७
विष्णुभक्तानां करुणरस:	१३	२४३
,, रौद्ररस:	१४	२६६
,, भयानकरस:	१५	२७८
,, बीभत्सरस:	१६	२८०
,, शान्तरस:	१७	२८८
,, अद्भुतरस:	१८	३१७
,, वीररस:	१९	३२१
ग्रन्थोपसंहार:	२०	३५७
Prefatory Dissertation		iff

NATIONAL ARCHIVES OF INDIA

NATIONAL ARCHIVES OF INDIA

PREFATORY DISSERTATION

Contact of western civilization with the Hindus and the effects thereof.

The contact of western civilization with that of the Hindus has brought about, in diverse directions, great changes, one of which is that in the domain of religious thought and belief. In addition to the activities of the missionaries, whose preachings acted detrimentally towards the orthodox faiths, there were various other factors that contributed to the same result. Of these, the principal were :—

(1) The sceptical, scientific spirit forming an adjunct of western education that leads one to refuse to take on trust anything that is not based on data regarded as sound by the rules of induction or deduction of European logic.

(2) The processes of historical criticism that have dissected the religious works of the Hindus from the Vedas downwards, and shown according to the rules of historical criticism (a) their limited antiquity as opposed to their eternal existence in the forms in which we see them, (b) their gradual growth, (c) their interpolations which were made to serve various purposes, (d) the emergence of the various branches of Hindu religious literature in a certain chronological order in which (the com-

NATIONAL ARCHIVES OF INDIA

position of the *Mahatmyas*, forming part of the *Puranas*, not ceasing yet) the *Puranas* stand last, and among which there is an internal connection by reason of the evolution of thought in the later branches of the literature from the former ones, and (e) the gradual evolution of the Hindu pantheon (as has also been proved in regard to other countries) showing an order of emergence of the objects of worship as opposed to the current beliefs.

(3) The mutual contradictions or dissimilarities between portions of religious books, of which, one cannot be supposed as true without considering the other to be in error *e. g.* the dissimilarities or contradictions in the lists of royal dynasties in the *Puranas* which as the fifth Veda are believed to be infallible.

(4) The modern progress of the physical sciences or the modern geographical, astronomical, or other branches of knowledge prove certain statements of the religious books to be untenable. This appears quite natural if we take into account the time when the statements were made but they militate against the orthodox belief as to those religious books.

(5) The criticisms, sometimes undeserved or even ruthless (by Jean A. Dubois, Talboys Wheeler, and others) against the manners,

NATIONAL ARCHIVES OF INDIA

customs, and institutions of the Hindus, and the ideas and beliefs underlying them carried on for the first time in the history of India their radical but fearless examination which destroyed or shook to the foundations many a fond idea or belief found in the Hindu religious books.

(6) The study of religious books in the light of historical criticism has shown that statements found in them may be such that they can be more satisfactorily accounted for by the exigencies, changes, or demands of religious thought than by the supposition of the actual occurrence of the incidents in the statements.

The influence of all these factors has been to leaven the Hindu mind with a spirit of reasoning which checks the free play of belief in regard to religious matters. Now the question arises whether after conceding the various factors all that they can reasonably claim, would there be nothing left of the contents of Hindu religious books, beliefs and practices, that can well hold up its head against the attacks? The lives and sayings of those who have attained success by proceeding along the ways prescribed by the *sanatana dharma* lead one to believe that even after leaving aside all that must be rejected, there must be left much that the acutest reasonings of scholars best equipped with modern secular scholarship cannot probe, because their conclusions leave out many premises of which they do not even

How far the spirit of scepticism is justified.

NATIONAL ARCHIVES OF INDIA

[redacted] but which must be duly noted to account for the actual results. Just as credulousness can be pushed too far, so also scepticism ; and what we [redacted] as opposed to the laws of nature, or to philosophy may be quite in accord with laws, or philosophy, beyond the comprehension of the present-day scholar of the college and the laboratory. The result is that the prevailing attitude of the generality of the people of the present day towards the ways by which the highest spiritual life is prescribed as attainable in the Hindu *sastras*, or towards those mortals who are widely recognized in India as successful in their pursuit of the ideals of the *sastras* such as Ramkrishna Paramahamsa, or Trailanga Svami is either of disbelief that dismisses them with curt phrases like 'lunatics' or 'mystics', and their experiences as 'visions' or 'hallucinations', or one of transient adulation that bestows praises on them for the moment and rests satisfied. The present Hindu society has ceased to keep up the provision, that was zealously maintained by it of yore, for a regular supply of people from within itself to take to the third and fourth 'stages of life', namely *vanaprastha*, and *yati*, in order that nothing might deter those who had climbed up to the highest rung of spiritual life from having suitable men to follow in their footsteps and keep alive in the country the spiritual truths and attainments that might be well-nigh or totally lost for want of adherents, who would have otherwise been unwilling to join them by sheer unbelief at the very outset.

Disorganization and disuse of 'stages of life' are responsible for the spiritual ebb among the Hindus.

NATIONAL ARCHIVES OF INDIA

Whatever might be the defects of the 'stages of life' of early Hindu society, one thing is certain that without them, India could not have attained to the degree of spiritual culture that made it 'the land of rishis', the home of realities of spiritual life that are still but enigmas to many other countries of the world. Its spiritual culture is generally supposed to be one of the causes of its decline, in view, as is alleged, of the fact that it made the people but philosophic imbeciles and dreamers, but the supposition, I think, fails to hit the right nail. India declined not because of its spiritual culture but because it could not keep its stream of spiritual life ungarbled and unabused, and could not practically act upon the scheme of individual and social life in which the material interests of the people and the country are not allowed to be overshadowed by the zeal for spiritual and religious matters. There was a class of thinkers (Kautilya) who saw that, of the four aims of human life, *dharma*, *artha*, *kama* and *moksha*, *artha* is the basis upon which rest the three other aims, which cannot be achieved if the basis be shaky and unsound. In the human body, the legs are generally regarded as occupying a very low position in comparison with the brain, but if this low estimate of their value gives rise to practical neglect of the two limbs causing them actual injury or destroying their efficiency, then the best brain has to succumb in competition with another that is not so hampered in the use of the legs, as the result of its own action, in giving effect to its

The decline of material prosperity of the Hindus, not due to spiritual culture but to its abuse and misapplication.

NATIONAL ARCHIVES OF INDIA

thoughts. The same is the case in regard to the body politic. The spiritual and religious matters came to receive the attention of the Hindus at the expense of secular matters, and this is one of the principal reasons why the body politic of the Hindus had to give way in its struggle with that of the other peoples who prosecuted it in right earnest.

Material and spiritual responsibilities of the second 'stage of life'.

creepers and the lower animals exist in the place by virtue of their rare good luck, while the Vedas, as well as the souls in the highest stage of spiritual culture are incarnate there as the Gopis. The beauty of the locality with its gurgling Yamuna, flowering and fruit-bearing plants and trees of all descriptions, and the silvery notes of the cuckoo and other birds are entrancing; while to crown them all, there are the music of Krisna's lute and His ecstatic personality.

Such is Brindaban with its ideal features, having its appropriate location in the devotee's heart. The surroundings in which the wielder of the universe, spent his early career setting to human beings new lines of approach towards him, ought to befit the beauty and grandeur of the incidents that took place, and therefore, it is no wonder that their description should undergo a process of idealization. The earthly Brindaban is the material counterpart of the mental reality and is believed to be a place indissolubly and in a special degree associated with Krisna's presence. It is in this belief that for the purpose of *sadhana*, devotees take to this place, which by its traditional connection with the *lila* of Krisna generally, and His particular actions with particular portions of the locality present before them a graphic reality and a living environment that steady or otherwise help their mental process involved in the acts of *sadhana*. But it is the mind and mind alone of the devotee that can secure an immediate realization of the Deity either there or at any other place, which, the Vaisnavas believe on the grounds already mentioned, to have actually taken

NATIONAL ARCHIVES OF INDIA

place in the case of several *bhaktas* by virtue of their extreme devotion. The narratives of their success in *sadhana* are recorded in works like the *Bhakti-ratnakara,* which, to the mind of the bhakta, prove the permanence of Krisna-*lila* and the efficacy of Brindaban, in and through which it is realized.

Why the path of bhakti is easier.

The path of *bhakti* is said to be easier than any other for the following reasons :— (1) It emphasizes the use of the emotions,—the very spring of action, to the exclusion, if so required by the devotee, of its combination with *raja-yoga,* or *karma-yoga,* which presents difficulties ; (2) it always entertains an attitude of compromise towards the erring masses, who take to this method of *sadhana,* inspires them with courage for further efforts inspite of failures, and puts before them a hopeful prospect of a sure achievement of the final goal sooner or later ; (3) it recommends a complete self-surrender to the Deity, and directs the devotee's hope to His mercy, which He might at any moment be pleased to extend to him on account of his whole-hearted efforts, proving unsuccessful through his incapacity ; (4) the emotions, by virtue of their intrinsic attraction for men, draw them towards the Deity by their own strength. With feeble beginnings, they become irresistible in time and carry on the devotee along the path of *bhakti* by their own powerful current; (5) constant remembrance of the Deity or portions of His *lila* is believed, as already mentioned, to have a great potency for elevating the soul and securing for him the final object. This is secured by what is called the practice of the

NATIONAL ARCHIVES OF INDIA

branches (lit. limbs) of *bhakti*, the number of which is mentioned by the *bhaktas* in different parts of the *Bhagavata* according as its particular aspects are omitted or taken into account. The following three may, if rightly practised, give rise to or help the growth of all the requisites of a *bhakta* such as purity of life, self-surrender to the Deity, self-control, self-abnegation, non-atttchment to this world enumerated in the book.

(a) *sravanam* (listening to any thing about the Deity),

(b) *kirtanam* (repetition of His name or any thing about Him),

(c) *smaranam* (remembrance of same).

A defect of vaisnavism.

The charge that is often laid at the door of *vaisnavism* is that it advocates *vairagya* (non-attachment to this world) at all periods and in all 'stages of life' with the consequence that many of its adherents develop idleness mistaken or passed for real *vairagya*, to the utter neglect of duties attaching to the 'stages of life'. Real mental non-attachment to wordly matters is not antagonistic to wordly duties. It is perfectly expressible through the pursuit of worldly duties without looking to the results and actuated only by a sense of duty and eagerness to perform it in the best way possible only for the duty's sake. The idleness that develops often bases itself on fatalism as its underlying phlosophy while it is, indeed, one thing to be active without caring for the fruits of actions which are left in a higher hand, and another to be idle and expect the Deity to goad him to action

NATIONAL ARCHIVES OF INDIA

at every step. Self-resignation to the Supreme is not a synonym for idleness and it is the duty of every *vaisnava* to bear in mind that he is as much a member of his family and his society, as much a citizen of the State as any other, with his particular share of duties at particular periods of his life, which, if every body like him tries to throw over his neighbour means the disruption and ruin of the society and the state to which he belongs. It is true that the *Bhagavata* is not a code of social duties (*smriti*), and we cannot expect from it any complete treatment of the way in which *vairagya* should be developed in harmony with the worldly duties. The *Vaisnava smriti* could have dwelt on the subject but has not. In the *Haribhakti-Vilasa*, a *smriti* work of the Bengal Vaisnavas, it is the religious duties that have been delineated without any reference to the secular. One of the causes for the devotion of exclusive attention to the religious aspects of the duties lies perhaps in the political state of the country in which the later *vaisnava* literature, that took its cue from the *Bhagavata*, developed. The bearing of the burden of administration was then but a relegated one for the Hindus generally, and as they were no longer the rulers, it was no more a necessity for them to bother themselves about the maintenance of a harmonious relation between the practice of the religious doctrines that were preached and the 'stages of life', a principal object of which, as already pointed out, was to avert a cleavage between the results of a deeply religious outlook on life and the keeping up of the body-politic in its proper health and strength

NATIONAL ARCHIVES OF INDIA

by an adequate direction of the secular duties. If it be said that it was not necessary for the *vaisnava* works to discourse on the secular duties, as they depended in these matters upon the general *smriti* works like that of Manu, the answer is that *vairagya* and *bhakti* have been necessarily freed in the *Vaisnava* books from the obligations that are binding upon the members of the Hindu society in the general codes, and the latitude thus conferred on *vairagya* and *bhakti* is unjustly utilized by the numerous real or counterfeit approximations to those states of mind, which in fact never fall within the exceptions. It is these deviations from the path of real *bhakti* that have made vaishnavism weak in the fields of secular action. Inertia and idleness in the name of *bhakti* and *vairagya*, not to speak of the mal-formed offshoots that have grown from the pure trunk of the emotion-cult of the *Bhagavata*, are the diseases that should be remedied before vaishnavism can hope to make its adherents strong in action by preventing them from dropping into the pit-falls. The burden of this duty lies on the interpreters of the *Bhagavata*. It is for them to show how its doctrines are amenable to healthy combination with *karma-yoga*, and how they are adaptible to the healthy uses of human energies in the service of man and society. The *Bhagavata* is a work of *vairagya*, and it is *vairagya* that receives the greatest emphasis in its pages from the first to the last. Men are naturally susceptible to the attractions of the material world, to the spells of the senses, that turn their minds away from the religious and spiritual truths that cannot be realized so long as the rays of

NATIONAL ARCHIVES OF INDIA

their light are not allowed to penetrate to the soul by the removal of the thick mist of sensual distractions. The passing away of kingdoms and empires, the humbling of the arrogant inspite of their power, the evanescence of material enjoyments, the shakiness of the worldly props on which our minds lean so confidently, the shortness and uncertainty of human life which can be made an instrument for the highest progress but is generally allowed to be wasted, the hollowness of the sense of 'I'ness often carried to the most selfish extremes, the great extent to which we depend upon a uniform and intelligent regimen by an unseen hand of forces which make our life and the workings of our senses possible either when awake or asleep and yet our forgetfulness of the worker behind the scene, and such other matters are combined with the delineations of the ways of God towards man, and the means by which He can be realized, in touching narratives which are meant to be heard any day in order that they might mould and uplift his inner nature, and turn his mind towards the permanent Reality behind the fleeting. The *vairagya* is thus inculcated in all its powerful intensity with a view to cauterize, as it were, by imperceptible, daily applications, the ligaments that tie him so strongly to this world and make him worldly. The *Bhagavata* cannot be blamed if, at the same time, it does not lay down in detail the ways in which it is to work in combination with the duties of the *grihastha* (householder), a 'stage of life' upon which principally depend the maintenance and improvement of the society as a whole ; because, man with his strong material predilections would naturally

NATIONAL ARCHIVES OF INDIA

supply for himself a course of action effecting such a combination. But it is desirable that such a course should have been dwelt on at length in the *vaisnava smritis* by the best thinkers for the guidance of the people, instead of being left to the fanciful choice or immature thoughts of the average man ; and an early treatment of such a course of action in the *smritis* could have prevented the replacement of secular duties by their religionized and ritualized substitutes. That *work is religion* has been an early Hindu text from the time of the *Gita*, and the prevention of its disuse in a large measure among the Hindus need not have made it necessary for them to be roused to its importance and learn it afresh by an impact from the West and through its western versions by the European savants.

Diverse topics of the *Muktaphalam*.

The chapters of the *Muktaphalam* from the first to the eleventh have compiled slokas from the *Bhagavata* on various topics relating to *Vishnu* and his manifestations, his presence in all beings, his *bhaktas*, and the various 'limbs of *bhakti*'. The delineation of Vishnu's manifestations has its significance in the fact that a manifestation was assumed with a particular intention or was connected with a particular phase of his activities, and may be chosen as the object of worship by a *bhakta* according as a manifestation appeals to him supremely, or is considered to bring him a particular form of well-being of which he is desirous. It should also be borne in mind that no manifestation of Vishnu is amenable to worship in any spirit except those of *santa* and *dasya*, while

NATIONAL ARCHIVES OF INDIA

Krisna can be the object of worship with all the feelings from *santa* to *madhura*. The feeling of reverence, however, which conduces to the maintenance of a distance between the devotee and the object of worship often inclines the *santa* and *dasya* worshippers to resort to Narayana or some other manifestation, which by its deviation from the human form, or association with awe-inspiring or other deeds does not afford any scope for feelings other than *santa* and *dasya*.

Conclusion.

I have now touched upon certain view-points from which the development of *Vaisnava sadhana* and the ideas and and beliefs underlying it, may be seen with a significance usually missed by those who do not look at them with the eye of belief. The stand-point of wholesale belief, on the other hand, that attempts to substantiate every tittle of the ancient lore garnered in the *Bhagavata* does not appeal to people of the present age, usually desiring to have some reason in their beliefs, and not at all ready to accept those statements which conflict with the extant certain conclusions of modern science. The ancient religious books of almost all religions contain, more or less, generalizations which do not tally with the results of modern scientific investigations, and the infallibility claimed for the religious works is thereby impeached inspite of attempts of some of the interpreters to justify the generalizations by drawing out allegorical or esoteric meanings, which often defeat their own objects by being uncouth and far-fetched. The distrust created by this conflict of portions of

NATIONAL ARCHIVES OF INDIA

ancient lore with the truths of science tends to be extended to the spiritual and religious matters upon which really the value of the works is and should be recognized as based. The better course, I think, for the religious interpreters would be to draw a clear line of demarcation between the essential and the non-essential, and thus prevent a wholesale rejection of both, resulting in the consequences that we find in abundance around us at the present moment. It is feared that such a line of separation expressly pointed out may diminish more the sanctity and weight of the works than is desirable ; but the harm it has done is more than it would perhaps have been by the adoption of the alternative. In any case, the line has to be drawn to prevent the growing spread of distrust in the essential portions of the religious works along with that in the unessential.

I have attempted in this discourse to sketch the main features of *bhakti* as found in the *Bhagavata* (of which the *Muktaphalam* is a topical rearrangement of a number of its verses) with occasional glances at the connected issues in order to place before the reader the standpoints from which certain aspects of *bhakti* may be viewed and their significance realized. I have tried to draw the outlines of the entire psycho-historical side of *bhakti* in order that any portion of it forming the subject-matter of any particular chapter of the *Bhagavata* or the *Muktaphalam* might be seen in its relation to the whole, together with its location as a link in the chain of *sadhana*. To the Hindus, religion is not merely a body of tenets to be believed as true but a course of *sadhana* i.e. a means by which

NATIONAL ARCHIVES OF INDIA

the devotee can, if he tries whole-heartedly, realize the Ultimate Reality by intense and constant endeavours, and by conduct regulated by this high ideal. In the path of *bhakti*, the emotions are primarily utilized for creating in the devotee a ceaseless current of inclinations towards the Deity by the imposition between them of a nexus of relationship in and through which, the *sadhaka* likes most to be tied to Him. It may be called the *yoga* of emotions alongside of the *yoga* of intellect and the *yoga* of actions (implying will), the names indicating the particular mental functions upon which stress is laid in the three paths. It is the touch of the emotions that inspires and strengthens the devotee and makes pleasurable the journey that would otherwise have been very arduous. It is perfectly recognized that it is not possible for the finite mind of man with its heavy limitations to grasp the Infinite unless it be in the likenesses of the sea, the sky, and so forth, which are really far from being the Infinite connoted by the term, and serve as but symbols, while it is believed that it is not impossible for the Source of all forms visible in this universe to assume for Himself a form and appear before the devotee, nor is it possible for the Receptacle of the tenderest feelings to continue irresponsive to the hearty and incessant calls of the *sadhaka* trying his utmost to be deserving of His response or mercy. His presence is all-pervasive, but at times He incarnates for meting out mercy to the afflicted and erring world. His incarnation as Krisna had as one of its principal objects the showing of new ways of approach to men,

NATIONAL ARCHIVES OF INDIA

and it was these ways that have formed the subject-matter of a large portion of this discourse. In these ways of realization, the unbearable majesty of His infinitude limits itself into the finite to bring Himself within the easy reach of human beings. To conceive Him in His limitless qualities, His 'universal appearance' visible in and through the minutest form of existence to the highest, yet not confined to these limits, and through the numberless manifestations of life, intelligence, and beauty in this universe, staggers even the boldest imagination. It was one of the objects of his incarnation as Krisna to obscure, as it were, his blinding effulgence, to be realizable by the finite intellect, to be graspable by the finite emotions, to love and to be loved by the finite hearts of man. I have, in the foregoing pages, looked at the incarnation of Krisna and the feelings through which he puts Himself within man's reach in their psycho-historical detachment from each other with glances at the gradual growth of the cult, but to the devotee they appear as one co-existent or sequential body of realities occurring within the time Krisna continued incarnate, and perfectly right is he so far as his *sadhana* is concerned. It is this point of view that rather strengthens his belief and helps his *sadhana*. Standing on this foundation of belief, he works on the particular line of devotion prescribed for himself, and expected to achieve for him the results that attended the efforts of the great devotees, in whose footsteps he is following. The experiences of the real *sadhakas* can be tested only by those who proceed along the same lines, and the opinions of

NATIONAL ARCHIVES OF INDIA

others, however great in other fields of experience, are of as little value as that of an ignoramus upon the reactions of a chemical experiment. The path of *bhakti* is smoother than any other on account of the little demand made by it on any technical knowledge, or arduous acts on the part of the devotee. The only demand that it makes, is upon the direction of his emotions towards the Deity, to hold Him always in mind by conscious or subconscious working of his memory, and be thus inspired in all his actons by the ideals that a devotee ought to follow ; in short, to set himself adrift along the current of his feeling which by its depth and intensity carries him towards his goal. This is what makes the *sadhana* of *bhakti* so popular ; and adaptible as it is to the varying inclinations of the *sadhaka*, it has succeeded in having a very large number of adherents. It is, moreover, liberal in its treatment of man, however low in castal status, a feature that is wofully lacking in practice in many of the Hindu sects. All these factors account for the large number of followers of the doctrine of *bhakti*, the foundation of modern Vishnuite Hinduism professed by at least 150 millions of the inhabitants of India[1]. The function of the *puranas* is to popularize the traditional Hindu culture and imbue the minds of the people with the spiritual and religious truths garnered by the early Hindu philosophers and *sadhakas*, and incorporated in the works in a popular form. Eager circles of listeners squatting round an interpreter reading out and explaining the

1. Encyclopedia of Religion and Ethics, II, p. 539

NATIONAL ARCHIVES OF INDIA

slokas of the *Bhagavata* were a common sight in the past. The practice is not so much in vogue now-a-days owing mainly perhaps to the different spirit of the times, though its potency as a distributer of culture cannot be questioned. If the *Bhagavata* embodies in itself the essence of the philosophical and religious truths that have been reached by the Hindus by virtue of their centuries of search and *sadhana* as regulated and stimulated by the peculiar *varnasrama* organization of the Hindu society, and if the Hindus, as represented by their highest masters in the fields of spiritual and religious culture, have by virtue of arduous efforts for centuries, have made more conquests in the field of spiritual knowldge and *sadhana* than any other people, the value of the *Bhagavata* as an easy version of the said truths, and as the manual of *bhakti-sadhana* cannot be gainsaid. There are extant on the earth various religions and religious cults, attempting for their followers to tear up to a certain extent the veil that puts out of sight the Worker of the universe and His ways. To understand all His ways, infinite as they are, is not the aim of *bhakti* or perhaps of any other Hindu cult. In his *ananda* aspect i.e., in his accept of love, bliss, and beauty, he allows himself to be realized by man, which does not mean an intellectual mastery by the latter of all He does and the manner of doing it. To be clearer, a son need not master all the learning of his erudite father, nor a friend to acquire the scholarship of his learned friend, for the completion of the tie that subsists between them ; because it is complete without

NATIONAL ARCHIVES OF INDIA

it. To enable man to be conscious of such a tie, to make it effectively binding, to convert it into an actuality instead of allowing it to be but imaginary is the aim of *bhakti*, and on it depend the value and importance of the *Bhagavata* and the *Muktaphalam*.

96, Amherst Street,
Calcutta, 1921.

NARENDRA NATH LAW.

NATIONAL ARCHIVES OF INDIA

NATIONAL ARCHIVES OF INDIA

द्वादशोऽध्यायः ।

विप्रलम्भशृङ्गारे गोप्यः ।

अक्षण्वतां फलमिदं नपरं विदामः
सख्यः पशूननु विवेशयतोर्वयस्यैः ।
वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं
यैर्वेनपीतमनुरक्तकटाक्षमोक्षम् ॥१॥

एवं चतुर्भेदसम्भोगशृङ्गारमुक्त्वा विप्रलम्भमाह । विप्रलम्भ इति । स चतुर्धा पूर्वानुराग-मान-प्रवास वैचित्त्य भेदात् । तल्लक्षणन्तु "प्रासङ्गतयो र्यूनोरभिलाषः प्रवर्त्तते । सङ्कल्पो रमणीयोऽनुरागः स प्राच्य उच्यते ॥" "अहेरिवगतिः प्रेम्नः स्वभावः कुटिलो भवेत् । अतोहेतोरहेतोश्च युनोर्मानमुदञ्चति ।" "देशान्तरादिभिर्यूनोर्व्यवधानं चिराय यत् । नवोऽनुरागैः प्रौढ़ैर्वा प्रवासः सोऽभिधीयते ॥" (१) यत्र तु सन्निकर्षेऽपि प्रियः प्रियावा विभ्रमवशात् स्वरूपमपि विस्मरति सवैचित्त्य विप्रलम्भः । स च प्राच्य स्त्रीभ्यो भिन्न एव तल्लक्षणा भावात् । न चायं नास्त्येव इहैव वक्ष्यमाणत्वात् "अयिप्रिये" इत्यारभ्य "मुनिर्यथात्मान"मित्येतत् पर्य्यन्तं (२) नैषधचरितेऽपि नवमसर्गे नलभैमीसंवादेऽस्यैव प्रपञ्चितत्वाच्च । यत्तु (३)

---

(१) उज्ज्वलनीलमणिः—स्थायी, मान, ४२ श्लोकः ।

(२) नैषधचरिते नवमसर्गे नलदमयन्तीसंवादे, १०१ श्लोकमारभ्य १२१ श्लोक यावत् । अत्रत्यस्य पूर्णे व्याख्यानं मल्लिनाथस्य तेषां श्लोकानामस्ति ।

(३) कवीन्द्रः काव्यालङ्कारप्रणेता वासुकिभट्टतनयः प्रतापरुद्रोपनामकः । कस्यचिन्मतेन

भोज-रुद्रटाभ्यां स्त्रिया: पुरुषस्य वा(चा) पञ्चत्वेऽन्यतरस्मिन् दु:खाय-माने करुणाख्यमस्य भेदान्तरत्वमभ्युपगम्यते तदसत्। तस्य शोक-स्थायित्वेन करुणाख्य: पृथक्भूत रसत्वात्। केवलं स्त्रीपुरुषाल-म्बनत्वेन विप्रलम्भभ्रममात्रम्। अन्यथा प्रेयसोऽपि भेदान्तरमभ्यु-पगम्यते। यत्तु (४) मम्मटेन मेघदूतकाव्यमालोक्य शापशैतुरित्य-भेदान्तरमुक्तम् तदप्यसत्। तस्य प्रवासान्तर्गतत्वात्। अन्यथोक्त-मर्ण राजवन्नियन्त्रितादि निमित्ते भेदानन्त्यं स्यात्। अतएव हेम-चन्द्रादिभि (५) रेतन्नादृतम्। तस्मादुक्तभेदा एव युक्ता:। ननु विप्रलम्भो दु:खरूपत्वात् नोच्यतामिति वाच्यम्। सम्भाग-पोषक-त्वादस्य। यदाह राजा (६) "नविनाविप्रलम्भेन सम्भोग: पुष्टि-मश्नुते। कषायिते हि वस्त्रादौ भूयान् रागोऽनुषज्जते॥" अत्र च शोकौत्सुक्यमदग्लानिनिद्रासुप्तबोधचिन्ताऽसूया श्रमनिर्वेदमरणो-न्माद-जड़ताव्याधिस्वप्नापस्मारादय: सञ्चारिण:। सन्तापजागर-कार्कश्य प्रलापचाम्तानेत्रवचोवक्रतादीन् सञ्चरणा (संचारणा) नुकार:। स्मृतिलेखनवाचनस्वभावनिश्चववार्त्ता प्रश्नस्त्वहनिर्वेद सात्त्विकानुभवनशीलसेवनमरणोद्यम सन्देशादयोऽनुभावा:। तत्र पूर्वानुरागे द्वेधा दैवपारवश्ययोरप्राप्तिहेतुत्वात्। तत्र दैवहेतुकं तावदाह। अच्चक्खुताभिति। हे सख्य: यै: व्रजेशसुतयो रामकृष्णयो: वक्त्रमच्चिभिर्निपीतम्। तेषामच्चक्खुतां विशालदृष्टीनां इदं पानमिव

अलङ्कारतिलकप्रणेतेति। भोजराज: सरस्वतीकण्ठाभरणाख्यालङ्कार शास्त्रीय सन्दर्भप्रणेतेति धारानगरीश्वर: मालवदेशनायक:। एतस्य ज्योतिष: शिल्पव्याकरणदर्शनधर्मशास्त्रनीतिवैद्यके भूयांसो ग्रन्था अद्यत्वेऽपि राजन्ते।

(४) श्रीमन्मम्मटभट्टप्रणीतकाव्यतत्त्वप्रकाशे।

(५) हेमचन्द्राचार्यसूरिप्रणीतालङ्कारचूडामणौ अथवादिपदेन काव्यप्रकाशचन्द्रालोकसरस्वती-कण्ठाभरणकौस्तुभसाहित्यदर्पणादयो ग्राह्या:।

(६) भोजराजीय सरस्वतीकण्ठाभरणे।

NATIONAL ARCHIVES OF INDIA

चूतप्रवालबर्हस्तबकोत्पलाब्ज
मालानुपृक्तपरिधान विचित्रवेषौ ।
मध्ये विरेजतु रलं पशुपालगोष्ठ्यां
रङ्गे यथा नटवरौ क्वचगायमानौ ॥२॥
गोप्यः किमाचरदयं कुशलं स्म वेणु-
र्दामोदराधर सुधामपि गोपिकानाम् ।
भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो
हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथार्याः ॥३॥

केवलम् फलं नपरं नान्यत् । "च्छन्दस्यपि दृश्यत" (१) इत्यञ्णोनडिः "नञोपोऽनोऽनुरिति च मत्वे च (नटित्वे च)" अचखतामिति रूपम् । अनु अनुक्रमेण अनुवेणुना रूपानुरूपेण वेणुना जुष्टम् सेवितम् । अनुरक्तानां सानुरागानां कटाक्षाणां मोक्षोविसर्ज्जनम् यस्मिन् वक्त्रे तत्तथा ॥ १०।२१।७ (१)

चूतेति । चूतस्य प्रवालाः पल्लवाः । बर्हं मयूरपिच्छम् । स्तवकः पुष्पगुच्छः । उत्पलं रात्रिविकाशि । अब्जं दिनविकाशि । तेषां मालाभिः अनुपृक्तं संपृक्तं यत् परिधानम् तेन विचित्रोवेषो ययो स्तौ तथा गोष्ठो मण्डलो ॥ १०।२१।८ (२)

गोप्य इति । अपि (यि) गोपिकानां गोपिका सम्बन्धिनीनामपि गोपीभिः येषामित्यर्थः । स्वयं स्वातन्त्र्येणैव यस्य वेणोः पिबतः अवशिष्टम् रसं ह्रदिन्यो यमुनाद्याः स्तरवोऽपि भुञ्जते । तत्कृतः हृष्यत्त्वचः उद्भिन्नवल्कलत्वात् । अश्रुमुमुचुः । क्षरत् क्षीरत्वात् ।

---

(१) पाणिनिः ६।४।७३, ७।१।७९ सूत्रम् ।

NATIONAL ARCHIVES OF INDIA

वृन्दावनं सखिमुवो वितनोति कीर्त्तिं
यद्देवकीसुतपदाम्बुजलब्धलक्ष्मि ।
गोविन्दवेणुमनुमत्तमयूरनृत्यं
प्रेक्ष्यादि सान्ववरतान्यसमस्तसत्त्वम् ॥४॥
धन्याःस्मभूढ़मतयोऽपि हरिण्य एता
या नन्दनन्दनमुपात्त विचित्रवेषम् ।
आकर्ण्यवेणुरणितं सह कृष्णसाराः
पूजां दधुर्विरचितां प्रणयावलोकैः ॥५॥

आर्य्या रसिकाः । आभ्यामनुभावाभ्यां तरुकर्त्तृकं पानं सम्भाव्यत इत्यर्थः ॥ १०।२१।९ (३)

वृन्दावनमिति यद् यस्माद्गोविन्दस्य निर्व्वेदस्य वेणु' अर्थात् वाद्यमानमनुलक्ष्योक्त्य मत्तमयूरनृत्यं भवति (१)। वेणुध्वनिं श्रुत्वा मयूरास्तनितबुद्ध्यानृत्यन्तीत्यर्थः । प्रेक्ष्येषु दर्शनीयेषु अद्रेर्गोवर्द्धनस्य सानुषु अवरतानि वेणुगीतश्रवणार्थम् निभृतीभूतानि अन्यानि मयूरेभ्यः समस्तानि सत्वानि मृगादीनि यस्मिन् वृन्दावने तत् तथा ॥ १०।२१।१० (४)

धन्याःस्मेति । मूढ़मतयस्तिर्य्यक्त्वात् । वेणुः रणितो वादितो येन तम् । नन्दनन्दनस्य वेणुगीतमाकर्ण्येति च वक्तव्ये नन्दनन्दनमाकर्ण्येति लोको (एवो)क्त्योक्तम् । यद्येवं गायद्भाकर्णितो भवद्भिरित्युच्यते । प्रणयावलोकैः प्रीत्युत्फुल्लैर्नयननीलोत्पलैरित्यर्थः ॥ १०।२१।११ (५)

---

(१) श्रीमद् भागवत (दशमस्कन्धे) १०।२१।१० श्लोकः ।

NATIONAL ARCHIVES OF INDIA

कृष्णं निरीक्ष्य वनितोत्सवरूपशीलं
श्रुत्वा च तत् क्वणित वेणु विविक्तगीतम् ।
देव्यो विमानगतयः स्मरनुन्नसाराः
भ्रश्यत् प्रसूनकवरा मुमुहुर्विनीव्यः ॥६॥
गावश्च कृष्णमुखनिर्गतवेणुगीत-
पीयूषमुत्तम्भित कर्णपुटैः पिवन्त्यः ।
शावाः स्नुतस्तनपयः कवलाः स्म तस्थु
र्गोविन्दमात्मनि दृशाश्रुकला स्पृशन्त्यः ॥७॥
प्रायोवताम्ब(द्य)मुनयो विहगावनेऽस्मिन्
कृष्णेक्षितं तदुदितं कलवेणुगीतम् ।

कृष्णमिति वनितानामनुरागजनन-समर्थानाम् स्त्रीणामुत्सवो याभ्यां ते रूपशीले स्वरूपाचरणे यस्य तं । तेन श्रीकृष्णेन क्वणितस्य वादितस्य वेणोर्विविक्त मसङ्कीर्णरागं गीतम् । देव्यो देवस्त्रियः । स्मरेण नुन्नः प्रेषितः सारो धैर्यं यासां ताः । भ्रश्यत् प्रसूनानि कवराणि केशपाशा यासां ताः तथा । विनीव्यो विस्रस्तवस्त्राः । मुहुर्मुर्हुर्मोहाख्यां स्मरदशामीयुः ॥ १०।२१।१२ (६)

गावश्चेति उत्तम्भितां ऊर्ध्वीकृतां । च शब्दो भिन्नक्रमः । शावाश्च शावा वत्साः स्नुतः चरितः । अर्थात् मुखात् स्तनस्य पयसः कवलो ग्रासो येषां ते तथा । ते च पिवन्तस्तस्थुरिति विपरिणामः । गोविन्दं आत्मन्यन्तःकरणे स्पृशन्त्यः दृशा अश्रुकलाः आनन्दाश्रूणि स्पृशन्ति । वत्सपक्षेविपरिणामः तस्थुरित्यनेन क्रियान्तरविरहात् तात्स्थ्यात् स्तम्भ उक्तः ॥ १०।२१।१३ (७)

प्राय इति प्राय उत्प्रेक्षायां वत अहो । ये मुनयस्ते विहगत्व-

आरुह्य ये द्रुमभुजान्रुचिर प्रवालान्,
दृण्वन्ति मीलितदृशो विगतान्य वाचः ॥८॥
नद्यस्तदातदुपधार्य्य मुकुन्दगीत
मावर्त्तलक्षितमनोभव भग्नवेगाः ।
आलिङ्गन स्थगितमूर्म्मिभुजैर्मुरारे-
र्गृह्णन्ति पादयुगलं कमलोपहाराः ॥९॥
दृष्ट्वा तपे व्रजपशून् सहराम गोपैः
सञ्चारयन्तमनुवेणुमुदीरयन्तम् ।
प्रेमप्रवृद्ध उदितकुसुमावलीभिः
सख्युर्व्यधात् स्ववपुषाम्बुदमातपत्रम् ॥१०॥

मापन्ना इवेत्यर्थः । कृष्णेनेक्षितं गीतं शास्त्रस्थमध्ये स्वप्रज्ञया कृष्णेनैव दृष्टमित्यर्थः । तेनैवोक्तञ्च यत् कलं मधुरं वेणुगीतम् । भुजाः शाखाः विगता अन्येषाम् वाचो येभ्यः । वेणुगीतं विना अन्यवाचां श्रवणं नास्तीत्यर्थः ॥ १०।२१।१४ (८)

नद्य इति तत् अद्भुतं मनोभवेन कृष्णविषयरत्या भग्नो वेगो यासां ताः । स च आवर्त्तेन जलमध्यभ्रमणेन लक्षितः भगवत्युदित गाढ़भावत्वात् तत्रैव भ्रमन्त्योऽतः परतो गन्तुं न शक्नुवन्तीत्यर्थः । प्रवाहमध्ये आलिङ्गनेन स्थगितं मरुतं तीरे ऊर्म्मि भुजैर्गृह्णन्ति । सोऽयमयोग्येष्वपि सरिदादिषु भावसमारोपो रसाभास इत्युच्यते । यदाहुः "तदाभासा अनौचित्य प्रवर्त्तिता"(१)इति ॥ १०।२१।१५(९)

दृष्ट्वेति प्रवृद्धे आतपे स्वेनवपुषा आतपत्रम् । कुसुमावलीभिश्च

---

(१) नाट्यशास्त्रे भरतमुनिप्रणीते ।

पूर्णाः पुलिन्द्य उरुगाय पदाब्जराग
श्रीकुङ्कुमेन दयितास्तनमण्डितेन।
तद्दर्शनस्मररुजस्तृणरूषितेन
लिम्पन्त्य आननकुचेषु जजृम्भतादिम् ॥११॥
हन्तायमद्रिवलता हरिदासवर्य्यो
यद्रामकृष्णचरणस्पर्शप्रमोदः।
मानं तनोति सहगोगणयोस्तयोर्यत्
पानीयसूयवस कन्दरकन्दमूलैः ॥१२॥

प्रेमहर्षं व्यधात्। सख्युः श्रीकृष्णस्य। मेघोदये कुसुमस्रंसनस्य तत्कर्त्तृकताम् सम्भाव्येदमुक्तम् ॥ १०।२१।१६ (१०)

पूर्णा इति (पुण्याः)पुलिन्द्यो भिल्लस्त्रियः। पुण्याः सुकृताधिकाः। उरुगायस्य विष्णोः पदाब्जरागेण चरणलौहित्येन श्रीःशोभा तदात्मकं यत् कुङ्कुमं शोभातिशयः। सामान्याधिकरण्ये व्यङ्ग्यं। तथादयितायाः लक्ष्म्याः स्तनाभ्यां मण्डितेन तृणेषु (पु) रुषितेन विच्छुरितेन। तस्य श्रीकृष्णस्य दर्शनेन स्मररुक् कामपीड़ा यासां तास्तथा। आननेषु कुचेषु च लिम्पन्त्यः लेपनं कुर्वन्त्यः। तदा तस्मिन् श्रीकृष्णे आधिं अप्राप्तिदुःखं लक्ष्मीस्तनाभ्यां भगवत्पादयोः संक्रान्तेन तत् तृणलग्नेन कुङ्कुमेन स्वमाधिं शमयन्तीत्यर्थः। अतः पुण्याधिकाः॥ १०।२१।१७ (११)

हन्तेति हन्त अवलाः। अयं गोवर्द्धनः यत् यस्मात् रामकृष्णचरणस्य स्पर्शेन तृणाङ्कुरोद्गम व्याजात् रोमहर्षो यस्य स तथा। मानं पूजाम्। भूर्भूमिः यवसं तृणम्। कन्दरोदरी ॥ १०।२१।१८ (१२)

NATIONAL ARCHIVES OF INDIA

गा गोपकैरनुवनं नयतोरुदार
वेणु स्वनैः कलपदैस्तनुभृत्सु सख्यः
अस्स्पन्दनं गतिमतां पुलकस्तरूणां
निर्योगपाशकृतलक्षणयो र्विचित्रम् ॥१३॥
एवम्विधा भगवतो या वृन्दावनचारिणः ।
वर्णयन्त्यो मिथो गोप्यः क्रीड़ास्तन्मयतां ययुः ॥१४॥
अन्तर्गृहगताः काश्चिद् गोप्योऽलब्धविनिर्गमाः ।
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥१५॥

गा इति कलानि मधुराणि पदानि येषु तेषु वेणुस्वनेषु-तैःस्तनुभृत्सुमध्ये गतिमतां स्पन्दनं अकिञ्चित् चलनम् । अगतिमतां -तरूणां तु पुलक इति चित्रम् । येन दोहकेन दोह (न)काले गाः पश्चात्पादयोर्नियम्यन्ते स निर्योगपाशः । तेन कृतं तल्लक्षणं चिह्नं किल [किण] रूपं ययो स्त्री तथा ॥ १०।२१।१९ (१३)

पूर्व्वानुरागेण भजतः फलमाह ॥ एवमिति । अयञ्च पूर्व्वानुराग एव अद्यापि तासां भगवता साकं अङ्गसङ्गाभावात् । सहिदर्शितोऽष्टविंशोऽध्याये । अतएवाह "तद्व्रजस्त्रिय आश्रुत्य वेणुगीतम् स्मरोदयं । काश्चित् परोक्षम् कृष्णस्य स्वसखीभ्यो न्यवर्णयन्" (१) इत्युक्तम् । गोप्योमिथः ॥ १०।२१।२० (१४)

पारवश्यहेतुकमाह । अन्तर्गृहेति । अलब्धो विनिर्गमो याभिः । तद्भावना भर्त्तृभावना ॥ १०।२९।८ (१५)

---

(१) भागवतं १०।२१।३ श्लोकः ।

दुःसहप्रेष्ठ विरह तीव्रतापधुता शुभाः।
ध्यानप्राप्ताच्युताश्लेष निर्वृत्या क्षीणमङ्गलाः ॥१६॥
तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥१७॥
गत्यानुराग स्मितविभ्रमेक्षितै
र्मनोरमालाप विहारविभ्रमैः
आक्षिप्तचित्ताः प्रमदा रमापते
स्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥१८॥

बलवद्ध्यानाच्च तासां मुक्तिरासीदित्याह दुःसहेति। दुःसहेन प्रेष्ठस्यविरहेण य स्तीव्रतापो दुःखं तेन धुतं क्षीणं अशुभं पापं यासां तास्तथा। ध्याने प्राप्तो योऽच्युताश्लेषः तेन यानिर्वृतिः सुखं तेन क्षीणं मङ्गलं पुण्यं यासां ताः तथा। पुण्यपापक्षये हि कैवल्यम्। तच्च सुखोपभोगेन पुण्यक्षयः॥ १०।२९।१० (१६)

तमिति तं कृष्णमेव जार उपपतिः। ता सङ्गता प्राप्ताः। तादृप्यमापन्ना इत्यर्थः॥ गुणमयं लिङ्गदेहम्। बन्धनं पुण्यापुण्यम्। शुकः॥ १०।२९।११ (१७)

अथ मानविप्रलम्भः। स च प्रणयेर्ष्याभ्यां द्वेधा। अत्र प्रेमपूर्व्वको वशीकारः प्रणयः। तद्भङ्गे मानः। स च स्त्रियाः पुंस उभयोर्वा तत्र भेदान्तराणि स्वयमुह्यानि। पुंविषयन्तु प्रणयमानमत्राह। गत्येत्यादि। अनुरागेण यत् स्मितं विभ्रमेक्षितानि चञ्चलावलोकनानि। आलापो गोष्ठी। विहारो जलक्रीड़ादिः। विभ्रमः शृङ्गारचेष्टा तैराक्षिप्तं आकृष्टम्॥ १०।३०।२ (१८)

गतिस्मितप्रेक्षण भाषणादिषु
प्रियाः प्रियस्य प्रतिरूढ़मूर्त्तयः।
असावहन्त्वित्यवला स्तदात्मिका,
न्यवेदिषुः कृष्णविहारविभ्रमाः ॥१९॥
गायन्त्य उच्चैरमुमेव संहता
विचिक्यु रुन्मत्तकवद्वनाद्वनम्।
प्रपच्छु राकाशशवद्गतं वहि-
र्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥२०॥
जयति तेऽधिकं जन्मना व्रजः
श्रयत इन्दिरा शश्वदत्र हि।

गतेति गत्यादिषु प्रियस्य प्रतिरूढ़ा अनुकृता भूर्त्तिर्याभिस्ताः। हे अवलाः। अमो कृष्णोऽहमिति न्यवेदिषुः परस्परं निवेदयामासुरित्यर्थः। यतः कृष्णविहारे विभ्रमो यासां तास्तथा। (१) "चित्तद्वत्यनवस्थानं शृङ्गारादिभ्रमो मतः" ॥ १०।३०।३ (१९)

विभ्रममेवाह। गायन्त्य इति। अमुं कृष्णम्। संहता मिलिताः। वनाद्वनं वने वने विचिक्युः अन्वेषयामासुः। अन्तरमन्तः। शुकः॥ १०।३०।४ (२०)

उन्मत्तवदित्युक्तम्। तमेव विचित्रप्रलापादिहेतुरुन्मादम् प्रपञ्चयति। जयतीति। एषु श्लोकेषु च कुतूहलदृष्टिना वर्णनिर्वाह चित्रं दर्शितम्। तत्राद्यवृत्ते प्रथमपादयोर्द्वितीयमक्षरं यकारः। अन्त्ययोर्वेकारः ते जन्मनाऽधिकं जयति हि यस्मात्।

---

(१) साहित्यदर्पणे ३।१४ श्लोकः।

दयित दृश्यतां दिक्षु तावका-
स्त्वयिधृतासव स्त्वाम्बिचिन्वते ॥२१॥
शरदुदाशये साधुजात सत्-
सरसिजोदर श्रीमुषादृशा।
सुरतनाथ तेऽशुल्कदासिका-
वरद् निघ्नतो नेह किम्वधः ॥२२॥
विषजलाप्ययाद् व्यालराक्षसाद्-
वर्षमारुताद् वैद्युतानलात्।

इन्दिरा लक्ष्मीः। प्रागतलक्ष्मा विरलः प्रचारः। त्वज्जन्मनः प्रभृतित्वधिक इत्यर्थः। एवं प्रशस्य स्वगतं विज्ञापयति। दयितेति। दृश्यतां त्वया। तावकाः तावकीनाः। त्वयिधृतासव इत्यनेन तद्विचर्य्यावधिकं प्राणधारणमित्युक्तम्॥ १०।३१।१ (२१)

शरदि उदाशयोजलाधारः। • तस्मिन् साधुजातं यत् सत्-प्रशस्तं सरसिजम्। तस्य उदरश्रियम् गर्भशोभां मुष्णाति अपहरति यादृक् तया सुरतनाथ सम्भोगस्वामिन्! दृष्ट्यैव सम्भोगदासीत्यर्थः। अशुल्कदासिकाः निर्मूल्यदासीः। अस्माद्विघ्नतः तादृग् दानाभावादित्यर्थः। वध इति वधजन्यं पापं तत्साधनत्वात्तच्छब्दः "आयुर्घृतमिति" (१) वत्। अत्र पादचतुष्केऽपि द्वितीयमक्षरं रेफः॥ १०।३१।२ (२२)

सदा त्वातुराकस्मिकमुपेक्षणं तवनोचितमित्याहुः। विषेति।

(१) "आयुर्घृतम्" इत्यत्र "युष्कारणमपि घृतं कार्य्यकारणभावसम्बन्ध-सम्बन्धायुस्त्वादात्मना प्रतीयते। अन्यवैलक्षण्येनापि अभिचारेणायुष्करत्वं प्रयोजनम्" साहित्यदर्पणम्। २५७ श्लोकः।

वृषमयात्मजाद् विश्वतोभया-
दृषभ ते वयं रक्षिता मुहुः ॥२३॥
न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये,
सख उदेयिवान् सात्वतां कुले ॥२४॥
विरचिताभयं वृष्णिधुर्य्य ते,
चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्तकामदम्,
शिरसि धेहि नः श्रीकरग्रहम् ॥२५॥

विषरूपात् कालिन्दीजलाद् योऽप्ययो नाशः । व्यालः अघासुरः राक्षसः प्रलम्बः । वर्षात् । इन्द्रकोपात् सम्वर्त्तकोपद्रवः । मारुतो वात्यारूपस्तृणावर्त्तः । वैद्युतोऽनलः अग्न्युत्पातः । वृषोऽरिष्टः । मायात्मजो व्योमः । किं बहुना विश्वतः सर्वस्माद् भयाद् भयहेतोः । हे ऋषभ सर्वश्रेष्ठ ! ते त्वया । अत्र पादत्रये प्रथमं वकारः । द्वितीयः षकारश्चतुर्थोऽपि ॥ १०।३१।३ (२३)

ननु सर्वेषामस्माकं तुल्यत्वात् कः कं रक्षतीति चेत्तत्राहुः । न खल्विति । अखिलदेहिनामन्तरात्मनो जीवान् पश्यतीति तथा परमात्मा इत्यर्थः । विखनसा ब्रह्मणा । उदेयिवान् उदितोऽसि । सात्वतां यदूनाम् । अत्र पादचतुष्केऽपि द्वितीयोवर्णः खकारः । पालकत्वाद् अस्मानपि पाहीत्यर्थः ॥ १०।३१।४ (२४)

विरचितेति । संसारभयात्तच्चरणं प्राप्तानां कृताऽभयं कर-

व्रजजनार्तिहन् वीरयोषिताम्,
निजजनस्मयध्वंसन स्मितः ।
भज सखे भवत् किङ्करीः स्मनो-
जलरुहाननं चारुदर्शय ॥२६॥
प्रणतदेहिनां पापकर्षणम्,
तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदाम्बुजम्,
कृणु कुचेषु नः कृन्धि हृच्छयम् ॥२७॥
मधुरया गिरा वल्गु वाक्यया,
बुधमनोज्ञया पुष्करेक्षण ।

कमलं नः शिरसि धेहि । श्रियः करं गृह्णातीति । तत्तथा । अत्र पादचतुष्केऽपि द्वितीयो रेफः ॥ १०।३१।५ (२५)

व्रजेति । भो वीरयोषितां मध्ये ये निजजना स्वत्परिग्रहास्त्रिय-स्तेषां स्मयः प्राणप्रिया वयमिति दर्पः । (तस्य ध्वंसनम् स्मितं यस्य ।) तस्य ध्वंसनं स्मितं (स्थितम्) यस्य स तथा । भवत् किङ्करीरस्मान् भज । अत्र पादचतुष्केऽपि द्वितीयो जकारः ॥ १०।३१।६ (२६)

प्रणतेति । तृणचरा गावः । निकेतनमाश्रयः । फणी शेषः कालो-यस्य । कृणु कुरु । कृन्धिच्छिन्धि (अर्पय) । हृच्छयं कामम् । अत्र द्वितीयो नकारः ॥ १०।३१।७ (२७)

मधुरयेति । वल्गूनि वाक्यानि यस्याम् । बुधमनोज्ञया विदग्ध-हृदयहारिण्या । विधिकरीः आज्ञाकरीः । न भवतोऽन्योममान्यत्

बिधिकरोरिमा वीर मुह्यती-
रधरसीधुनाप्याययस्व नः ॥२८॥
तव कथामृतं तप्तजीवनम्,
कविभिरीड़ितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततम्,
भुवि गृणन्ति ते भूरिदा जनाः ॥२९॥
प्रहसितं प्रियप्रेमवीक्षितम्,
विहरणञ्च ये ध्यानमङ्गलम् ।
रहसि संविदो याहृदिस्पृशः,
कुहक नो मनः क्षोभयन्ति हि ॥३०॥
चलसि यद्व्रजाच्चारयन् पशून्,
नलिनसुन्दरं नाथ ते पदम् ।

प्रियतमं अस्ति इत्येवं रूपया मृषा वाचा विमोहिता इत्यर्थः। अधर-सीधुना अधरामृतेन। अत्र धकारो द्वितीयः ॥ १०।३१।८ (२८)

तवेति। आततं बहु। भूरिदाः। स्थूलदातारः। ते गृणन्ति। अत्र द्वितीयो वकारः। पादचतुष्कस्य दलद्वये च क्रमात् तकार-ककार-शकार-भकाराः ॥ १०।३१।९ (२९)

प्रहसितेति। ध्यानं मङ्गलं चिन्त्यमानं सुखावहं इत्यर्थः। रहसि सम्बिदः एकान्तेप्रतिश्रुतानि हृदिस्पृशो हृदयङ्गमाः। कुहक कपटिन्। अन्ययोक्तमन्यथा करोतीति कुहकत्वम्। अत्रहकारो द्वितीयः ॥ १०।३१।१० (३०)

चलसीति। नलिनसुन्दरं कमलवत् कोमलम्। शिलैः कणिश-

शिलतृणाङ्कुरैः सीदतीतिनः,
कलिलतां मनः कान्त गच्छति ॥३१॥
दिनपरिक्षये नीलकुन्तलै,
र्वनरुहाननं बिभ्रदावृतम् ।
धनरजस्वलं दर्शयन् मुहु-
र्मनसि नः स्मरं वीर यच्छसि ॥३२॥
प्रणतकामदं पद्मजार्चितम्,
धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमञ्च ते,
रमण नस्तनेष्वर्पयाधिहन् ॥३३॥
सुरतवर्द्धनं शोकनाशनम्,
स्वरित वेणुना सुष्ठुचुम्बितम् ।

खण्डैः। कलिलतां अधैर्य्यम्। अत्र लकारो द्वितीयः ॥१०।३१।११(३१)

दिनेति। कुन्तलैरावृतम्। घनोरजोविभ्रत्स्वलं सुष्ठु भूषणम्। कीदृशं वनरुहाननं कमलवन्मुखम् दर्शयन् स्मरं परं यच्छसि। धनं गोधनम्। भोमादिवत् पूर्व्वपदलोपः। अत्र मकारो द्वितीयः ॥ १०।३१।१२ (३२)

प्रणतेति। पद्मजो ब्रह्मा लक्ष्मीर्वा। पद्मजे इत्यत्र "जनसनेति विट् विडनो"रिति (१) आत्वम्। शन्तमं सुखतमम्। तेन त्वदीयानामस्माकम्। अत्राद्यपादयोर्हलद्वये क्रमात् पकारधकारौ अन्त्ययो स्तृतीयवर्णौ नकारः ॥ १०।३१।१३ (३३)

---

(१) पाणिनिः ३।२।६१

इतररागविस्मारणं नृणाम्,
वितर वीर नस्तेऽधरामृतम् ॥३४॥
अटति यद्भवानह्निकाननम्,
त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखञ्च ते,
जड़ उदीक्षतां पक्ष्मकृद् दृशाम् ॥३५॥
पतिसुतान्वय भ्रातृबान्धवा-
नतिविलङ्घ्यतेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीत मोहिताः,
कितव योषितः कस्त्यजेन्निशि ॥३६॥
ब्रजवनौकसां व्यक्तिरङ्ग ते,
वृजिनहन्त्र्यलं विश्वमङ्गलम् ।

स्मरतेति । स्मरितः षड्जादिस्वरयुक्तः । इतररागा अधरामृतादन्येऽभिलाषाः । अत्र पूर्वार्द्धे द्वितीयो रेफः । उत्तरार्द्धे तृतीयः । यद् यदा । त्रुटिः त्रसरेणुत्रयोपलक्षितः कालः । अपश्यतां अस्मदादीनां उदीक्षताम् । पक्ष्मकृद् निमेषकर्त्ता जड़ः नीरसत्वात्, अत्राद्यदलयोरकारः । अन्त्ययोस्तकारः । पादचतुष्के द्वितीयमक्षरं टवर्गः । १०।३१।१४ (३४)

अटतीति स्पष्टम् ॥ १०।३१।१५ (३५)

पतीति । अन्वयः कुलम् । अतिविलङ्घ्य । अतिक्रम्य ते अन्ति तवसमीपं गतयो गानभेदाः । हे कितव धूर्त्त अत्र द्वितीयस्तकारः । कुच्छब्दस्योदय उत्पत्तिर्यस्मात् प्रहसिताननात् । अतिस्पृहया । अत्र द्वितीयो हकारः ॥ १०।३१।१७ (३६)

NATIONAL ARCHIVES OF INDIA

त्यजमनाक् च न स्वत्स्पृहात्मनाम्,
स्वजनहृद्रुजां यन्निषूदनम् ॥३७॥
रहसि संविदं हृच्छयोदयम्,
प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरःश्रियो वीक्ष्य धामते,
मुहुरतिस्पृहा मुह्यते मनः ॥३८॥
यत्ते सुजातचरणाम्बुरुहं स्तनेषु,
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किं स्वित्,
कूर्पादिभि र्भ्रमति धीर्भवदायुषां नः ॥३९॥

व्रजेति । व्यक्तिः शरीरम् । वृजिनहन्त्री दुःखशमनी । त्वत् स्पृहायामात्मनो यासां तास्तथा । स्वजनहृद्रुजां हृदयरोगानां निषूदनं शमकं यत् आलिङ्गनादि तद् मनाग् अल्पमपि त्यज मुञ्च-देहीत्यर्थः । स्वजनविशेषणेन त्वदधीनं हृदयरोगशमनमित्युक्तम् । अत्राद्यपादयोर्हलद्येष्वादिर्वकारः । (क्रमाद् वकार जकारौ) अन्त्यपादयोर्जकारो द्वितीयः । संयोजयतीत्यत आरभ्य एतत्पर्य्यन्तं एकादशाक्षराया जातेः षट्शतोत्तर चतुःषष्टि भेदः ॥ १०।३१।१८(३७)

रहसीति । स्पष्टम् ॥ १०।३१।१७ (३८)

यदिति । यत्ते सुजातमति कोमलं । भीताः कर्कशस्तनस्पर्शाद् (न्) मा(र)स्य सौकुमार्य्यमभाङ्क्षीदिति भयम् । तेन चरणाम्बुरुहेण । अटवीं अरण्यम् । यद् यदा नयसि (न यच्छसि) गच्छसि । नयोप-गताविति ॅ (अ)कारान्तोप्यस्ति । "यत्तदोः नित्यसम्बन्धात्" ।

NATIONAL ARCHIVES OF INDIA

वामबाहुकृतवामकपोलो-
वल्गितभ्रूरधरार्पितवेणुम्।
कोमलाङ्गुलिभिराश्रितमार्गम्,
गोप्य ईड्यति यत्र मुकुन्दः ॥४०॥
व्योमयानवनिताः सहसिद्धै-
र्विस्मितास्तदुपधार्य सलज्जाः।
कामसार्गण समर्पितचित्ताः,
कश्मलं ययुरपस्मृतनीव्यः ॥४१॥

तदास्माकं बुद्धिर्भ्रमति किमिति कूर्पादिभिः सूक्ष्मोपलादिभिः किखिन्नव्यथते किं खिदिति वितर्के। भवान् आयुर्ग्यासां स्तास्तथा। गोप्यः श्रीकृष्णम् ॥ १०।३१।१९ (३८)

अथ द्वाविंशत्या श्लोकैः प्रवासमाह। वामबाहुरिति। अत्र चैकादशयुगलानां प्राग्वच्च वर्णत्रिवर्गनिर्वाहः। प्रवासत्वे तु गोप्यः। "(श्रीमत्) कृष्णे वनं याते तमनुद्रुतचेतसः। कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान्"(१) इति गमकम्। इदं चरणभ्रमणेर्लक्षितं स्वागताख्यं च्छन्दः। वामबाहौ कृतो निहितो वामः कपोलो येन। वल्गिते किञ्चिदुच्चलिते भ्रुवौ यस्य स तथा। कोमलाभिरङ्गुलीभिराश्रिताः स्पष्टामार्गाः। षड्जादिस्वरव्यञ्जकानि स्थानानि यस्मिन् वेणौ तम्। यत्र यदा ईड्यति वादयति हे गोप्यः। अत्राद्य पादयोर्व्वकारः आदिः कृत इति चित्रम् ॥ १०।३५।२ (४०)

व्योमेति। तदा व्योमयानवनिताः खेचर-स्त्रियः। तद्वेणुवादनकामस्य मार्गणाः सम्मोहनादयः पञ्चशराः स्तेषां समर्पितम्। तद-

---

(१) भागवतं १०।३५।१ श्लोकः।

हन्तचित्रमबलाः शृणुतेदम्,
हारहास उरसिस्थिरविद्युत्।
नन्दसूनुरयमार्त्तजनानाम्,
नर्म्मदोयर्हि कूजितवेणुः ॥४२॥
वृन्दशोव्रजवृषामृगगावो-
वेणुवाद्यहृतचेतस आरात्।
दन्तदष्टकवला धृतकर्णाः,
निद्रिता लिखितचित्रमिवासन् ॥४३॥

ग्रीभूतं चित्तं यासाम्। कश्मलं मोहः। अपस्रु(स्रृ)ताग्रिथिलो (श्लथो) भूतानीवो यासां ताः। अतएव वेणुगीतोद्दीपित स्वभावस्य नीवीश्लथत्वेन प्रकटितत्वात् सलज्जाः। अचाद्ययोर्व्वकारः। अन्तायोः ककारः॥ १०।३५।३ (४१)

हन्तेति। हन्त चित्रं हे अबलाः (शृणुतेदम्) हारवद् विशदो-हासो यस्य। विशदाद्युद्गतिर्यस्याः सा विद्युल्लक्ष्मीः उरसिस्थिता यस्य। "अमूर्द्धमस्तकात् स्वाङ्गादकामे" (१) इत्यलुक्। नर्म कौतुकम्। यर्हि यदा कूजित वेणुः वेणुं कूजयति। अत्राद्ययो-र्हकारः। अन्तायोर्नकारः॥ १०।३५।४ (४२)

वृन्दश इति। वाद्यं वादनम्। भावेक्त्यः। आराद् निकटे। दन्तैर्दृष्टा न तु निगीर्णाः कवला यैः। धृतकर्णा वेणुगीते दत्तावधानाः। निद्रिता इति "तारकादिभ्वादितच्" (२)। निद्रितानामपि किञ्चिच्चलनमुपलभ्यते। अत्र तु तदपि नास्तीति वक्तुमुद्यमान्तरं लिखितग्रहणम्। स्मितं भ्रमनिवृत्त्यर्थम्। अत्राद्ययोर्व्वकारः॥ १०।३५।५ (४३)

---

(१) पाणिनिः ६।३।१२ सूत्रम्। (२) पाणिनेः तारकादिभ्यो विहितेतच् प्रत्यय सूत्रम्।

NATIONAL ARCHIVES OF INDIA

वर्हिण स्तवकधातुपलाशै-
र्बद्धमल्लपरिवर्ह विडम्बः ।
कर्हिचित् सबल आलि सगोपै-
र्गाः समाह्वयति यत्र मुकुन्दः ॥४४॥
तर्हि भग्नगतयः सरितो वै,
तत्यदाम्बुजरजोऽनिलनीतम् ।
स्पृहयतिर्वयमिवाबजपुण्याः,
प्रेमवेपितभुजास्तिमितापः ॥४५॥

वर्हिण इति । वर्हिणो मयूरा विद्यन्ते स्वामितया येषां तानि वर्हिणानि मयूरपिच्छानि । "अर्शआदिभ्योऽच्" (१) । स्तवकाः पुष्पगुच्छाः । धातुर्मनःशिलादि । पलाशं पत्रं तैर्बद्धोरचितः । मल्लपरिवर्हाणां मल्लोपकरणानाम् विडम्बोऽनुकारो येन । कर्हिचित् कदाचित् । एवं विचित्रमित्यर्थः । आलि-वयस्यः बलो बलभद्रः । अत्वाद्ययोर्वकारः ॥ १०।३५।६ (४४)

तर्हीति । तर्हि तदानीम् । भग्नगतयः सज्ञानजाड्यसञ्चारि भावत्वात् । तस्य मुकुन्दस्य । अनिलेन दूतीभूतेन नीतं प्रापितम् । वैशब्द उत्प्रेक्षायाम् । निष्कारणा नदीवृत्तिः सकारणत्वेनोत्प्रेक्ष्यते । उत्प्रेक्षायाञ्च भगवतः सरिताञ्च भर्तृ-पत्नी । सम्बन्धव्यवहारमारोप्य-व्यङ्ग्यः ॥ स्पृहयतोः स्पृहयन्त्यः । रज.स्पृहयतीरिति द्वितीयानिर्देशो रजसः ईप्सिततमत्वविवक्षया । अन्यथाहि "(२) स्पृहेरीप्सित" इति

---

(१) पाणिनिः ५।२।१२७ सूः ।

(२) पाणिनिः २।३।१४ सूः ।

NATIONAL ARCHIVES OF INDIA

अनुचरैः समनुवर्णितवीर्य-
आदिपुरुष इवाचल भूतिः ।
वनचरो गिरितटेषु चरन्ती-
र्वेणुनाह्वयति गाः स यदा हि ॥४६॥
वनलतास्तरव आत्मनि विष्णुम्,
व्यञ्जयन्त्य इव पुष्पफलाढ्याः ।
प्रणतभारविटपा मधुधाराः,
प्रेमहृष्टतनवो ववृषुः स्म॥४७॥

सम्प्रदानत्वे चतुर्थी भाष्यम् । अवहुपुण्यावयमिवेति । यथा वयं तत्-पादरजः स्पृहयामो न तु प्राप्नुमः । अवहुपुण्यत्वात् तथेता इति । स्पृहामात्रे स्वदृष्टान्तो नत्वप्राप्तौ । नदीभिः (अपि बहुशः) प्राप्त-त्वात् । गोपीभिरपि बहुशः प्राप्तत्वेऽपि क्षणं विप्रलम्भासहत्वाद-प्राप्तबुद्धिः । प्रेम्ना वेपिताविनम्रीभूताः भुजोर्म्मिरूपा यासां ताः । (स्तिमिता निश्चलाः) आभ्यां कम्पस्तम्भौ शृङ्गारानुभावावुक्तौ । अत्राद्ययोस्तकारः ॥ १०।३५।७ (४५)

अनुचरैरिति । भूतिरैश्वर्य्यम् । स कृष्णः । अत्राद्ययोरवर्णाः (गंः) अन्त्ययोर्वः ॥ १०।३५।८ (४६)

चिरमनुशीलानां स्वस्मिन् अभिव्यक्तिमाह वनलतेति । भारेण प्रणताः प्रणतभाराः ते विटपा येषां । मधुधारा क्षीरधाराः मिषा-दानन्दाश्रूणीत्यर्थः । हृ(ह)ष्टतनव उद्भिन्नत्वच्कात् । अत्रादाद्ययोर्व-कारः (अन्त्ययोः प्रशब्दः) ॥ १०।३५।९ (४७)

NATIONAL ARCHIVES OF INDIA

दर्शनीयतिलकोवनमाला-
दिव्यगन्धतुलसी मधुमत्तैः ।
अलिकुलैरलघुगीतमभीष्ट-
मादियन् यर्हि सन्धित वेणुः ॥४८॥
सरसि सारस हंसविहङ्गा-
श्चारुगीतहृतचेतस (एत्य) आरात् ।
हरिमुपासत ते यतचित्ता-
हन्त मीलितदृशो धृत मौनाः ॥४९॥
सहबलः सगवतंस विलासः,
सानुषुत्तितिभृतो व्रजदेव्यः ।
हर्षयन् यर्हि वेणुरवेण,
जातहर्ष उपरम्भति विश्वम् ॥५०॥

दर्शनीयेति वनमालायां या दिव्यगन्धा तुलसी तस्या मधुना परिमलेन मत्तैर्भ्रमरैरलघुदीर्घं यद् गीतम् तद् आदियन् तस्यादरं कुर्व्वन्। यर्हि यदा सन्धित अधरेण कृतसन्धानो वेणुर्येन स तथा। अताद्ययोर्दः (हँः) अन्त्ययो रेफः (रवर्णः) ॥ १०।३५।१० (४८)

सरसीति। हन्त हे सखि! आद्ययोः सः अन्त्ययोः हँः ॥ १०।३५। ११ (४९)

सहेति। सगवतंसाभ्यां मालाकर्णपुराभ्यां विलासः शोभा यस्य स तथा। हे व्रजदेव्यः! वेणुरवेण विश्वं हर्षयन् जातहर्षो यर्हि स्वयमुपरम्भति आनन्देन स्वयं शब्दं करोति। आद्ययोः सः ॥ १०। ३५।१२ (५०)

NATIONAL ARCHIVES OF INDIA

महदतिक्रमण शङ्कितचेता-
मन्दमन्दमनुगर्ज्जति मेघः।
सुहृदमभ्यवर्षत् सुमनोभिः,
छायया च विदधत्प्रतपत्रम् ॥५१॥
विविधगोपचरणेषु विदग्धो-
वेणुवाद्य उरुधा निज शिक्षाः।
तव सुतः सति यदाधरबिम्बे-
दत्तवेणु रनयत् स्वरजातीः ॥५२॥
सवनशस्तदुपधार्य्य सुरेशाः,
शक्रशर्व्वपरमेष्ठि पुरोगाः।

महदिति। महत्शब्देनास्य शब्दस्तिरस्कृतोमाभूत् इति शङ्का। अतो मन्दं मन्दं गर्ज्जति। अनु तच्छब्दितानन्तरं सुहृदं छायाम्। सुमनोभिः पुष्पैः प्र(आ)तपत्रम् छत्रम्। आद्ययोर्मः अन्त्ययोः सः॥ १०।३५।१३ (५१)

विविधेति। चरणं चर्य्या क्रीड़ेत्यर्थः। वाद्यं वादनम्। उरुधा बहुधा। हे सति यशोदे! तव सुतो यदा स्वरजातीः (१) षड्जादिप्रभेदाननयद् उद्भावितवान्। निजा स्वप्रज्ञोत्प्रेचिता शिक्षासंप्रदायो यासु स्वरजातिषु। आद्ययोर्व्वः॥ १०।३५।१४ (५२)

सवनश इति अनुसन्दधत्। तत्तथाविधं गीतम्। शर्व्वो रुद्रः (२) आनता कन्धरा चित्तञ्च येषाम्। चित्तपूर्वकं प्रणेमुरित्यर्थः।

---

(१) अमर—स्वर्गवर्ग—सप्तम परिच्छेदः।

(२) "ऊर्व्व/शर्व्वश्च शङ्करः" इति त्रिरूपकोषः।

NATIONAL ARCHIVES OF INDIA

कवय आनतकन्धरचित्ताः,
कश्मलं ययुरनिश्चिततत्त्वाः ॥५३॥
निजपदाब्जदलैर्ध्वजवज्र-
नीरजाङ्कुशविचित्रललामैः ।
व्रजभुवः शमयन् खुरतोदम्,
वर्ष्मधुर्य्य गतिरिड्डोत वेणुः ॥५४॥
व्रजति तेन वयं स विलास-
वीक्षणार्पित मनोभववेगाः ।
कुजगतिङ्गमितानविदामः,
कश्मलेन कवरं वसनं वा ॥५५॥
मणिधरः क्वचिदागणयन् गा-
मालया दयितगन्धतुलस्याः ।

कश्मलं मोहः । कस्य स्वरस्यायं प्रभेदो गीयत इति निश्चयाभावाद् मोहः । आद्ययोः शः । अन्त्ययोः कः ॥ १०।३५।१५ (५३)

निजेति । दलैरवयवैः नीरजं पद्मम् । ध्वजादयो विचित्राणि ललामानि चिह्नानि येषाम् । खुरतोदं खुरव्यथाम् । वर्ष्मणा देहेन धुर्य्यः श्रेष्ठो गज इति यावत् तद्वद्गतिर्यस्य । स तथा । आद्ययोर्नः अन्त्ययोर्व्वः ॥ १०।३५।१६ (५४)

व्रजतीति । यद् व्रजति तेनेत्यर्थः । सविलासं स शोभं यद्वीक्षणम् । तेनार्पितो मनोभववेगो यासां । कुजगतिं गमिताः । द्रुमवज्जड़ीभूताः । कवरं केशपाशं । आद्ययोर्वः अन्त्ययोः कः ॥ १०।३५।१७ (५५)

NATIONAL ARCHIVES OF INDIA

प्रणयिनोऽनुचरस्यकदांसि,
प्रक्षिपन् भुजमगायत यत्र ॥५६॥
कृष्णित वेणुरव वञ्चितचित्ताः,
कृष्णमन्वसत कृष्णगृहिण्यः।
गुणगणार्णमनुगत्य हरिण्यो-
गोपिका इव विमुक्त गृहाशाः ॥५७॥
कुन्ददाम कृतकौतुकवेषो-
गोप गोधनवृतो यमुनायाम्।
नन्दसूनुरनघे! तववत्सो-
नर्मदः प्रणयिनां विजहार ॥५८॥
मन्दवायुरुपवात्यनुकूलम्,
मानयन् मलयजस्परशेन।

मणीति। मणयः काचघटितादयः। दयितो गन्धो यस्याः। तुलस्याः तस्या मालया विशिष्टः। प्रणयिनः प्रियस्य कदा कर्ह्यपि। आद्ययोर्मः। अन्तयोः प्रश्लेषः॥ १०।३५।१८ (५६)

कृष्णेति। कृष्णं अन्वसत। अनुगता आसन्। कृष्णस्य मृगस्य हरेश्च गृहिण्यः गुणगणस्य अर्णमर्णवम्। गोपिका इव हरिण्यो विरहपाण्डुराः। आद्ययोः कः अन्तयोर्गः॥ १०।३५।१९ (५७)

कुन्देति। दाम माला हे अनघे! यशोदे!। यदा विजहार तदा मलयजस्य चन्दनस्य स्पर्शेन विशिष्टो वायुरुपसमीपे वाति। उपदेवा विद्याधरादयः। वादादिभिर्विशिष्टाः। प्रथमे आन्तयोर्नकारः। द्वितीये आद्ययोर्मः। अन्तयोर्व्ययोरैक्याद्॥ १०।३५।२०(५८)

NATIONAL ARCHIVES OF INDIA

वन्दिन स्तमुपदेवगणा ये,
वाद्यगीतबलिभिः परिवव्रुः ॥५८॥
वत्सलो व्रजगवां यदगश्नो-
वन्द्यमानचरणः पथि हृद्यैः ।
वत्स (कृत्स्न) गोधनमुपोह्य दिनान्ते,
गीतवेणुरनुगेड़ितकीर्त्तिः ॥६०॥
उत्सवं श्रमरुचापि दृशीना-
मुन्नयन् खुररजश्छुरित स्रक् ।
दित्सयैति सुहृदाशिष एष-
देवको जठरभूरुरुराजः ॥६१॥
मधुपकितवबन्धो मास्पृशाङ्घ्रिं सपत्न्याः,
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।

मन्देति स्पष्टम् ॥ १०।३५।२१ (५८)

वत्सलेति । यत् यदा एष सुहृदाशिषो दित्सया एति तदा खुर-रजसाच्छुरित स्रग् भवति । अगोर्गोवर्द्धनः । उपोह्य निर्व्वर्त्त्य ॥ १०।३५।२२ (६०)

उत्सवेति । श्रमरुचा श्रमशोभयाऽपि दृशीनां उत्सवं उन्नयन् प्रापयन् । उडुराजश्चन्द्रमाः । प्रथम आदायोरुः । द्वितीय आदायो-दकारः । अन्त्ययोर्दः । मदविघूर्णितेति श्लोकद्वयं बलभद्रविषय-त्वाद् अत्र नोक्तम् । गोप्यो मिथः ॥ १०।३५।२३ (६१)

एवमल्पव्यवधानं प्रवासमुक्त्वा बहुव्यवधानमाह । मधुपकितवेति ।

वहतु मधुपतिस्तन्मानिनीनां प्रसादम्,
यदुसदसि विडम्बां यस्य दूतस्त्वमीदृक् ॥६२॥
सकृदधरसुधां स्वां मोहिनीं पाययित्वा,
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ।
परिचरति कथन्तत् पादपद्मं नु पद्मा,
अपिवत हृतचेता ह्युत्तमः श्लोकजल्पैः ॥६३॥

हे मधुप ! कितवबन्धो धूर्त्तसम्बन्धिन् नः अङ्घ्रि सपत्नयाः कुचयोर्विलुलितं संयोगविमर्दात् प्रभ्रष्टम् मालाया यत् कुङ्कुमम् । तद्रूक्षैः श्मश्रुभिर्मास्मृश । रति व्यतिकरे सपत्नीस्तनकुङ्कुमरञ्जितायां उपवेशाद् भ्रमरस्य श्मश्रुतां सम्भाव्येदमुच्यते । मधुपेति । (कृष्णः) तस्य मानिनीनां माथुरीणाम् । तन्मानिनीनामिति सोत्रासं (सोल्लाहम्) विडम्बां उपालम्भनीयम् । स्त्रैणत्व प्रकाशनाद् ईदृक् कुचकुङ्कुमेन श्लाघ्यमानत्वाद् निर्लज्जास्यदत्वेन मधुपतिरप्येवंविध इत्युक्तम् । अतएव मधुपत्वं तस्य च कितवत्वम् । प्रायेण हि मधुपाः कितवाश्च निर्द्रोका भवन्ति ॥ १०।४७।१२ (६२)

कितव त्वं बन्धुत्वं चाहं । सकृदित्यादि । सुमनसोऽस्मान् भवानिव चलप्रकृतिर्दृश्यत इति । भवादृक् श्रीकृष्णः । यथा त्वं सुमनसः पुष्पान्युपभुज्य त्यजसि । तस्य चणसौहृदस्य पादपद्मं, पद्मालक्ष्मीः कथं परिचरति । नु शब्दो वितर्के अपि अहो । हृतं वञ्चितं चित्तं यस्याः । उत्तमःश्लोकस्य जल्पैः विविधैः चाटुकारैः प्रियवाक्यैः भ्रमितचित्ता परिचरतीत्यर्थः । वत इत्यनुकम्पायाम् ॥ १०।४७।१३ (६३)

किमिह बहुषड़ङ्घ्रे गायसि त्वं यदूना-
मधिपतिमगृहाणामग्रतो नः पुराणम्।
विजयसखसखीनां गीयतां तत्प्रसङ्गः,
क्षपित कुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥६४॥
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः,
कपटरुचिरहास भ्रूविजृम्भस्य याः स्युः।
चरणरज उपास्ते यस्य भूतिर्वयं का ?
अपिच कृपणपक्षेह्युत्तमः श्लोकशब्दः ॥६५॥

भ्रमरगुञ्जितं कृष्णगुणगानं मत्वाह। किमिहेति। हे षड्घ्रे! भ्रमरयदूनामधिपतिमिति लक्षणया तच्चरितमभिमतम्। तत् किं बहुगायसि। यतस्तत्पुराणं जीर्णं वयञ्चाग्रहाः एकाकिन्यः। विजयोर्ज्जुनः। तस्य सखा कृष्णः। तस्य सख्यो मथुरा स्त्रियः। तासामग्रतो गीयताम् ताश्च तवेष्टं कल्पयन्ति। पूरयिष्यन्ति इत्यर्थः। वर्त्तमानसामीप्ये (वर्त्तमानवद् वा) भविष्यदर्थे लट्। यत स्ताः क्षपितकुचरुजः दृष्टाश्च तस्य न तु वयमित्यर्थः॥ १०।४७।१४ (६४)

भो मातः मैवं वोचः त्वामप्यभिप्रेत्याह। त्वामनुस्मृत्यानङ्ग-विकलः त्वां प्रसादयितुमादिष्टवानिति। अत आह दिवीति। मामाङ्गातुमयमागत इत्यभिप्रेत्याह। स्वर्गादौ तस्य दुरापायाः स्त्रियः ताः काः न काश्चनापीत्यर्थः। अतः किं मदाङ्गानेन। कपटेन रुचिरो हासो भ्रूजृम्भश्च यस्याः। यस्य चरणरजो लक्ष्मीरप्युपास्ते तस्य वयं काः न काश्चनापीत्यर्थः। अपि चैवंविधस्यापि अस्मासु कृपया युज्यते। यतः उत्तमःश्लोकशब्दः कृपणानामपि पक्षे सहायभूते

विसृज शिरसि पादं वेद्म्यहं चाटुकारैः,
अनुनयविदुषस्तेऽभ्येत्यदौत्यैर्मुकुन्दात्।
स्वकृत इह विसृष्टापत्य पत्यन्यलोकान्,
व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन् ॥६६॥
मृगयुरिवकपीन्द्रं विव्यधे लुब्धधर्म्मा,
स्त्रियमकृतविरूपाम् स्त्रीजितः कामयानाम्।
बलिमपि बलिमत्वा वेष्टयद् ध्वाङ्क्षवद्य-
स्तदलमसित सख्यै र्दुस्त्यजस्तत्कथार्थः ॥६७॥

पुंसि वर्त्तते। स च उत्तमःश्लोकत्वादनाथानप्यस्माननुग्रहिष्यतीति भावः॥ १०।४७।१५ (६५)

भ्रमरं (णं) स्वचरणपतितं मत्वाह। विसृजेति। अनुनय विदुषः सन्मानप्रकारज्ञानं मुकुन्दागतेन त्वया चाटुकारैः प्रियवाक्योच्चारणैः। शिरसि कृतम् मे पादं विसृज वेद्म्यहं मुकुन्दं। नु अहो अस्मिन् मुकुन्दे किं सन्धेयम्? यः अस्मान् व्यसृजत्। स्वकृते कृष्णार्थं विसृष्टास्त्यक्ताः। अन्ये गृहादयः। अकृतमकृतज्ञंचेतो यस्य॥ १०।४७।१६ (६६)

अकृतचेतस्त्वमेवाह। मृगयुरिवेति। मृगयुर्व्याधः। कपीन्द्रो बाली। लुब्धस्वभावः स्त्रियं सूर्पणखाम्। अकृत कृतवान्। कामयानां कामयमानाम्। बलिं वैरोचनम्। बलिमुपहारं प्रतिग्रहरूपम्। भक्त्वा भक्षयित्वा। अवेष्टयद् बबन्ध। ध्वाङ्क्षवत् काकवत्। तत् तस्मादकृतज्ञत्वात्। असितः श्रीकृष्णः॥ १०।४७।१७ (६७)

यदनुचरितलीला कर्णपीयूष विप्रुट्,
सकृददनविधूत द्वन्द्वधर्म्मा विनष्टाः।
सपदि गृहकुटुम्बं दीनमुत्सृज्यदीना-
बहव इह विहङ्गा भिक्षुचर्य्यां चरन्ति ॥६८॥
वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः,
कुलिकरुतमिवाज्ञाःकृष्णवध्वो हरिण्यः।
दृदृशुरसकृदेतत् तन्नख स्पर्शतीव्र-
स्मररुज उपमन्त्रिन् भण्यतामन्य वार्त्ताः ॥६९॥

नन्वलं चेत् किमिति प्रस्तूयते तत्राह दुस्त्यज इति। दुस्त्यजत्व-मेवाह। यदनुचरितेति। यस्य अनु अनुकूला चरित लीलैव कर्ण-पीयूषं तस्य विप्रुषो विन्दव: तेषां सकृददनेन विधूतास्त्यक्ता द्वन्द्वधर्म्मा: स्त्रीपुरुषाणामाचारा: रागद्वेषादयो वा यैस्ते तथा। विभ्य: पत्निभ्य: नष्टा: पृथग् भूता: त्यक्तसङ्गा इत्यर्थ:। सपदि लीला कर्ण-नान्तरम्। गृहं कुटुम्बञ्चेह वृन्दावने भिक्षुचर्य्यां परमहंस-स्थितिम्॥ १०।४७।१८ (६८)

ननु पूर्व्ववृत्तान्तो यथा तथाऽस्तु एतत् सन्धानं न घटतीति चेत्त-त्राह वयमिति। वयं सर्वा अपि जिह्मस्य कुटिलस्य कृष्णस्य व्याहृतमुक्तम्॥ ऋतमिव असत्यमपि सत्यं मन्यमाना: दृदृशुरित्ये तस्य विपरिणामाद्दृशिम। एतत्तस्य विप्रलम्भकत्वम्। यथा कुलि-कस्य व्याधस्य कृतं कपटगीतं हरिण्यो वास्तवं मन्यमाना बधेनासत्यं ददृशुः। कृष्णोहरिर्मृगश्च। हे उपमन्त्रिन् प्रलोभक! तस्मादन्य-वार्त्ताक्रियताम्॥ १०।४७।१८ (६९)

NATIONAL ARCHIVES OF INDIA

प्रियसख ! पुनरागा प्रेयसा प्रेषितः किम्,
वरय किमनुरुन्धे माननीयोसि मेऽङ्ग ।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वम्,
सतत मुरसि सोम्य श्रीर्वधूः साकमास्ते ॥७०॥
अपि वत मधुपूर्य्या मार्य्यपुत्त्रोऽधुनास्ते,
स्मरति स पितृगेहान् सौम्यबन्धूंश्च गोपान् ।
क्वचिदपि स्वकथा नः किङ्करीणां गृणीते,
भुजमगुरु सुगन्धं मूर्ध्न्यधास्यत् कदानु ॥७१

किञ्चिद् भ्रमणं कृत्वा व्याहृत्तं भ्रमरं भगवत् प्रेषितं मत्वाह प्रियसखेति। हे प्रियसख! प्रेयसाकृष्णेन प्रेषितः सन् किं पुनः रागाः आगतोऽसि। किमनुरुन्धे कं अनुवृत्तिं करोमि किन्ते कामं पूरयामीत्यर्थाः। मथुरागमनमेव चरयामीतिचेत् तत्राह। नयसीति। इह अस्मिन् प्रस्तावे दुस्त्यजं इन्द्वं माथुरीभिः सह मिथुनीभावो येन तस्य पार्श्वं तदासक्तत्वेनास्माभिः सह तस्य प्रसङ्गाभावाद् व्यर्थं गमनमिति भावः। न कदाचिदेकान्ते त्वयाऽपि सह प्रसङ्गो भविष्यतीति चेत्तत्राह। सततमिति। हे सोम्य! सोमवत्प्रियदर्शन! सा प्रसिद्धा कं सुखं यथा स्यात् तथा ऽऽस्ते ॥ १०।४७।२० (७०)

मनोगतं पृच्छति अपीति। वत अहो। मधुपुरी मथुरा। आर्य्यस्य वसुदेवस्य पुत्त्रः सः क्वचिदपि कस्मिन्नपि प्रसङ्गे कथाः वार्त्ता गृणीते करोतीत्यर्थः। अपीति निपातः सम्बोधने। धास्यत् धास्यति। तु शब्दः प्रश्ने। गोप्यो भ्रमरम् ॥ १०।४७।२१ (७१)

पट्टमहिष्यः—

कुररि विलसि त्वं वीतनिद्रानशेषे,
स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः ।
वयमिव सखि कश्चिद् गाढ़ निर्विद्धचेता,
नलिननयनहासोदारलीलेक्षितेन ॥७२॥
नेत्रे निमीलयसि नक्तमदृष्टबन्धु,
स्त्वं रोरवोषि करुणं वत चक्रवाकि ।
दास्यङ्गतावयमिवाच्युत पादजुष्टम्,
किम्वा स्रजं स्पृहयसे कबरेण वोढ़ुम् ॥७३॥

अथ वैचित्त्ये विप्रलम्भमाह । पट्टमहिष्य इति । कुररीति । हे कुररि नशेषे । जगति स्वपति शयानेऽपि त्वं वीतनिद्रा यत्तत् किमीश्वरस्त्वत् स्वामी कुरर: सुप्तबोध: अदृशीभूत: । वयमिव यथा वयं गुप्तेश्वरत्वाद्वीतनिद्रा: । अनेन निद्राक्षे दलक्षणा स्मरदशा उक्ता (१) । महिषीणामीश्वरस्य सन्निहितत्वेऽपि उन्मादमाहात्म्याद् गुप्तत्वोक्ति: । न ह्यत्र भगवतोऽन्तर्धानादिकमुक्तम् । नशेष इत्यत्र न च्युतोऽच्युत इति वद् "विभाषा न लोपो नञ:" (२) । क्वचित् शब्दो हि इष्टसंप्रश्ने । नलिननयन: कृष्ण: । निर्विद्धचित्तस्त्वं वीतनिद्रत्वे कारणान्तरम् ॥ १०।२०।१५ (७२)

नेत्रे इति । नक्तं रात्रौ बन्धु: प्रियतम: । रोरवोषि भृशं शब्दं

(१) विप्रलम्भपर्य्याये उज्ज्वलनीलमणौ ।

(२) पाणिनि: ६।३।७३ सूत्रम् ।

भो भोः सदा निष्टनसे उदन्व-
न्नलब्धनिद्रोधिगतप्रजागरः।
किम्बा मुकुन्दापहृतात्मलाञ्छनः,
प्राप्तां दशां त्वञ्च गतो दूरत्ययाम् ॥७४॥
त्वं यक्ष्मणा बलवतासि गृहीत इन्दो-
क्षीणस्तमो न निजदिधीतिभिः क्षिणोषि।
कच्चिन्मुकुन्द गदितानि यथा वयं त्वम्,
विस्मृत्य भोः स्थगितगीरुपलक्ष्यसे नः ॥७५॥
किम्वाचरित मस्माभिर्मलयानिल तेऽप्रियम्।
गोविन्दापाङ्गनिर्भिन्ने हृदीरयसि नः स्मरम् ॥७६॥

करोषि। वतेति खेदे। अच्युतस्य पादाभ्यां भक्त्यर्पितत्वाज्जुष्टां वयमिव यथावयं स्पृहयामः। अनेन सङ्कल्पलक्षणा ॥ १०।८०।१६(७३)

भो इति हे उदन्वन् समुद्र निष्टनसे नितरां शब्दायसे। मुकुन्देनापहृतं आक्रुष्टं यदात्मनो लाञ्छनं समुद्रशयना (शायिनी) मूर्त्तिः तेन प्राप्तां दशामुक्तः। त्वञ्चेति चकारेण वयञ्च। समुद्रशायिन एव पुरुषस्य कृष्णत्वात् प्रतिसमुद्रं हरिः शेत इति कविसमयाच्च। अत्र निष्टनस इत्यनेन प्रलापलक्षणा ॥ १०।८०।१७ (७४)

त्वमिति। यक्ष्मणा दक्षशापजेन रोगेण प्रक्षिणोषि। न नाशयसि। यथा वयं विरहजेन यक्ष्मणा क्षीणाः। तमोऽज्ञानम्। दीधितिभिः प्रज्ञारश्मिभिर्नक्षिणुमः। विस्मृत्य विशेषात् स्मृत्वा स्थगितगीर्निश्चलः। उपलक्ष्यसे दृश्यसे नोऽस्माभिः। अनेन व्याधिलक्षणा ॥ १०।८०।१८ (७५)

मेघश्यामंस्त्वमसि दयितो यादवेन्द्रस्य नूनम्,
श्रीवत्साङ्कं वयमिव भवान् ध्यायति प्रेमबद्धः।
अत्युत्कण्ठः शबलहृदयोऽस्मद्विधो वास्यधाराः,
स्मृत्वा स्मृत्वा विसृजसि मुहुर्दुःखदस्तत् प्रसङ्गः ॥७७॥

प्रियरावपदानि भाषसे,
मृतसञ्जीविकयानया गिरा।
करवाणि किमद्यते प्रिय-
म्बद मे वल्गितकण्ठ कोकिल! ॥७८॥

न चलसि नवदस्युदारबुद्धे,
क्षितिधरचिन्तयसे महान्तमर्थम्।
अपिवत वसुदेव नन्दनाङ्घ्रिम्,
वयमिव कामयसे स्तनैर्विधर्त्तुम् ॥७९॥

शुष्यद्दाः क्लशतया (कर्शिता) वत सिन्धुपत्नाः,
सम्प्रत्यप्राप्त कमल श्रिय दृष्ट भर्त्तः।

किम्बेति। किमप्रियमाचरितं नो हृदि ईरयसि उद्दीपयसि। अनेन मनःसङ्गलक्षणा ॥ १०।८०।१९ (७६)

मेघेति। शबलं व्याकुलम्। अत्र स्मृतिः ॥ १०।८०।२० (७७)

प्रियेति। प्रियस्य नाम पदानीति। (भाषसे) अनया पञ्चमस्वर-युक्तया वल्गितो वल्गीकृतः। अत्र गुणकीर्त्तनम् ॥ १०।८०।२१ (७८)

नेति। अपि अहो। यथावयं स्तनैर्विधर्त्तुं कामयामहे। अत्र त्रपानाशः ॥ १०।८०।२२ (७९)

NATIONAL ARCHIVES OF INDIA

यद्धृदयं मधुपतेः प्रणयावलोक-
मप्राप्यमुष्टहृदयाः पुरुकर्शिताः स्मः ॥८०॥
हंसस्वागतमास्यतां पिबपयो ब्रूह्यङ्ग शौरेः कथाम्,
दूतं त्वानु विदाम कश्चिदजितः स्वस्त्यस्ति उक्तं पुरा।
किम्वा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयम्,
क्षौद्रालापयकामदं श्रियमृते सैवैकनिष्ठा स्त्रियाम् ॥८१

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
विप्रलम्भशृङ्गारो नाम द्वादशोध्यायः।

हे सिन्धुपत्नयो महानद्यः! आः क्षेपे। यूयं सूर्पस्था भवथः। शुष्यन्त्यो (पुष्यन्त्यो) हृदाः हृदयस्थानीयाः प्रदेशा यासां ताः। अपेताः कमलश्रियो मुच्यमानपद्मशोभा यासां ता स्तथा। वयमप्येवंविधाः। अत्र तनुता ॥ १०।८०।२३ (८०)

हंसेति। हे हंस आस्यतां उपविश्यताम्। शौरेः कृष्णस्य। नु अहो! अजितः कृष्णः। पुरा पूर्व्वमस्मान् प्रति यदुक्तं तत् किं स्मरति? तच्च कस्माद्भजामो वयम्। यतोऽसौ क्षौद्रवद् मधुवन्मधुरालापो न तु कामदः। श्रियमृते सा हि यासां स्त्रीणां मध्ये-एकनिष्ठा एकस्मिन्नेव स्थिरीभूता न तु चञ्चलेति सोत्प्रासोक्तिः। अयमर्थः अचञ्चला अप्यस्मान् उज्झि (हि) त्वा चञ्चलां श्रियं स भजते इति। अत्रोन्मादः। महिष्यःकुरर्य्यादीन् ॥ १०।८०।२४ (८१)

अत्र च स्मृति गुणकीर्त्तन-व्याधि-प्रलापाश्चत्रो दशाः काव्यप्रकाशनिष्ठाः। 'निद्राच्छेदादयस्तु षट् नयनप्रीतिरित्यत्र रति-

रहस्यस्था (१) दर्शिता इति ध्येयम्। तासां नानामहिषीगतत्वाद् यत् क्रमादुक्ताः। मृतिलक्षणात्वन्यास्मरदशास्ति (२) "सा च इतो-दृग्येन भावेन कृष्णे योगेश्वरेश्वरे। म्रियमाणेन माधव्यो लेभिरे वैष्णवीं गतिम्" ॥ (३) इत्यतेन मूलग्रन्थेन सूचिताऽप्यमङ्गलत्वादिह नोक्ताः। एकादशश्लोके जलकेलिप्रसङ्गे मूले दर्शिता (४)। तत्र च सन्निहितेऽपि भगवति तदालाप सौष्ठवेन तासां वैचित्त्याविर्भावा-स्यास्य भेदस्य पूर्व्वानुरागादिष्वन्तर्भावः शक्यो वक्तुम्। तथाच तत्रोक्तं "(५) कृष्णस्यैवंविहरतो गत्यालापेक्षितस्मितैः। नर्म्मच्छेलि परिष्वङ्गैः स्त्रीणां किल हृताधियः ॥ जगुर्मुकुन्दैकधियो गिर उन्मत्त-वज्जड़ं। चिन्तयन्त्योऽरविन्दाक्षं यास्तामेगदतः शृणु" इति। न चास्मिन्नध्याये भगवतो व्यवधानादिकमुक्तम्। तस्माद्वैचित्त्यरूपं विप्रलम्भस्य भेदान्तरमवश्यमभ्युपेतव्यम्। अयमेवात्र विदग्धवृद्धे-राचार्य्यस्याभिप्रायः।

इति हैमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां विप्रलम्भशृङ्गारो नाम द्वादशोध्यायः (१२)।

---

(१) कक्षीकृत प्रणीतरतिशास्त्रम्। तत्र वैष्णदत्तार्थे लिखितम्। तत्र रतिविषयेऽनेके विषयाः सन्ति।

(२) "चिन्ताव आगरोहे गौ तानवं मलिनाङ्गता, प्रलापो व्याधिरुन्मादो मोहोमृत्युर्दशादश" इत्यु ज्ज्वलनीलमणौ प्रवासाख्य विप्रलम्भे धृतोऽयं श्लोकः।

(३) श्रीमद्भागवतम् १० ९०।२५

(४) ,, १०।९०।११।

(५) ,, १०।९०।१२-१४

NATIONAL ARCHIVES OF INDIA

अथ त्रयोदशोऽध्यायः ।

विष्णुभक्तानां करुणरसः ।

तदाऽर्ज्जुनः—

यत् संश्रयाद् द्रुपदगेहमुपागतानाम्,
राज्ञां स्वयम्बरमुखेस्मरदुर्म्मदानाम् ।
तेजो हृतं खलु मया निहतश्च मत्स्यः ;
सज्जीकृतेन धनुषाधिगता च कृष्णा ॥१॥
यत् सन्निधावहमुखाण्डवमग्नयेऽदा-
मिन्द्रञ्च सामरगणं तरसा विजित्य ।
लब्धा सभा मयकृताद्भुतशिल्पमाया-
दिग्भ्यो हरन्नृपतयो बलिमध्वरे ते ॥२॥

एवमष्टभेदं शृङ्गारमुक्त्वा क्रमप्राप्तं करुणमाह । करुणेति । सचेष्टनाशानिष्टसम्प्रयोगविभावो दैवोपालम्भनिश्वास-तानवमुख-शोषणस्वरभेदाश्रुपात-वैवर्ण्य प्रलय-संस्तम्भ-कम्पभूलुण्ठनगात्र-स्रंसना (स्तम्भा) साक्रन्दनाद्यनुभावो निर्व्वेदग्लानिचित्तौत्सुक्य-मोहश्रम-त्रास-विषाद-दैन्य-व्याधि-जड़तोन्मादापस्मारालस्यमरणप्रभृतिदुःखस-मयदुःखमयव्यभिचारीति । तत्रेष्ट नाशविभावे करुणरसे अर्ज्जुनो-दाहरति भक्तौ । तत्र प्रथममर्ज्जुनमाह । तत्र द्रौपदीस्वयम्बरे । कृष्णोप-कारं स्मरत्यर्ज्जुनः । यत् संश्रयादिति । कृष्णा द्रौपदी ॥ १।१५। ७ (१)

खाण्डवदहने । राजसूये च कृष्णोपकारं स्मरति । यत् सन्नि-

पत्न्यास्त्वधिमखक्रमहाभिषेक-
श्लाघिष्ठ चारुकवरं कितवैः सभायाम् ।
स्मृष्टं विकीर्य्य पदयोः पतिताश्रुमुख्या-
यस्तत् स्त्रियो कृतहतेश विमुक्तकेशाः ॥३॥
योनो जुगोपवनमेत्यदुरन्तकृच्छ्राद्-
दुर्व्वाससोऽरिरचिताद्युताग्रभुग् यः ।
शाकान्नशिष्टमुपयुज्य यतस्त्रिलोकीम्,
तृप्तममंस्त सलिले विनिमग्न सङ्घः ॥४॥

धाविति । उ अहो युधिष्ठिरः अहं अदां दत्तवान् । मयेन कृता (१) शिल्पमाया यस्यां सभायाम् ॥ १।१५।८ (२)

पत्न्या इति । अधिमखम् राजसूयमधिकृत्य क्रमो रचितो यो महाभिषेकः तेन श्लिष्टं श्लाघ्यवत्तम् यत् चारुकवरं केशपाशः । कितवैर्दुःशासनादिभिः विकीर्य्योन्मुच्यस्पृष्टं पतिताश्रुमुखं यस्याः । तथा पतितं पादयोः । सापेक्षत्वेऽपि समासः । तदानीमेव स्मरणात् पुरस्थितस्य कृष्णस्य पदयोः । तत् स्त्रियः तेषां कितवानां स्त्रियः । अकृत कृतवान् । हतेरोप्रैर्हेतुभूतैर्व्विमुक्तकेशाः ॥ १।१५।१० (३)

दुर्व्वाससः शापे कृष्णोपकारं स्मरति । योनो जुगोपेति । वनवासस्तावत् कृच्छ्रं तत्रापि दुर्वासमा दुरन्तं कृच्छ्रं । सचारिणा दुर्य्योधनेन रचितः । वनवासस्थान् पाण्डवान् युधिष्ठिरद्रौपदीभोजनानन्तरं याचस्वेति प्रार्थितः यावद्द्रौपदी न भुङ्क्ते । तावदक्षयमन्नमितिहि सूर्य्येण वरो दत्तः । यो दुर्व्वासा अयुताग्रभुक्शिष्याणा-

---

(१) शिल्पशास्त्रप्रवेत्रा मयेन रचिता ।

यत्तेजसाऽथ भगवान् युधि शूलपाणि-
र्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे।
अन्येऽपिचाह ममुनैव कलेवरेण,
प्राप्तो महेन्द्रभवने महदासनार्द्धम् ॥पू॥
तत्रैवमे विहरतो भुजदण्डयुग्मम्,
गाण्डीवलक्ष्मणमरातिवधाय देवाः।
सेन्द्राःश्रिता यदनुभावितमाजमीढ़-
तेनाह मद्यमुषितः पुरुषेण भूम्ना ॥ई॥

मयुतस्याग्रे भुङ्क्ते। किं कृत्वा कृष्णो जुगोप। शाकान्नशिष्टमुपभुज्य तदानीमेव द्रौपदीस्मरणादागत्य शाकरूपस्यान्नस्य यत्शिष्टं पात्रे लग्नं तत् स्वयम्भुक्त्वा यतो भोजनाद् दुर्व्वासाः त्रिलोकीतृप्तामामंस्त। न केवलमात्मानं 'सशिष्यं तु सलिले स्नात्वा भोक्तुमागच्छते'ति युधिष्ठिरवचनाद् यत्र (दा) स्नातुं गतः तत्र कीदृशः विनिमग्नः शिष्यसहितः आत्मा यस्य स तथा॥ १।१५।११ (४)

दिव्यास्त्रलाभे कृष्णोपकारं स्मरति श्लोकद्वयेन। यत्तेजसेति। अन्येपि लोकपाला निजान्यस्त्राण्यदुः। अहञ्च महेन्द्रस्यासनार्द्धं प्राप्तः॥ १।१५।१२ (५)

तत्रेति। तत्रैव स्वर्गे। अरातयो निवातकवचनामानो दैत्याः। यदनुभावितं येन कृष्णेन प्रभाववत्कृतम्। भुजदण्डयुग्मं श्रिताः जग्मुः शरणं जग्मुः। हे आजमीढ! युधिष्ठिर। तेनेत्यादि सर्व्वं वाक्यशेषः। भुम्ना अपरिच्छिन्नेन वाप्यनिव्यञ्जकं विना न दृश्यत इति मुग्रितत्वम्। अस्मदादिदेहानां त्वनुमापकत्वम्। न तु कृष्णतद्देहव प्रत्यक्षत्वापादकत्वम्॥ १।१५।१३ (६)

NATIONAL ARCHIVES OF INDIA

यद्बान्धवःकुरुकुलाब्धिमनन्तपार-
मेकोरथेन ततरेह मतीर्य्य सत्त्वम् ।
प्रत्याहृतं पुरुधनञ्च मया परेषाम्,
तेजस्पदं मणिमयञ्च हृतं शिरोभ्यः ॥७॥
यो भीष्मकर्णगुरुशल्यचमूष्वदभ-
राजन्यवर्य्यरथमण्डलमण्डितासु ।
अग्रे चरो मम विभो रथयूथपाना-
मायूर्मनांसि च दृशा सह ओज आर्च्छत् ॥८॥
यद्दोषु मां प्रणिहितं गुरुभीष्मकर्ण-
द्रोणि (नप्तृ) त्रिगर्त्तशलसैन्धववाह्लीकाद्यैः ।
अस्त्राण्यमोघमहिमानि निरूपितानि,
नोपस्पृशुर्नृहरिदासमिवासुराणि ॥९॥

गोग्रहणे कृष्णोपकारं स्मरति। यद्बान्धव इति। यद्बान्धवः कृष्णसहायः। अनन्तगाभीर्य्यस्यावधिः पारो विस्तारस्य यस्य तम्। ततरे तीर्णवान्। अनार्य्यसत्त्वं हिंस्रगजादिकम्। पुरुबहुधनम्। परेराहृतं गोधनं (परेषां) च मणिमयं मुकुटादि धनञ्च हृतम्। तद्धि-तेजःपदं तद्धरणे तेजो हरणात्॥ १।१५।१४ (७)

कुरुक्षेत्र युद्धे कृष्णोपकारं स्मरति,यो भीष्मेति श्लोकत्रयेण। दृशा दर्शनेन। आर्च्छदाकृष्टवान्। आयुर्मनांसि सह ओजश्च सह। कर्मेन्द्रियाणां बलमोजः। बुद्धीन्द्रियाणां शक्तिः मनांसि त्रीण्यन्तःकरणानि॥ १।१५।१५ (८)

यदिति यस्य कृष्णस्य। दोःषु भुजेषु। प्रणिहितं मां नो अस्त्रा-

सौत्ये हृतःकुमतिनात्मद ईश्वरो मे,
यत् पादपद्ममभवाय भजन्ति भव्याः।
मां श्रान्तवाह मरयो रथिनो भुविष्ठम्,
नो प्राहरन् यदनुभावनिरस्त चित्ताः ॥१०॥
नर्म्माण्युदारुचिरस्मित शोभितानि,
हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति।
संजल्पितानि नरदेवहृदिस्पृशानि,
स्मर्त्तुर्लुठन्ति हृदयं मम माधवस्य ॥११॥
शय्यासनाटनविकत्थनभोजनादि-
ष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः।

ष्युपस्पृशः। निरूपितानि प्रेरितानि। अमोघमहिमा (तं) पूजनं (जितं) येषां तानि तथा। आसुराण्यस्त्राणि नृहरिदासं प्रह्लादं यथा न स्पृशन्ति स्म ॥ १।१५।१६ (९)

सौत्य इति। सौत्ये सारथित्वे मे मया कुमतिना हृतः। स ईश्वर आत्मानमीश्वरत्वं हृतो ददाति भजन्ति च भव्याः। अभवाय यस्य पादपद्मं यस्यानुभावेन निरस्तचित्ता उन्मनीकृता अरयो न प्राहरन्। स सूतः कृतः। आत्मानं निन्दति ॥ १।१५।१७ (१०)

कृष्णेन सहवासं स्मरति श्लोकद्वयेन। नर्म्माणीति। नर्म्माणि परिहासवचांसि। हे पार्थ इत्यादि सम्बोधनपूर्व्वकं संजल्पितानि उदारवचांसि मम हृदयं लुठन्ति शोकेन इतस्ततः पातयन्ति ॥ १।१५।१८ (११)

यस्येति। विकत्थनं कलाकौशलदर्शनम्। ऐक्यादविनाभावात्।

NATIONAL ARCHIVES OF INDIA

सख्युः सखेव पितृवत् तनयस्य सर्व्वम्,
सेहे महान्महितया कुमते रघं मे ॥१२॥

सोऽहं नृपेन्द्ररहितः पुरुषोत्तमेन,
सख्या प्रियेन सुहृदा हृदयेन शून्यः ।
अध्वन्युरुक्रमपरिग्रहमङ्गरक्षन्,
गोपैरसद्भिरबलेव विनिर्ज्जितोऽस्मि ॥१३॥

तद्वै धनुस्त इषवः सरथो हयास्ते,
सोऽहं रथीनृपतयो यत आनमन्ति ।
सर्व्वं क्षणेन त्वदभूदसदीशरिक्तम्
भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम् ॥१४॥

हे वयस्य! ऋतवांस्त्वं सत्ययुक्तस्त्वमिति लक्षणा मूलाऽत्यन्ततिरस्कृता। विवक्षितवाच्येन ध्वनिना विप्रलभ्य उपहसितः कृष्णः मे अघं अपराधं सेहे। महान् महितया महत्वातिशयेन हि महत्त्वम् ॥ १।१५।१८ (१२)

कृष्णवियोगफलं कथयति। सोऽहमिति हृदयेन। सख्यमुपकारेण। प्रियत्वं निरुपधि प्रेमास्पदत्वेन। सुहृत्त्वं प्रत्युपकारानपेक्षम्। उपकर्त्तृत्वेनोरुक्रमपरिग्रहं कृष्णवल्लभा वर्गाः ॥ १।१ -०(१३)

तदिति। यतो धनुरादेः असद् अप्रयोजकं। ईशेन रिक्तं हीनं यथा ऊष्यामूषरभूम्यामुप्तम्। कुहकेन कपटेन राद्धं प्राप्तम् (पक्वं) तदेव भस्मनिहुतं। एतदुक्तं यथात्यन्तं अप्रयोजकमिदमित्यर्थः। अर्जुनो युधिष्ठिरम् ॥ १।१५।२१ (१४)

NATIONAL ARCHIVES OF INDIA

उद्धवः।

यन्मर्त्यलीलौपयिकं स्व योग-
मायाबलं दर्शयता गृहीतम्।
विस्मापनं स्वस्य च सौभगर्द्धेः,
परं पदं भूषणभूषणाङ्गम् ॥१५॥
यद्धर्ममुनोर्व्वत राजसूये,
निरीक्ष्य दृक् स्वस्त्ययनं नृलोकः।
कार्त्स्न्येन चाद्येह गतं विधातु-
रर्वाक्सृतौ कौशलमित्यमन्यत ॥१६॥
यस्यानुरागप्लुतहासरास-
लीलावलोक प्रतिलब्धमानाः।

उद्धवः कृष्णस्य(स्व)रूपं स्मरति। यन्मर्त्येति। यस्य मर्त्यानां या लीला तस्यामौपयिकं योग्यं तच्च स्वयोगमायाबलम्। लोकः पश्यत्विति गृहीतम्। मणिमन्त्रौषधीर्विना समाधिनैव याविर्भवति सा योगमाया। न केवलमन्यस्य स्वस्य च। विस्मापनं कथमिदमाविर्भूतमिति। यतः सौभाग्यं सम्पत्तेः परं स्थानम्। भूषणानामपि भूषणान्यङ्गानि यस्य स तथा ॥ ३।२।१२ (१५)

यदिति। यद्रूपं राजसूये निरीक्ष्य नृलोकोऽमन्यत। अद्य अर्घ्यदानावसरे। इह कृष्णरूपे यत् कार्त्स्न्यं तद्गुणसम्पूर्णत्वम्। तेन गतं ज्ञानं मया विधातुः कौशलमर्व्वाक् सृतौ कर्म्ममार्गे तत्कर्म्मभोगायतननिर्म्माणे। न ज्ञानमार्गेण। सालोक्यादिभोगायतननिर्म्माणेनेति ॥ ३।२।१२ (१६)

NATIONAL ARCHIVES OF INDIA

व्रजस्त्रियो दृग्भिरनुप्रवृत्ता-
धियोऽवतस्थुः किलकृत्यशेषाः ॥१७॥
स्वशान्तरूपेष्वितरैःस्वरूपै-
रभ्यर्द्यमानेष्वनुकम्पितात्मा ।
परावरेशो महदंशयुक्तो-
ह्यजोऽपि जातो भगवान् यथाग्निः ॥१८॥
मां खेदयत्येतदजस्य जन्म-
विडम्बनं यद्वसुदेवगेहे ।

यस्येति । यस्य कृष्णस्य । अनुरागप्लुतेन हासादिना प्रविलब्धो-मानोयाभिस्तास्तथा । प्रतिशब्देन ताभिरपि तथा हास्याद्याचरित-मिति गम्यते न दृग्भिः सर्व्वत्र कृष्णदर्शनैः अनुप्रवृत्ता सर्वं परित्यज्य कृष्णमेवानुगता धीर्यासां तास्तथा । ताः कृति (तौ) कर्त्तव्ये । अशेषाः शेषरहिताः । अवतस्थुः कृतकृत्यावभूवुरित्यर्थः ॥ ३।२। १४ (१७)

स्वेति । यः कृष्णोऽजोऽपि जन्मायोग्योऽपि । परावरेशोऽपि जन्मना विना कार्य्यं कर्त्तुं समर्थोऽपि जातः महतो महत्तत्त्वस्यांशेन विशुद्धोज्झितसत्त्वेन मुक्तः । उपाधिना विना जन्मासम्भवात् । यथा अग्निर्महाभूतत्वेन सर्वत्र सन्नपि दाहसम्बन्धा त्तज् जायते । यद्यपि शान्तान्यशान्तानि च तस्य स्वरूपाणि । तथापि शान्तानामनुकम्पया जातः ॥ ३।२।१५ (१८)

मामिति । एतत्त्रयं विडम्बनं अनुचिताचरणं मां खेदयति । किन्तद्वसुदेवगेहे तज्जन्म यश्च व्रजे वासः । यश्च पुराद्यावात्सीत् ।

ब्रजे च वासोऽरिभयादिव स्वयम्,
पुराद् व्यवात्सीद्यदनन्तवीर्य्यः ॥१९॥
दुनोति चेतः स्मरतो ममैतत्,
यदाह पादावभिवन्द्य पित्रोः ।
तातोऽम्बकंसादुरुशङ्कितानाम्,
प्रसीद तन्नोऽकृतनिष्कृतीनाम् ॥२०॥
को वा ऽमुष्याङ्घ्रिसरोजरेणुम्,
विस्मर्त्तुमीशीत पुमान् विजिघ्रन् ।
यो विस्फुरद्भ्रूविटपेन भूमे-
र्भारं कृतान्तेन तिरस्कारः ॥२१॥
दृष्टा भवद्भिर्ननुराजसूये,
चैद्यस्य कृष्ण द्विषतोऽपि सिद्धिः ।

मथुरातो द्वारकामगात् । विष्वपरिभयादिवेति लोकोक्त्या चातः । न चानन्तवीर्य्यस्यारिभयम् । नृसिंहवदरिवधः । कार्य्य इति मे मतिरित्यर्थः ॥ ३।२।१६ (१९)

दुनोतीति । एतच्च मम चेतो दुनोति । यद्यसुदेवं प्रति तातेत्याह । देवकीं प्रति अम्बेति । यच्च पादवन्दनं यच्च प्रसीदतां युवामस्माकमिति वचनं यतो वयं कंसादत्यन्तभीताः । अकृतनिष्कृताः । अनिष्पादितपुत्रकार्य्याः । युवयोर्बन्धमोक्षाकरणात् ॥ ३।२।१७ (२०)

कोवेति । ईशीत शक्नुयात् । विजिघ्रन् गन्धवासितेन्द्रियः सन् विस्फुरन् भ्रूर्विटपो यस्मिन् कृतान्ते स तथा । भ्रूभङ्गेन प्रेरित इत्यर्थः ॥ ३।२।१८ (२१)

NATIONAL ARCHIVES OF INDIA

यां योगिनः स्वं स्पृहयन्ति सम्यक्,
योगेन कस्तद्विरहं सहेत ॥२२॥
तथैव चान्ये नरलोकवीरा-
य आहवे कृष्णमुखारविन्दम् ।
नेत्रैः पिबन्तोः नयनाभिरामम्,
पार्थास्त्वपूताः पदमापुरस्य ॥२३॥
तत्तस्य कैङ्कर्य्यमलम्भृतान्नो-
विज्ञापयत्यङ्ग यदुग्रसेनम् ।
तिष्ठन् निषद्यां परमेष्ठिधिष्ण्ये
न्यबोधयद्देव निधारयेति ॥२४॥
स्वयंत्वसाम्यातिशय स्वराधीशः,
स्वाराज्यलक्ष्म्याप्त समस्तकामः ।

दृष्टेति । भवद्भिर्विदुरादिभिः । आहवे कुरुक्षेत्रे संग्रामे ॥ ३।२। १९ (२२)

तथेति । पार्थोऽर्जुनः । अस्य विष्णोः तथैवेति स्पष्टम् ॥ ३।२। २० (२३)

तदिति । कैङ्कर्य्यं नोऽस्मान् भृत्यान् अजमत्यर्थं विज्ञापयति । यत् परमेष्ठिधिष्ण्ये राजासने निषद्यमासीनमुग्रसेनं तिष्ठन्नसौनोन्यबोधयत् । विज्ञप्तवान् । हे देव ! निधारय अवधारयेति ॥ ३।२।२२ (२४)

यतस्तेन सहातिशयः साम्यं वा कस्यापि नास्तीति स्वयमिति ।

NATIONAL ARCHIVES OF INDIA

बलिं हरद्भिश्चिरलोकपालैः,
किरीटकोटीड़ित पादपीठः ॥२५॥
अहो वकी यं स्तनकालकूटम्,
जिघांसयाऽपाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितां ततोऽन्यम्,
कं वा दयालुं शरणं व्रजेम ॥२६॥
मन्येऽसुरान् भागवतां स्त्र्यधीशे,
संरम्भमार्गाभिनिविष्टचित्तान् ।
ये संयुगेऽचक्षत तार्क्ष्यपुत्र-
मंसे सुनाभायुधमापतन्तम् ॥२७॥

सुनीतिः ।

नान्यं ततः पद्मपलाशलोचना-
द्दुःखच्छिदं ते मृगयामि कञ्चन ।

त्रयाणां पुरुषाणां अधीशः स्वाराज्य लक्ष्मया मायया ऽनभिभूतत्वेन चिरलोकाश्चिरकालावस्थायिनो ब्रह्मलोकादयः ॥ ३।२।२१ (२५)

अहो इति । वकी पूतना यं कृष्णम् । एवमसाध्वपि धात्र्युचितां गतिं लेभे । धात्री यशोदा । माता हि देवकी । अपकारेऽप्युपकारो दयालुत्वम् ॥ ३।२।२३ (२६)

मन्य इति । असुरान् भागवतान् मन्ये । संरम्भो बुद्धया हन्तुमुद्यमः । अचक्षत अपश्यत् । तार्क्ष्यपुत्रं गरुडम् । कीटशमंसे स्कन्धेसु वा आयुधश्चक्रायुधो यस्य स तथा । षष्ठीस्थानेयोगेति ज्ञापकादसंज्ञायामप्यलुक । उद्धवः विदुरम् ॥ ३।२।२४ (२७)

NATIONAL ARCHIVES OF INDIA

यो मृग्यतेऽस्तगृहोतपद्मया,
श्रियेतरैरङ्ग ! विमृग्यमाणया ॥२८॥

प्रह्लादः ।

मतिर्न कृष्णे परतः स्वतो वा,
मिथोऽभिपद्येत गृहव्रतानाम् ।
अदान्त गोभिर्विशतान्तमिस्रम्,
पुनः पुनश्चर्वितचर्वणानाम् ॥२९॥
न ते विदुः स्वार्थगतिं हि विष्णुम्,
दुराशया ये बहिरर्थमानिनः ।

अथानिष्टसंप्रयोगविभावं शोकमाह । नान्यमिति । तस्याहि सपत्नीपुत्रनिर्भर्त्सनेन शोक उद्भूतः । ते ध्रुवस्य । इतरैर्ब्रह्मादिभिः । अत्र भगवदन्यस्य दुःखच्छेत्तुरभाव उद्दीपकः । सुनीतिः ध्रुवम् ॥ ४।८।२३ (२८)

मतिरिति । परतो गुर्वादिभ्यः स्वत आत्मनो मिथः परस्परम् विचारादभिपद्येतोपपद्येत । गृहमेव व्रतं येषां ते तथा । गृहासक्त इत्यर्थः (अन्धकाररूपत्वादविषयस्य तद्भिन्नत्वम्) । अदान्तैर्गोभिरजितेन्द्रियैः गोवत् सर्वत्र चरणशीलत्वाद् गाव इन्द्रियाणि । तमिस्रविषयं तादर्थ्यात्ताच्छील्यम् । चर्वितस्य तु भुक्तस्य चर्वणं पुनर्भोजनम् येषां ते तथा । अत्र हि प्रह्लादस्य विषयेषु क्लिश्यतः प्राणिनः समीक्ष्य मृदुमनस्कतया शोक उत्पन्नः स्थायी । स चर्वित चर्वणादिभिर्विभावैर्वर्द्धितः । एवं वक्ष्यमाणेषु रुद्रादिषु ॥ ७।५।३० (२९)

नेति । स्वार्थस्य भुक्तिमुक्तिरूपस्य गतिः प्राप्तिर्यस्मादिष्णोः । बहिर्विष्णोरन्योऽर्थः प्रयोजनं येषां ते बहिरर्थाः । तान्मानयन्ति गुरुत्वे

अन्धा यथान्धैरुपनीयमानाः,
तेऽपीशतन्त्र्यामुरुधाम्नि बद्धाः ॥३०॥
नैषां मतिस्तावदुरुक्रमाङ्घ्रिम्,
स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोभिषेकम्,
निष्किञ्चनानां न वृणीत यावत् ॥३१॥
जह्यासुरं भावमिमं त्वमात्मनः,
समं मनोधत्स्व न सन्ति विद्विषः ।
ऋतेऽजिताद्आत्मन उत्पथे स्थितात्,
तद्धि ह्यनन्तस्य महत्समर्हणम् ॥३२॥

नेति । ते तथा । गुरुसहिता अपि न विदुरित्यर्थः । अत्रदृष्टान्तः अन्धा इत्यादि । वाचि ईश्वरस्य वेदरूपायाम् । दामन्यामुरुणि नामान्येव दामानि यस्यां स तथा "तस्य वाक्तंतिर्नामानि दामातीति" श्रुतेः ॥ ७।५।३१ (३०)

नैषामिति । एषाविषयानुसारिणी त्यसंसारस्या (नर्थस्य संसारस्या)पगमो निर्हृति (वृत्ति) र्यस्य विष्णुचरणस्पर्शस्यार्थः फलम् । प्रह्लादः पितरम् ॥ ७।५।३२ (३१)

जहीति । हे हिरण्यकशिपो ! समं मित्रामित्र विकल्पहीनम् । धत्स्व धारय । यतो ऽजिताद् अनिगृहीतात् । आत्मनो मनसः । ऋते तव । विद्विषो न सन्ति । अजितत्वादुत्पथे उन्मार्गे स्थितत्वात् तत् समत्वधारणम् । अर्हणमाराधनम् ॥ ७।८।८ (३२)

NATIONAL ARCHIVES OF INDIA

दस्यून् पुरा षण्विजित्यलुम्पतो-
मन्यन्त एकेस्वजितादृशो दृश ।
जितात्मनोऽज्ञस्य समस्य देहिनाम्,
साधोः स्वमोहप्रभवाः कुतःपरे ॥३३॥
शोचे ततो विमुखचेतस इन्द्रियार्थ-
मायासुखाय भरमुद्वहतो विमूढान् ।
प्रायेण देवमुनयः सुविविक्तकामाः,
मौनं चरन्ति विजने न परार्थनिष्ठाः ॥३४॥
नैवोद्विजे पर दुरत्यय वैतरण्या-
स्त्वद्वीर्य गायन महाऽमृतमग्नचित्ताः ।

अजितात्मतामेवाह । दस्यूनिति । दस्यून् शत्रून् । षट् काम क्रोध लोभ-मोह-दम्भ-ईर्षाख्यान् । लुम्पतः स्वसीमानमुल्लङ्घ्य विषय-भूच्छानान् । एके त्वादृशः । देहिनां देहाभिमानिनाम् । स्वमोह-प्रभवाः स्वरूपाज्ञानजाः । परे शत्रवः । ज्ञस्य देहाभिमानरहितस्य । कुतो भवेयुः । जितात्मत्वादिन्द्रियजयः । समत्वादात्मनो जयः । साधुत्वात्तन्निर्वाहः । प्रह्लादः पितरम् ॥ ७।८।१० (३३)

शोच इति । हे देव नृसिंह साऽहं शोचे ततस्त्वत्कथायाः इन्द्रिया-र्थमाया सुखाय विषयजनित सुखप्रतिरूपाय । भरं गृहधुरम् । तान् मुनय उद्धरिष्यन्तीति चेत् तत्राह । प्रायेणेति । अत्र शोच इति शोकस्य स्थायिनः कथनम् ॥ ७।८।४३ (३४)

नैवेति । एतान् विमुखचेतसः कृपणान् शोच्यान् न विमुमुचे न

NATIONAL ARCHIVES OF INDIA

नैतान् विहाय कृपणान् विमुमुक्ष एको-
नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥३५॥
यन्मैथुनादिगृहमेधि सुखं हि तुच्छम्,
कण्डूयनेन करयोरिव दुःखदुःखम्।
हृष्यन्ति नेह कृपणा बहुदुःखभाजः,
कण्डूतिवन् मनसिजं विषहेत धीरः ॥३६॥
मौनव्रतश्रुततपोऽध्ययनस्वधर्म्म-
व्याख्यारहो जपसमाधय आपवर्ग्याः।
प्रायः परं पुरुष ते ह्यजितेन्द्रियाणां
वार्त्ता भवन्त्युत नवात्म तु दाम्भिकानाम् ॥३७॥

विमोक्तुमिच्छामि। अस्य जगतः विरक्तो भूत्वा पतिष्यत इति चेत्तत्राह ॥ ७।८।४४ (३५)

यदिति। यदयस्मादिह मैथुनादौ गृहमेधिनि गृहसम्बन्धिनि गृहसंसर्गिणि। मेधतेः संसर्गार्थत्वात् तुच्छे सुखे कृपणा न हृष्यन्ति न विरज्यन्ते। दुःखाद्दुःखं अत्यन्तदुःखरूपमित्यर्थः। अत्र दृष्टान्तमात्र। कण्डूयनेनेति। करयोः कण्डूयनेन यत् सुखं तदापातमात्र रम्यत्वेऽपि परिणतिविरसत्वाद् यथा दुःखं तथेत्यर्थः। ननु कुतः पुनरेषां कृपणत्वं तत्राह। कुण्डूयतीति। धीरोहि मनसिजं कामं विषहेत। न चैते विषहन्ते। तस्मात्तथेत्यर्थः ॥ ७।८।४५ (३६)

नन्वतिरिक्तानामप्येषां साधनानुष्ठानान्मोक्षो भविष्यतीति चेत्तत्राह। मौनेति। हे पुरुषनृसिंह! ते मौनादयोऽपवर्गाः। अपवर्ग प्रयोजनभूता अपि परं केवलं दाम्भिकानां वार्त्ता जीवनोपाया

NATIONAL ARCHIVES OF INDIA

तत्तेऽर्हत्तम नमः स्तुतिकर्म्मपूजा
कर्म्मस्मृतिश्चरणयोः श्रवणं कथायाम्।
सं सेवया त्वयि विनेति षड़ङ्गया किं
भक्तिं जनः परमहंसगतौ लभेत ॥३८॥

रुद्रः।

देवदत्तमिदं लब्ध्वा नृलोकमजितेन्द्रियः।
यो नाद्रियेत त्वत्पादौ सशोच्योह्यात्मवञ्चकः ॥३९॥
देवदेव जगन्नाथ गोविन्द पुरुषोत्तम।
नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय! ॥४०॥
यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम्।
विपर्य्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥४१॥

भवन्ति, न तु अपवर्गाय। व्रतं एकादश्युपवासादि। श्रुतं शास्त्रम्। तपः कृच्छ्रादि। स्वधर्मो नित्यनैमित्तिकानुष्ठानम्। व्याख्यातदर्थविचारः। रहः एकान्तशीलनम् ॥ ७।८।४६ (३७)

मङ्गल्याभवित्थन्नीति चेत्तत्राह। तत्त इति। हे अर्हत्तमऋषिसिंह! ते त्वत्सम्बन्धिनम् नमो नमनम्। स्तुतिकर्म्मस्तुतिकरणम्। कर्म्मगृहमार्ज्जनादि। इति एवम्। षड़ङ्गया सेवया विना प्रह्लादः ऋषिसिंहम् ॥ ७।८।५० (३८)

देवदत्तेति लोके मनुष्यदेहं देवदत्तं लब्ध्वा नात्मयत्नेन (नाद्रियेत) अजितेन्द्रियत्वात् अनादरः ॥ १०।६३।४१ (३९)

देवदेवेत्यादि सम्बोधनानि ॥ १०।६४।२७ (४०)

यस्त्वामिति। अयमयुक्तलोकचेष्टित-दर्शनादाक्रोशेन कृपातिशयं

चमसः।

य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम्।
न भजन्त्यवजानन्ति स्थानभ्रष्टाः पतन्त्यधः ॥४२॥
दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्त्तनाः।
स्त्रियः शूद्रादयश्चैव तेऽनुकम्प्या भवादृशाम् ॥४३॥
विप्रो राजन्यवैश्यौ वा हरेः प्राप्ताः पदान्तिकम्।
श्रौतेन जन्मनाऽथापि मुह्यन्त्यामम्नाय वादिनः ॥४४॥
सर्वेषु शश्वत्तनुभृत्स्ववस्थितं
यथा खमात्मानमभीष्टमीश्वरम्।
वेदोपगीतं च न शृण्वतेऽबुधा
मनोरथानां प्रवदन्ति वार्त्तया ॥४५॥

ध्वनयन्ति। ये सुखबुद्ध्या गृहीता दुःखस्वरूपा भवन्ति ते विपर्य्यया इन्द्रियार्था विषयाः। हे देवदेव! यस्त्वदर्थं त्वां विसृज्यते सोऽमृतं परित्यज्य विषमत्ति॥ रुद्रः श्रीक्षणम्॥ १०।६३।४२ (४१)

य इति। एषां ब्राह्मणादीनां मध्ये पुरुषं विष्णुं। आत्मनः प्रभवं जनकम्। स्थानाद् ब्राह्मणादेः॥ ११।५।३ (४२)

दूरे हरित्यादिस्लुक्। भवादृशां निमिप्रभृतीनाम्॥ ११।५।४ (४३

श्रौतंजन्मउपनयनम्॥ ११।५।५ (४४)

मुह्यन्तीत्युक्तं तमेवाह सर्वेष्विति। न शृण्वते च। शृण्वन्त्यपि नेत्यर्थः। अभीष्टमिति। तस्य पुरुषार्थरूपत्वमुक्तम्। सर्वेष्विति। सोऽयम्। यथेत्यर्थमिति उपाधिदोषैरदूषितत्वम्। ईश्वरमिति

लोके व्यवायामिषमद्यसेवा
नित्यास्तु जन्तोर्नहि तत्र चोदना।
व्यवस्थितिस्तेषु विवाहयज्ञ
सुराग्रहैरासु निवृत्तिरिष्टा ॥४५॥

निग्रहसामर्थ्ये (निग्रहः सामर्थ्यम्)। वेदेति प्रमाणसिद्धत्वम्। तत् किं शुभव्यापारानन्तरवैयग्र्यात्। एवंविधस्याप्यश्रवणम्। नेत्याह। मनोरथानामिति कर्मण्यि षष्ठी। कामिनां तदपि शोभेत यदि सम्पादयितुं शक्नुयुः। न तु तथेत्याह वार्त्तयेति। तत्किमोखरेनिरूढं दूषणमस्ति नेत्याह अबुधा इति ॥ ११।५।१० (४५)

एवं मोहमाहात्म्यात् स्त्रीसेवादयोऽपि "(१) ऋतौ भार्यामुपेयात्" इत्यादौ वेदेनैव विहिता इत्यपि मन्यमानान् बोधयितु माह। लोक इत्यादि। व्यवायो मैथुनम् आमिषं मांसम्। मद्यं प्रसिद्धम्। एषां सेवा नित्यारागतः प्राप्ता हि स्फुटम्। तत्र तासु सेवासु। चोदना वैदिकी प्रवर्त्तना (प्रेरणा) नास्ति। "अप्राप्ते शास्त्रमर्थवदिति" न्यायात्। नन्वेवं "ऋतौ भार्यामुपेया"दित्यादेः कोऽर्थ इति चेत्तत्राह। व्यवस्थितिर्नियम इष्टो वेदस्य। तथाहि यदि व्यवायः कार्य्यः (कर्त्तव्यः) तर्हि विवाहेनैव। यथामिषं भक्षणं तर्हि यज्ञेनैव। यदिमद्यं सेव्यं तर्हि "सुराग्रहेणैव। न तु निर्व्यवस्थित्या एव तत्राह (नेत्याह) आखिति। आशु शोघ्रम्। निवृत्तिर्यया व्यवस्थित्या सा तथा। अयमर्थः। वेदो हि व्यवायादीना मनर्थानुवन्धितां प्रावेद्य सर्वथा ततो निवृत्तिमिच्छन् स्वरसवाहिनो मनियतां तत्प्रवृत्तिं विवाहादिच्छलेन निरुणद्धि॥ किञ्च सकामाः

---

(१) आत्मसोपनिषत्।

धनञ्च धर्मैकफलं यतो मे
ज्ञानं स विज्ञानमनुप्रशान्तिः।
गृहेषु युञ्जन्ति कलेवरस्य
मृत्युं न पश्यन्ति दूरन्तवीर्य्यम् ॥४७॥
यद्घ्राणभक्षे विहितः सुराया
स्तथा पशोरालभनं न हिंसा।
एवं व्यवायः प्रजया नरत्वे
दूमं विशुद्धं न विदुः स्वधर्म्मम् ॥४८॥

पुरुषाः रागोद्रेकात् काम्यानपित्यक्त्वा दृष्टोपभोगार्थमेव प्रवर्त्तन्त इत्याह ॥ ११।५।११ (४६)

धनञ्चेति। धर्म्म एकं केवलं फलम् यस्य स तथा। यतो धर्मात् सम्यगनुष्ठिताज् ज्ञानं शास्त्रे विवेचनाशक्तिर्विज्ञानं विविज्ञार्थं धारणाशक्तिः। अनुपश्चात् प्रशान्तिः। सकलक्लेशकर्म्मक्षयात् कैवल्यावाप्तिः। एवं विधं परम्परया मोक्षफलम् धनं गृहेषु स्त्र्यादिषु युञ्जन्ति व्यर्थयन्ति। ननु दृष्टसुखत्यागेनादृष्ट सुखार्थितैव कुबुद्धिरिति चेत् तत्राह। कलेवरस्येति। स एष यज्ञादिष्वाजेन मांसादिग्रहः सांख्यविद्भिः (सांख्यज्ञैः) श्रवलो धर्म्म इत्याख्यायते ॥ ११।५। १२ (४७)

यदिति। शुद्धं मत्वा यद्घ्राणेति। घ्राणेन नासिकासञ्चारिणा वायुनैव स्वादयन् विहितं न तु पानम्। तथाच (१) आश्वलायन-

---

(१) आश्वलायन कल्पसूत्रस्य तृतीयोऽध्यायो दृश्यः

NATIONAL ARCHIVES OF INDIA

द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम् ।
मृतके स्वानुबन्धेऽस्मिन् बद्धस्नेहाः पतन्त्यधः ॥४९॥

महर्षिणा स्वसूत्रे तृतीयेऽध्याये "प्रा(घ्रा)णभक्षोऽत्रे"त्युक्तम् । तथापशोरग्निषोमीयादेरालम्भनं हिंसा न भवति । किन्तु नालभेत वत्समालभेति वदालभतेः स्पर्शार्थः । न चैवमवदानादिवचनविरोधः । पिष्टपशौ यज्ञे सर्वकल्पनायां सुकरत्वात् । अतएव महाभारते मोक्षधर्मेषु वेदविवादे ऋषिभिरुक्तम् । "अजैर्यज्ञेषु षष्टव्यमिति वैवदिकी श्रुतिः । अजसंज्ञानि बीजानि छागं न मन्तुमर्हत ॥ नेषधर्मः सतां देवो यत्रवै विद्यते पशुः । अतोऽन्यथा श्रुवाणश्च पशुसंज्ञ एव राजा तैरेव सप्तः (प्राप्तः)। अत्रापि च "प्रेत्यखादन्ति ते च तान्" इत्यादिना भूयसा तत्र तत्र सा निषिद्धा । तच्चायमर्थः । सकामेषु क्रतुषु सर्वसाद्गुण्य सव्यपेक्षत्वात् यथाश्रुतएवार्थो ग्राह्यः । भगवत्प्रीत्यर्थेषुचादर्शितरीत्या तत्र वैगुण्येऽपि दोषाभावात् । यथोक्तम् "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यत" (१) इति । प्रजया हेतुभूतयारतिस्त्वानुषङ्गिकीतिविशुद्धं हिंसादिकलङ्करहितत्वात् ॥ किञ्च "(२) पशुना यजेत" आत्मघातः स्वामिघातश्च स्यात् इत्याह ॥ ११।५।१३ (४८)

द्विषन्त इति । मृतकं देहः । अनुबन्धः पुत्रादिः । गृहादिचतुर्णामोहा । चमसः निमिम् ॥ ११।५।१५ (४९)

पशूनां मध्यमेऽहनि । आश्रुतिः । अश्वमेधस्य वचनादूनानि पशुभि स्त्रिभिः ॥" गौडपादीय भाष्यम् । सांख्यकारिका १।४ ।

(१) श्रीमद्भगवद्गीता २।४० श्लोकः ।

(२) [illegible]

हित्वात्यायासरचिताः गृहापत्यसुहृच्छ्रियः।
तमोविशन्त्यनिच्छन्तो वासुदेव पराङ्मुखाः ॥५०॥

नृदेहमाद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारम्।
मयानुकूलेन नभस्वतेरितं
पुमान् भवाब्धिं न तरेत्स आत्महा ॥५१॥

अदितिः।

यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद
तीर्थश्रवः श्रवणमङ्गलनामधेयः।

हित्वेति ॥ ११।५।१८ (५०) स्पष्टं

नृदेहमित्यादि। अत्र प्रार्थ्ये (प्ये) अध्याहारः। आद्यं नानायोनि-प्रापक-कर्मोपार्ज्जकत्वात्। सुलभं अनादौ संसारे बहुशः प्राप्यमानत्वात्। दुर्लभत्वस्थिरत्वात्। तस्येच्छया वा अप्राप्तत्वात्। प्लवमुडुपम्। सुकल्पं सुदृढम्। अस्य च वृत्तस्यात्र पाठे प्रयोजनं चिन्त्यम्। इदं हि भगवतो वाक्यं तस्य भजनीयत्वेन भक्तत्वाभावात्। भक्तिरसानुभवाद्धि भक्ताः। यथा गोप्यादयः। भक्तिरसश्च विष्णोस्तद्भक्तानां वा चरित श्रवणादिना जातस्वमत्कार इति प्रागुक्तम्। न चात्र भगवानेव भक्तिरसस्यानुभविता तस्माच्चिन्त्यः पाठः ॥ ११।२०।१७ (५१)

यज्ञेजति—तीर्थंगङ्गा पादेऽस्येति तीर्थपादः। श्रवः कीर्त्तिः। आपन्नानां शरणागतानां लोकानां यद् वृजिनं दुःखम्। तस्योपश-

NATIONAL ARCHIVES OF INDIA

आपन्नलोकव्रजिनोपशमोदयाद्य
शं न क्रुधीश भगवन्नसि दीननाथः ॥५२॥

नारदः ।

स्वपादमूले पतितं त्वमर्भकं
विलोक्यदेव कृपया परिप्लुतः ।
उत्थाप्य तत् शीर्ष्ण्यदधात् कराम्बुजं
कालाहि वित्रस्तधियां कृताभयं ॥५३॥
स तत्करस्पर्शधुताखिलाशुभः
स्वपद्यभिव्यक्त परात्मदर्शनः ।

माय उदयः अवतारोऽस्येति । शं सुखम् । क्रुधि कुरुत । पुत्रसहितानां यतस्त्वं दीननाथोऽसि । अत्र क्लिश्यत पुत्रान् दृष्ट्वाऽदितेरुत्पन्नशोकः स्थायी । अदितिः भगवन्तम् ॥ ८।१७।८ (५२)

स्वेति । तं प्रह्लादम् । देवो नृसिंहः । अत्र प्रह्लादविषये कृपात्मकस्य भगवच्चरणानुभवाच्चारदस्य भक्तत्वम् । एवं करुणानुविद्ध भक्तिरसं भावयन्तं पुरुषस्याप्तकामता लक्षणं फलं भवति इत्यभिप्रेत्याह ॥ ७।८।५ (५३)

स इति । स प्रह्लादः । तस्य नृसंहस्य । करस्पर्शेन धूतमपनीतम् अखिलं ससंस्कारं अशुभं माया पटलम् यस्य स तथा । सपदि तस्मिन्नेव क्षणे । अभिव्यक्तमाविर्भूतम् । परस्य अगनातीतस्य । अपेतब्रह्मक्षत्रादिभावस्य । आत्मनः क्षेत्रज्ञस्य । दर्शनं साक्षात्कारो यस्य स तथा । तस्य नृसिंहस्य पादपद्मम् ।

NATIONAL ARCHIVES OF INDIA

तत् पादपद्मं हृदिनिर्वृतो दधौ,
हृष्यत्तनुक्लिन्न हृदस्तु लोचनः ॥५४॥

इति श्रीवोपदेवविरचिते मुक्ताफले विष्णुभक्तानां
करुणरसो नाम
त्रयोदशोऽध्यायः ॥ १३ ॥

निर्वृतः क्विबसंशयत्वात्। निर्वृतत्वेन हृष्यत्तनुत्वादयः त्रयः सात्त्विकानुभावाः। क्लिन्नमार्द्रभक्तिरसेन हृदयं यस्य स तथा। अश्रूणि लोचने यस्य तादात्म्यनिर्देशः आनन्दाश्रूणां प्रभूतत्वं क्षणमतिशयं द्योतयितुं व्यधिकरणबहुव्रीहिर्वा ॥ ७।८।६ (५४)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां करुणरसो
नाम त्रयोदशोऽध्यायः ॥१३॥

NATIONAL ARCHIVES OF INDIA

चतुर्दशोऽध्यायः ।

विष्णुभक्तानां रौद्ररसः ।

रौद्ररसे हिरण्यकशिपुः ।

व्यक्तं त्वं मर्त्तुकामोऽसि योऽतिमात्रं विकत्थसे ।
मुमुर्षूणां हिमन्दात्मन् ननु स्युर्विक्लवा गिरः ॥१॥
यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि स सर्व्वत्र कस्मात् स्तम्भे न दृश्यते ॥२॥
सोऽहं विकत्थमानस्य शिरःकायाद्धरामिते ।
गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम् ॥३॥

अथ मात्सर्य्यदारापहारदेशजात्यभिजन-विद्याकर्म्मनिन्दा असत्य-वचनस्वमृत्याधिक्षेपोपहासवाक्पारुष्यद्रोहादिविभावं नयनराग-भ्रूकुटीकरणदन्तौष्ठपीड़न-गण्डस्फुरण-हस्ताग्रनिष्पेषतारणप्रहरणाह-रणशस्त्रसम्पातरुधिरापकर्षणच्छेदनाद्यनुभावं शैघ्र्यमेवोत्साह विबोधा-मर्षचापलादिव्यभिचारिणं क्रोधस्थायिनं रौद्ररसमाह । रौद्रेति । तत्रापि हिरण्यकशिपौ शिशुपाले च मात्सर्य्यविभावः क्रोध इति दर्शयन् परितुष्टत्वाद्धिरण्यकशिपुगतं प्रथमं प्रस्तौति । व्यक्तमिति । व्यक्तं निश्चितं अतिमात्रं अतिशयिनम् (तम्) ॥ ७।८।११ (१)

य इति स्पष्टं ॥ ७।८।१२ (२)

NATIONAL ARCHIVES OF INDIA

एवन्दुरुक्तैर्मुहुरर्दयन्रुषा,
सुतं महाभागवतं महासुरः।
खड्गं प्रगृह्योत्पतितो वरासनात्,
स्तम्भं ततारातिबलः स्वमुष्टिना ॥४॥
सविक्रमन् पुत्रबधेप्सु रोजसा,
निशम्य निर्ह्रादमपूर्वमद्भुतम्।
अन्तः सभायां नददर्श तत्पदम्,
वितत्रसुर्येन सुरारि यूथपाः ॥५॥
सत्यं विधातुं निजभृत्यभाषितम्,
व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः।
अदृश्यतात्यद्भुतरूपमुद्वहन्,
स्तम्भे सभायां न मृगं न मानुषम् ॥६॥

सोऽहमिति—त्वा त्वाम्। गोपायेत रक्षतु। शरणं रक्षिता ॥ ७।८।१२ (३)

एवमिति। दुरुक्तैर्दुर्व्वाक्यैर्मुहुर्दुर्व्वारंवारम्। वरासनं सिंहासनम्। अत्र ऋषेति स्थायिन उक्तिः। खड्गं प्रगृह्य स्तम्भं ततारेत्यनुभावयो रुत्पत्तित इत्यावेगाख्यस्य सञ्चारिणः। नृसिंहस्यालम्बनम्। एवमन्यत्र ॥ ७।८।१४ (४)

स इति। स हिरण्यकशिपुर्विक्रमन् विक्रमंकुर्व्वन् ओजसा विशिष्टः निर्ह्रादम् अट्टहासः। अन्तःसभायां सभामध्ये। तस्य निर्ह्रादस्य पदमाश्रयं (यं) येन निर्ह्रादेन ॥ ७।८।१६ (५)

सत्यमिति।·· निजभृत्यस्य प्रह्लादस्य भाषितं हरिः सर्व्वगत

सत्त्वमेवं परितो विपश्यन्,
स्तम्भस्य मध्यादनुनिर्ज्जिहानम् ।
नायं मृगो नापि नरोऽतिचित्र-
महो किमेतन्नृमृगेन्द्ररूपम् ॥७॥
मीमांस्यमानस्य समुत्थितोऽग्रतो-
नृसिंहरूपं तदलं भयानकम् ।
प्रतप्तचामीकरचण्डलोचनम्,
स्फुरत्सटाकेशं विजृम्भितानन्म् ॥८॥
करालदंष्ट्रं करवालचञ्चल-
क्षुरान्तजिह्वं भृकुटिमुखोल्वणम् ।
स्तब्धोर्द्ध्वकर्णं गिरिकन्दराद्भुत-
व्याक्तास्यनाशं हनुभेदभीषणम् ॥९॥

इति सत्यं कर्त्तुं अदृश्यत हरिरिति शेषः । न मृगं न मृगसम्बन्धि ॥ ७।८।१७ (६)

स इति—स दैत्यः सत्यं निर्हादकर्त्तारम् प्राणिनम् । परितः सर्वासु दिक्षु विपश्यन् निर्ज्जिहानं निर्गतम् ॥ ७।८।१८ (७)

मीमांसमानस्येति । किमेतदिति मीमांसमानो विचारयन् समुत्थित (समुच्छ्रितः) इत्यन्वयः । अलमत्यर्थं भयानकं भयङ्करम् । प्रतप्तं यच्चामीकरं सुवर्णम् । तद्वर्णे चण्डे अतिकोपाग्निलोचने यस्मिन् रूपे । स्फुरन्त्यः सटाः जटाः केशराणि च कण्ठस्य समन्तात् स्थिताः केशाः । जृम्भितं विकसितं आननञ्च यस्मिन् ॥ ७।८।१९(८)

करालेति । करालवत् खड्गवच्चञ्चलां क्षुरां तद्वत्तीक्ष्णा च जिह्वा

दिविस्पृशत्कायमदीर्घ पीवर-
ग्रीवोरुवक्त्रःस्थलमल्पमध्यमम् ।
चन्द्रांशु गौरैश्छुरितं तनुरुहै-
र्विष्वग्भुजानीकशतं नखायुधम् ॥१०॥
दुरासदं सर्व्वनिजेतरायुध-
प्रवेकविद्रावित दैत्यदानवम् ।
प्रायेण मेऽयं हरिणोरुमायिना,
बधःस्मृतोऽनेन समुद्यतेन किम् ॥११॥
एवं ब्रुवन् स्वभ्यपतद्गदायुधो-
नदन्नृसिंहं प्रतिदैत्यकुञ्जरः ॥१२॥
अलक्षितोऽग्नौ पतितःपतङ्गमो-
यथा नृसिंहौजसि सोऽसुरस्तदा ।

यस्मिन्। भ्रूकुटीयुतेन मुखेनोल्वनं गिरिकन्दराङ्गतं प्रसारितं आस्यं नासा च यस्मिन् हनोर्भेदेन विभक्तत्वेन ॥ ७।८।२०-२१ (९)

दिवीति। अदीर्घा पीवरा च ग्रीवा गलः उरुविशालं वक्त्रःस्थलञ्च यस्मिन्। अल्पं क्षुद्रं मध्यमं मध्यभागः। तनुरुहैर्लोमादिभिः। च्छुरितं मिश्रितम्। विष्वक् समन्तात्। भुजा एवानीक शतानि सैन्यशतानि यस्य ॥ ७।८।२१-२२ (१०)

दुरासदमिति। निजं वक्त्रादि। इतरत्खड्गादि। प्रवेकं उत्तमं। अयं नृसिंहः। अनेन समुद्यतेन। मम किं न किमपीत्यर्थः। ७।८। २२-२३ (११)

एवमिति। अभिमुखमागतः ॥ ७।८।२३ (१२)

NATIONAL ARCHIVES OF INDIA

न तद् विचित्रं खलु सत्त्वधामनि,
स्वतेजसा योऽनुपुराऽपिवत्तमः ॥१३
ततोऽभिपद्याभ्यहनन्महासुरो-
रुषा नृसिंहं गदयोरुवेगया ।
तं विक्रमन्तं सगदं गदाधरो-
महोरगं तार्क्ष्यसुतो यथाग्रहीत् ॥१४॥
स तस्य हस्तोत्कलितस्तदा सुरो-
विक्रीड़तो यद्वदहिर्गरुत्मतः ।

अलचित इति—स च नृसिंहस्य ओजसि तेजोराशौ पतितः सन्नलक्षितः। अग्नाविव पतङ्गः। तत्तथाविधं तेजो वैभवम्। सत्वधामनि विष्णौ। यतोऽसौ पुरा सृष्ट्यादौ तमः। प्रलयान्धकारम्। (१) "आसीदिदं तमोभूतं अप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिवसर्व्वतः" इति वचनात्तदा तमः सद्भावः ॥ ७।८। २४ (१३)

तत इति अभिपद्य अभ्यपतत्। किञ्चिदभिमुखमागत्य पुनराजगाम। दयाविशिष्टः। तं दैत्यं विक्रमं कुर्व्वाणम्। गदाधरो नृसिंहः। तार्क्ष्यसुतो गरुड़ोऽग्रभीत्॥ (१) "ग्रहेर्भस्छन्दसी"ति भकारः। अप्रयासेन ग्रहणम्। दृष्टान्तेन व्यंजितम् ॥ ७।८।२५ (१४)

स इति—उत्कलित उन्मुक्तः। तदुत्कलनमसाधुमन्यन्त। हृतौकसो हृतस्थानाः। घनामेघाः। च्छदा अपवारणानि येषां ते

---

(१) मनुः १।५ श्लोकः।

असाध्यमन्यन्त हृतौकसोमरा-
धनच्छदा भारतसर्व्वधिष्ण्यपाः ॥१५॥
तं मन्यमानो निजवीर्य्यशङ्कितम्,
यद्वस्तमुक्तो नृहरिं महासुरः।
पुनस्तमासज्जत खड्गचर्म्मणी,
प्रगृह्यवेगेन गतश्रमो मृधे ॥१६॥
तं श्येन वेगं शतचन्द्रवर्त्मभि-
श्चरन्तमच्छिद्रमुपर्य्यधो हरिः।
कृत्वाट्टहासं खरमुत्स्वनोल्वणम्,
निमीलिताक्षं जगृहे महाजवः ॥१७॥
विष्वक् स्फुरन्तं ग्रहणातुरं हरि-
र्व्यालो यथाखुं कुलिशाक्षतत्वचम्।
द्वार्युरुमापात्य ददारलीलया,
नखैर्यथाहिं गरुडो महाविषम् ॥१८॥

तथा। माऽस्मानद्राक्षीदिति भयम्। धिष्ण्यपाः लोकपालाः। 'हे भारत! परीक्षित्॥ ७।८।२६ (१५)

तमिति। स्पष्टं॥ ७।८।२७ (१६)

तमिति—तं नृसिंहम्। यत् यस्मात्तं दैत्यं श्येनस्येव वेगो यस्य। शतचन्द्रं फलकं। अच्छिद्रं अलक्ष्यमाणावकाशं यथास्यात्तथोपर्य्यधश्च सञ्चरन्तम्। उच्चासेन खड्गेन उल्वणम्॥ ७।८।२८ (१७)

संरम्भदुष्प्रेक्ष्य करालලोचनो-
व्याक्ताननान्तं विलिहन् स्वजिह्वया ।
असृग् लवाक्तारुणकेशराननो-
यथान्तमाली द्विपहत्यया हरिः ॥१९॥
नखाङ्कुरोत्पाटितहृत्सरोरुहम्,
विसृज्य तस्यानुचरानुदायुधान् ।
अहन् समन्तान्नखशस्त्रपाणिभि-
र्दोर्दण्डयूथोऽनुपथान् सहस्रशः ॥२०॥
सटावधूता जलदाः परापतन्,
ग्रहाश्च तद्दृष्टि विमृष्टरोचिषः ।

विष्वगिति । ग्रहणेणातुरं व्यग्रम् व्याली यथेति ग्रहणे दृष्टान्तः ॥ ७।८।२९ (१८)

संरम्भेति । संरम्भेन संग्रामेण दुःप्रेक्ष्ये कराले लोचने यस्य स तथा । व्याकृतस्य प्रसारितस्याननस्यान्तं सृक्किरूपम् । असृजो रुधिरस्य लवैर्विन्दुभिः अक्तानि विलिप्तानि । अतएवारुणानि केशराणाननञ्च यस्य । यथाहरिः सिंहो द्विपस्य गजस्य हत्यया हननेन ७।८।३० (१८)

नखाङ्कुरेति । नखाङ्कुरोत्पाटितं हृत्सरोरुहं यस्य स तं । विसृज्याहनत् । हतवान् । पार्ष्णिगुल्फाधोभागः । दोर्दण्डानां यूथं सङ्घो यस्मिन् । अनुपथान् अनुचरानलस्यानुगामिनः ॥ ७।८।३१ (२०)

अम्भोधयः श्वासहता विचुक्षुभु-
र्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥२१॥
द्यौस्तत्सटोत्क्षिप्त विमानसङ्कुला,
प्रोत्सर्पत क्ष्मा च पदाभिपीड़िताः।
शैलाः समुत्पेतुरमुष्यरंहसा,
तत्तेजसा खं ककुभो नरेजिरे ॥२२॥
ततः सभायामुपविष्टमुत्तमे,
नृपासने संभृत तेजसं विभुम्।
अलक्षित द्वैरथमत्यमर्षणम्,
प्रचण्डवक्त्रं न बभाज कश्चन ॥२३॥
निशम्य लोकक्षयमस्तकज्वरम्,
तमादिदैत्यं हरिणाहृतं मृधे।
प्रहर्षवेगोत्कलिताननाम्बुजः,
प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥२४॥

सटेति। सटाभिःस्कन्धस्थैः केशैरवधूताः पराहताः परापतन् दूरे पतिताः। ग्रहाः सूर्य्यादयः ॥ ७।८।२३ (२१)

द्यौरिति। द्यौः स्वर्गः। तत्सटाभिः। उत्क्षिप्तैरूर्द्धं गमितैः विमानैः सङ्कुला सम्बन्धा प्रोत्सर्पत प्रकर्षेणोर्द्धंगता। क्ष्मा पृथिवी। अमुष्य नृसिंहस्य। रंहसा वेगेन ॥ ७।८।२२ (२२)

ततो बधानन्तरम्। अलक्षितं द्वाभ्यां रथाभ्यां निर्वृत्तं युद्धम्। अदृष्टप्रतिभटमित्यर्थः ॥ ७।८।२४ (२३)

निशम्येति। उत्कलितं उत्फुल्लम् ७।८।२५ (२४)

NATIONAL ARCHIVES OF INDIA

तदा विमानावलिभिर्नभस्तलम्,
दिदृक्षतां सङ्कुलमासनाकिनाम् ।
सुरानका दुन्दुभयोऽथजघ्निरे,
गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥२५॥

शिशुपालः ।

इत्थं सभाजितं वीक्ष्य सर्वे प्राञ्जलयो जनाः ।
नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ॥२६॥

इत्थं निशम्य दमघोषसुतः स्वपीठा-
दुत्थाय कृष्णगुणवर्णनजातमन्युः ।
उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी,
संश्रावयन् भगवते परुषाण्यभीतः ॥२७॥

ईशो दुरत्ययः काल इति सत्यवती श्रुतिः ।
वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥२८॥

नाकिनो देवाः । हिरण्यकशिपुः प्रह्लादम् ॥ ७।८।३६ (२५)

इत्यमिति । इत्थं राजसूयाग्रपूजया सभाजितं सत्कृतम् नमो जयेति वंदन्तः । तं कृष्णम् ॥ १०।७४।२८ (२६)

इत्यमिति । इत्थं "अर्हति ह्यच्युतः श्रेष्ठ"मित्यादि सहदेववाक्यम् । निशम्यश्रुत्वा । दमघोषसुतः शिशुपालः । स्वपीठात् स्वासनात् भगवते भगवदर्थं तमुद्दिश्येत्यर्थः । अचामर्षीति स्थायिनः क्रोधस्योक्तिः । गुणवर्णनजातमन्युरिति मत्सरस्य-विभावस्य । उत्क्षिप्यबाहुमित्यनुभावस्य सञ्चारिणस्तूच्याः ॥ १०।७४।३० (२७)

ईश इति । श्रुतिः प्रसिद्धिः । वृद्धानां भीष्मादीनां । बालः

यूयं पावविदां श्रेष्ठा मा मन्ध्वं बालभाषितम् ।
सदस्यतयः सर्वे क्षणो यत् सम्मतोऽर्हणे ॥२९॥
तपो विद्याव्रतधरान् ज्ञानविध्वस्तकल्मषान् ।
परमर्षीन् ब्रह्मनिष्ठान् लोकपालैश्च पूजितान् ॥३०॥
सदस्यतीनतिक्रम्य गोपालः कुलपांसनः ।
यथा काकः पुरोडाशं सपर्य्यां कथमर्हति ? ॥३१॥
वर्णाश्रमकुलापेतः सर्वधर्म्मबहिष्कृतः ।
क्वैरवर्त्ती गुणैर्हीनः सपर्य्यां कथमर्हति ॥३२॥

सहदेवः ॥ १०।७४।३१ (२८)

यूयमिति । क्षणोऽर्हणे सम्मत इति यद् बालभाषितं । मामन्ध्वं नमन्ध्वम् सदस्यतयः सभापतयः ॥ १०।७४।३२ (२९)

तप इति । ऋष्यादीनतिव्रज्य १०।७४।३३ (३०)

सदस्यतीति । गोपालो वल्लभः । सपर्य्यां पूजां कथमर्हति न कथमपीत्यर्थः । वस्तुतः गाव इन्द्रियाणि तासां पालोऽधिष्ठाता । कुलं वंशम् पांसयति मलिनं करोति इति कुलपांसनः । (१) विन्मतो-रलुगिति ॥ मतुपो लुक्, टेरित्यकारलोपः । तत्त्वतस्तु कुलपान् (कुत्-सितं लपन्तीति कुलपान्) कुत्सितवाचः । अंसयति विभाजयति । पृथक्करोति निराकरोतीति कुलपांसनः । काको वायसः । अथवा अकं पापं दुःखम् च तत्र अको वक्रगामी तन्नायक इत्यर्थः । (२) "अक वक्रगताविति" भुवा (भौवा)दौ पठ्यते ॥ १०।७४।३४ (३१)

वर्णेति । सर्वधर्म्मेभ्यो बहिष्कृतम् करणं यस्य यत् सर्वधर्मेभ्यो

---

(१) मात्विनि; ५।२।९५ सूः ।

(२) पाणिनीय धातु पाठो द्रष्टव्यः ।

NATIONAL ARCHIVES OF INDIA

ययातिनैषां हि कुलं शप्तं सद्भिर्बहिष्कृतम् ।
तथा प्रानरतं शश्वत् सपर्य्यां कथमर्हति ॥३३॥
ब्रह्मर्षि सेवितान् देशान् हित्वैतेऽब्रह्मवर्च्चसम् ।
समुद्रं दुर्गमाश्रित्य बाधन्ते दस्यवः प्रजाः ॥३४॥
एवमादीन्यभद्राणि वभाषे नष्टमङ्गलः ।
नोवाच किञ्चिद्भगवान् यथा सिंहः शिवारुतम् ॥३५॥
ततः पाण्डुसुताः श्रुत्वा मत्स्य कैकेयसञ्जयाः ।
उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥३६॥
ततश्चैद्यस्त्वसम्भ्रान्तो जगृहे खड्गचर्म्मणी ।
भर्त्सयन् कृष्णपक्षीयान् राज्ञः सदसि भारत ॥३७॥
तावदुत्थाय भगवान् स्वान् निवार्य्य स्वयं रुषा ।
शिरः क्षुरान्तचक्रेण जहार पततो रिपोः ॥३८॥

न लभ्यते तत्फलमयं लभ्यतोत्यर्थः ॥ स्वैरवर्त्ती ईश्वरत्वात् । गुणैर्हीनश्चिन्नात्वात् । अर्थान्तरन्तु वक्रत्वं (वक्रत्यम्) ॥ १०।७४।३५(३२)

ययातीति स्पष्टं ॥ १०।७४।३६ (३३)

ब्रह्मर्षीति स्पष्टम् ॥ १०।७४।३७ (३४)

एवमिति स्पष्टं । मङ्गलं तच्छरीरारम्भकं पुण्यं यस्य स तथा । शिवारुतं शृत्वेति शेषः ॥ १०।७४।३८ (३५)

तत इति । उदायुधाः उद्यतास्त्राः ॥ १०।७४।४१ (३६)

तत इति । हे भारत ! परीक्षित् ॥ १०।७४।४२ (३७)

तावदिति । स्वान् भीमादीन् । क्षुरवत् अन्तो यस्य । (आ)पततः आगच्छतः ॥ १०।७४।४३ (३८)

चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् ।
पश्यतां सर्वभूतानां उल्केव भुविखाच् च्युता ॥३९॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
रौद्ररसो नाम चतुर्दशोऽध्यायः ॥

एवं रौद्ररसेन भजन्तो भगवत्सायुज्यफलं भवतीत्याहुः चैद्य इति । खात् आकाशात् । शुकः राजानम् ॥ १०।७४।४५ (३९)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायाम् विष्णुभक्तानां
रौद्ररसो नाम चतुर्दशोऽध्यायः ॥१४॥

NATIONAL ARCHIVES OF INDIA

पञ्चदशोऽध्यायः ।

विष्णुभक्तानां भयानकरसः ।

भयानकरसे कंसः ।

धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ।
पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥१॥
दोर्वप्रजागरो भोतो दुर्निमित्तानि दुर्मतिः ।
बह्वन्यचष्टोभयथा मृत्योर्दौत्यकराणि च ॥२॥
हतं कुवलयापीड़ं दृष्ट्वा तावपि दुर्जयौ ।
कंसो मनस्यपि तदा भृशमुद्विविजे नृप ! ॥३॥

अथ पिशाचादि विकृतस्वरश्रवण-तदवलोकन खजन-बन्धुवधादि-दर्शनश्रवण-शून्यगृहारण्यगमनादिविभावम् । करकम्पचलदृष्टि-निरीक्षणहृदय-पादस्खलन-शुष्कोष्ठकण्ठतालुमुखवैवर्ण्य-स्वरभेदाद्यनुभावं, शङ्कापस्मार-मरणत्रास चापल्यदैन्यमोहादि व्यभिचारिणं त्रीणि च प्रकृतिषु स्वाभाविकमुत्तमेषुकृतकम् । भयानकं रसमाह भयानकेति । धनुष इत्यादौ भज्यमानस्य शब्देन रोदसीति भू-द्यावौ यं शब्दम् ॥ १०।४२।१८ (१)

दोर्वंति । दोर्वः प्रजागरो निद्राक्षयो यस्य स तथा । अचष्ट अपश्यत् । उभयथा स्वप्ने जागरे च । दौत्यं दूतवत् ॥ १०।४२।२७(२)

हतमिति । तौ रामकृष्णौ उद्विविजे उद्विग्नोऽभूत् । हे नृप ! परीक्षित् । शुकः राजानम् ॥ १०।४३।१८ (३)

NATIONAL ARCHIVES OF INDIA

तं खड्गपाणिं विचरन्तमाशु,
श्येनं यथा दक्षिणसव्यमम्बरे।
समग्रहीद् दुर्विषहोग्रतेजा-
यथोरगं तार्क्ष्यसुतः प्रसह्यः ॥४॥
प्रगृह्य केशेषु चलत्किरीटम्,
निपात्यरङ्गोपरितुङ्गमच्चात्।
तस्योपरिष्टात् स्वयमञ्जनाभः,
पपात विष्वाग्रय आत्मतन्त्रः ॥५॥
सनिस्वदोद्विग्न-धिया तमीश्वरम्
पिबन्निवाक्ष्णा विचरन् स्वपन् श्वसन्।

तमिति। तं कंसं दक्षिणसव्यं दक्षिणतः सव्यतश्च विचरन्तम्। दुर्विषहं अतिदुःसहम्। अतएव उग्रं तेजो यस्य स तथा। तार्क्ष्यसुतोऽपि दुर्विषान् सर्वान् हन्तीति दुर्विषहाः॥ १०।४४।३६ (४)

प्रगृह्येति। चलत्किरीटं कंसं,तुङ्गात् उच्चान्मञ्चात् रङ्गोपरि(स्वयं) निपात्य तस्योपरि अपि स्वयं पपात। अञ्जनाभः इन्द्रनीलोज्ज्वलत्वात्। विष्वाग्रय इत्यनेन गुरुत्वप्रकर्षादुपरिपातमात्रेण कंसस्य गतासुत्वमुक्तम्। ननु चक्रादिभिरहत्वा किमित्येवमेव हत इत्याह आत्मेति। अत्र च कंसस्य नारदादिभ्यो भगवत्कर्तृकवधश्रवणात् उत्पन्नाभीः स्थायिभावो भीत इत्युक्तः॥ १०।४५।३७ (५)

तस्य च धनुषः शब्दश्रवणदुर्निमित्तं गजवधदर्शनादय उद्दीपनविभावाः। दीर्घप्रजागरादयोऽनुभावाः। त्रासोद्वेगौ च सञ्चारिणौ। अथ भयानकरसेन भजतः फलमाह। स इति। सः कंसः।

NATIONAL ARCHIVES OF INDIA

ददर्श चक्रायुधमग्रतो यत-
स्तदेवरूपं दुरवापमाप ॥६॥

दुर्वासाः ।

संसद्द्यमानोऽजितशस्त्रवह्निना,
तत्पादमूले पतितः सवेपथुः ।
आहाच्युतानन्त सदीप्सित प्रभो !
कृतागसं माऽव हि विश्वभावन ॥७॥
अजानता ते परमानुभावम्,
कृतं मयाघं भवतः प्रियाणाम् ।
विधेहि तस्यापचितिं विधात-
र्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥८॥

नित्यदा सर्वकालं उद्विग्नधिया विशिष्टः । यदेव पानाद्यवस्थासु ददर्श । तदेवाप फलम्, फलकीर्त्तनस्य च प्रकरणपर्य्यन्ते समुचितत्वेऽपि भीरुभक्तेषु कंसस्यैव मुख्यत्वादत्रैव तत् कृतम् ॥ १०।४४।३८ (६)

स इति । स दुर्वासाः । अजितस्य शस्त्रं चक्रम् । विष्णुनाम्बरीशरक्षार्थं स्व चक्रं प्रहितम् । तस्याजितस्य पादमूले स वेपथुः स कम्पः । कृतागसं कृतापराधम् । मा मां अव रक्ष । हे विश्वभावन । विश्वं भावयसि सत्तां (तां) लम्भयसि । तथा (यद्वा) भावयसि रक्षयसीति ॥ ९।४।६१ (७)

अजानतेति । अघं दुःखं । कृत्योत्पादनरूपां । प्रियाणां ह्यम्बरीषादीनाम् । बहुवचनमत्राम्बरीषस्य पुत्रकलत्रादिविवक्षया । तेऽपि ह्यम्बरीषसम्बन्धाद् भगवत्प्रियाः । अपचितिं निस्तारम् । यस्य

NATIONAL ARCHIVES OF INDIA

पाहि पाहि महायोगिन् देव देव जगत्पते ! ।
नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥९॥

कुन्ती ।

यथा हृषीकेश खलेन देवकी,
कंसेन रुद्धाति चिरं शुचार्पिता ।
विमोचिताहञ्च सहात्मजा विभो !
त्वयैव नाथेन मुहुर्विपद्गणात् ॥१०॥
अथ्य नस्त्वं स्वकृते हित प्रभो !
जिहाससि स्वित् सुहृदोऽनुजीविनः ।
येषां न चान्यद् भवतः पदाम्बुजात्,
परायणं राजसु योजितांऽसाम् ॥११॥

तव नाम्नुदिते किं पुनस्त्वयि(पि) दृष्ट इत्यर्थः। अत्र दुर्वासस: स्ववधाद्भयं स्थायी भावः। दह्यमानत्वमुद्दीपनविभावः। पादपतनं वेपथुरश्रुतेत्याक्रन्दनं चानुभावः॥ ९।४।६२ (८)

पाहीति। अथ स्वजनवधशङ्का-विभावं भयमाह। उत्तरेत्यादि। हे देव कृष्ण! यत्र यस्मिन्। अत्र पाहि पाहीत्यनेन स्वपुत्रवधदर्शन-मुत्तरयाव्यक्तीकृतम्॥ १।८।९ (९)

यथेति। यथा-यथावच्छब्दाभ्यामेवोपमार्थस्य लब्धत्वात्। मुहु-र्विपद्गणादिव्यतिरेकः॥ १।८।२३ (१०)

अपीति। कृष्णप्रयाणं निषेधयति। अपि अहो जिहा-ससि स्वान् हातुमिच्छसि। किञ्च वयं हि सुहृदोऽनुजीविनश्च। त्वं स्वकृते हितः स्वस्मिन् आत्मोद्धे कृतमीहितमभिलषितं येन स तथा।

प्रह्लादः ।

त्वस्तोऽस्मद्रहं कृपण वत्सल दुःसहोग्र-
संसार चक्रकदनाद् ग्रसतां प्रणीतः ।
बद्धः स्वकर्म्मभिरुशत्तम तेऽङ्घ्रि मूलम्,
प्रीतोऽपवर्ग शरणं ह्वयसे कदानु ॥१२॥
यस्मात् प्रिया प्रियवियोगसयोग जन्म-
शोकाग्निना सकल योनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाहम्,
भुमन् भ्रमामि वदमे तवदास्य योगम् ॥१३॥
सोऽहं परस्य सुहृदः परदेवतायाः
लीलाकथा स्तव नृसिंहविरिञ्चगीताः ।

जनस्य कामान् पूरयसीत्यर्थः । राजसु चत्रियेषु सुयोजितं सुष्ठ्वागं नीतम् । अंहः पापं कर्म्म यैस्ते तथा । कुन्ती श्रीकृष्णम् ॥ १।८।३७ (११)

त्वस्तोऽस्मोत्यादि । हे उशत्तमनृसिंह ! कदनं दुःखम् । असत। मध्ये प्रणीतः प्रक्षिप्तोऽहं स्वकर्म्मभिः । ते अङ्घ्रिमूलम् प्रति कदा आह्वयसे आह्वयसि ॥ किम्भूतं अपवर्गं मुक्तिरूपम् । अरणं शरणम् । हे भुमन्, अस्मिन् प्रपञ्चोपाधौ तयाऽहं भ्रमामि । अतस्त्वदास्य योगं वद ॥ ७।८।१६ (१२)

यस्मादिति । प्रिय विप्रयोगजन्मना अप्रिय संयोगजन्मनाच शोकाग्निना दह्यमानः यद् दुःखौषधम् । तदपि दुःखं तत् सम्पादनस्य दुःखात्मकत्वात् ॥ ७।८।१७ (१३)

NATIONAL ARCHIVES OF INDIA

अञ्जःस्तितर्म्यनु गृणन्गुणविप्रयुक्तो-
दुर्गाणि ते पदयुगालय हंस सङ्गः ॥१४॥
बालस्य नेह शरणं पितरौ नृसिंह-
नार्त्तस्य चागद मुदन्वति मज्जतोनौः।
तप्तस्य तत्प्रति विधिर्य इहाञ्जसेष्ट-
स्तावद्विभो तनुभृतां त्वदुपेक्षितानाम् ॥१५॥
कुत्राशिषः श्रुतिसुखामृगतृष्णि रूपाः
क्वेदं कलेवर मशेष रुजां विरोहः।

ननु दास्ययोगस्य किं फलं तत्राह। सोहमिति। हे नृसिंह! गुणैर्ज्ञानादिभिर्विप्रयुक्तो हीनस्तवकथाः। पुनः पुनर्गुणन्नञ्जसा दुर्गाणि तितर्म्मि तरामि प्रियत्वात् सुखसेव्यत्वम्। सुकृत्वा दुपकर्त्तृकत्वं देवनात्वादुपकारसमर्थत्वम्। विरिञ्चिगोता इति सदनुष्ठितोऽयं मार्ग इत्युक्तम्। ते पदयुगत्रयालयः आश्रयो येषां हंसानां योगिनां तेषां सङ्गो यस्य स तथा। तत्प्रसङ्गादि कथा निर्वाहः॥ ७।८।१८ (१४)

ननु दुःखस्य प्रतीकारः क्रियताम् किन्दास्येनेयत आह। बालस्येति। हे नृसिंह! इहलोके यः पदार्थ इहदुःखे शरणम् रचिता इष्टः सम्मतः सत्व (तु) दुपेक्षितानां अञ्जः(ञ्जः)निश्चितं न भवत्येव। तावदवतारणे तस्यवं प्रपञ्चः। बालस्येत्यादि। आर्त्तो रोगो। अगदमोषधम्। तत्प्रतिविधि स्तत्प्रतीकारः॥ ७।८।१९ (१५)

ननु विरक्तं दुःखं न बाधते ऽतो विरक्तेन भवितव्यमिति चेत्तत्राह। कुत्रेति। आशिषो विषया मृगतृष्णिकारूपाः। मरीचिकावभासाः। तथाहि—मृगतृष्णारविरश्मिरूपापि जलरूपाव-

NATIONAL ARCHIVES OF INDIA

निर्विद्यते न तु जनो यदपीति विद्वान्,
कामानलं मधुलवैः शमयन् दुरापैः ॥१६॥
क्वाहं रजः प्रभव ईश तमोऽधिकेऽस्मिन्,
जातः सुरेतर कुले क्वतवानुकम्पा ।
न ब्रह्मणो न तु भवस्य नवै रमाया-
यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥१७॥
नैषा परावरमतिर्भवतो ननुस्याज्-
जन्तोर्ययात्म सुहृदो जगतस्तथापि ।
सं सेवया सुरतरोरिव ते प्रसादः,
सेवानुरूप सुदृशो न परावरत्वम् ॥१८॥

भासते। तथा विषयादुःखरूपा अपि सुखरूपा इव दृश्यन्त इति भावः। विरोहः प्ररोहः स्थानम्। यदपि यद्यपि इति विद्वान् एवेति। तथापि न निर्विद्यते न विरज्यते। कामानलमिच्छाग्निं मधुतुल्यत्वाद् मधुसुखम् तस्य लवैर्लेशैः ॥ ७।८।२५ (१६)

क्वाहं रज इत्युक्तं तदेव दर्शयति। क्वाहमिति। रजः प्रभवो रजोऽधिकारः। सुरेतरा देत्याः। कामाऽनुकम्पा यस्मे शिरसि पद्मकररूप प्रसादोऽर्पितः। ब्रह्मादिभि स्त्रिभिः षष्ठान्तैः। पुत्रमित्रकलत्रेष्वपि प्रेमपात्रेष्वपि नैवंविधं प्रसादः कृतः पूर्वो भवतेति उक्तम् ॥ ७।८।२६ (१७)

ननु कृपालुश्चेत् कथं फलवैषम्यं तत्राह। नैषेति। हे भगवन्! एषा परावरमतिः अयमुत्तमः अयमधम इति बुद्धिर्जन्तोर्यया क्लेशकर्माद्युपेतस्य त्वं हि जगत आत्मना स्वेनैव सुहृत्। न तु निमित्त-

NATIONAL ARCHIVES OF INDIA

एवं जनं निपतितं प्रभवाहि कूपे,
कामाभिकाम मनुयः प्रयतन् प्रसङ्गात्।
कृत्वात्मसात् सुरर्षिणा भगवान् गृहीतः,
सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥१९॥
मत् प्राणरक्षण मनन्त पितुर्वधञ्च,
मन्ये स्वभृत्य ऋषिवाक्य मृतंविधातुम्।
खड्गं प्रगृह्य यदवोचदसद्विधित्सु-
स्त्वामीक्षयोमदपरोऽवतु कं हरामि ॥२०॥
नैतन्मन स्तव कथासु विकुण्ठनाथ!
संप्रीयते दुरित दुष्ट मसाधु तीव्रम्।

वशात्। तयापि सेवकस्यैव तत्फलम्। तच्च सेवानुरूपम्। न तु परावरत्वमुदये फले कारणम्। एतच्च सुरतरौ दृष्टम्। स हि पत्र-पातहीनोऽप्युपसर्पतामेव यथाफलं प्रसूते न तु दूरस्थानाम्। सेवाकृतं वैषम्यम् फलतीति कृपालुत्वं अतो न विरोध इत्यर्थः॥ ७।८।२७ (१८)

तत्र (दु)र्लभेवापि फलदेत्याह एवमिति। प्रभवाहि कूपे संसारे। कालसर्परूपे पतितं जनमनुजनेन सहप्रसङ्गात्। प्रयतम् सुरर्षिणा नारदेन। उद्धृतः कामाभिकामं विषयाभिलाषिणम्॥ ७।८।२८ (१९)

यदिति। स्वभृत्यो हिरण्यकशिपुः स एव ऋषिः तस्य वाक्यं ऋतं सत्यं सत्यं कर्त्तुं इति प्रकृतिभावः। किन्तदवाक्यं यदसद्विधित्सुर्मां जिघांसुरवोचत्। अहन्ते कथं शिरोहरामि। यदन्योय ईश्वरोऽस्ति सत्वामवत्विति॥ ७।८।२९ (२०)

NATIONAL ARCHIVES OF INDIA

कामातुरं हरष शोकभयैषणार्त्तम्,
तस्मिन् कथं तव गतिं विसृषामि दीनः ॥२१॥
जिह्वैकतोऽच्युत विकर्षति मावितृप्ता,
शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।
घ्राणोऽन्यतश्चपलदृक् क्वच कर्म्मशक्ति-
र्बह्व्यः सपत्न इव गेह पतिं लुनन्ति ॥२२॥
एवं स्वकर्म्म पतितं भववैतरण्या-
मन्योन्य जन्म मरणाशन भीत भीतम् ।
पश्यन् जनं स्वपर विग्रह वैरमैत्रम्,
हन्तेति पारचर पीपृहि मूढ़मद्य ॥२३॥

ननु तथापि जिन्दास्थेन मत्स्वरूपमात्मनि विमृश्य त्वां तत्राह । नैतदिति । तत्र कथासु नप्रीयते ननु तुष्यति । यतो दुरितैः पापैर्दुष्टम् अतएव तीव्रम् । यथा तथा असाधु एषणाः पुत्रैषणाद्या-अतस्तस्मिन् कथं तवगतिं स्वरूपम् विसृषामि ॥ ७।८।३९ (२१)

एषणात्मतामेवाह । जिह्वेति । मामां अतृप्ता क्षुधिता । प्राणो नासाग्रसञ्चारीवायुः । अन्यतो गन्धः दृक्चक्षुः । कर्म्मशक्तिः कर्म्मेन्द्रियाणि ॥ ७।८।४० (२२)

इदानीं सर्वार्थं प्रार्थयते श्लोकद्वयेन । एवमिति । हे पारचर ! परतोरस्य भववैतरण्यां संसारप्रवाहे पतितं जनमित्येवं पश्य । यथा मां कृपया पश्यसि तथेत्यर्थः । पिपृहि कृपावलोकेन पालयेत्यर्थः ॥ ७।८।४१ (२३)

NATIONAL ARCHIVES OF INDIA

कोऽन्वत्र तेऽखिल गुरो भगवन् प्रयास-
उत्तारणेऽस्य भव संभव लोपहेतोः।
मूढेषु वै महदनुग्रह आर्त्त बन्धो!
किन्त्वेन ते प्रियजनाननु सेवतां नः ॥२४॥

श्रीसदस्याः।

उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्र-
व्यालान्विष्टे विषय मृगतृषात्मगेहोरु भारः।
द्वन्द्व श्वभ्रे खल मृगभये शोकदावेऽज्ञसार्थः,
पादौकस्ते शरणद कदा याति कामोपसृष्टः ॥२५॥

कोऽन्वत्रेति। अन्योऽन्यं परस्परम्। जन्मादिभ्यो भीतं कालाच्च भीतं स्वपरविग्रहयोः शरीरयोर्यथासम्भवं वैरमेव यस्य तम्। अस्य जगतः भवसम्भवलोपाः सृष्टिस्थितिलयाः महतामनुग्रहश्च मूढेषु। ननु किमन्यप्रसङ्गेन त्वां तावदुत्तारयिष्यामीति चेत्तत्राह। तेन मत्तेन किं न किमपीत्यर्थः। वयं तद्भृत्यसेवयैव कृतार्था इत्यभिप्रायः। तत्र च त्वत्तोऽस्मीत्येतदारभ्य प्रकरणे एव भयानको रसः। 'द्वादो नृसिंहम् ॥७।८।४२ (२४)

उत्पत्तीति। उत्पत्तिः संसारः। अशरणे रक्षकहीने। व्यालाः। विष्टो दृष्टः (दृष्टः) मृगतृड् मृगतृष्णा। आत्मा देहो गेहञ्च। उरुभारोयस्य द्वन्द्वानि हर्षविषादादीनि। श्वभ्रं गर्त्तः। मृगाः सिंहादयः। ज्ञाः पण्डितमन्याः। तेषां स्वार्थं सद्भः उपसृष्ट उपद्रुतः। कदा याति कोऽपिकदापि न याति। मार्गान्तरयति तत्त्वादित्यर्थः। अत्र च घोरं संसार दर्शनात्। सदस्येषु भयमुत्पन्नमिति शरण-

मुचुकुन्दः ।

चिर मिह व्रजिनार्त्तस्य मानोऽनुताप-
रविषड्विलोलस्य शान्तिः कथञ्चित् ।
शरणद् समुपेत स्तत् पदाब्जं परात्मन् !
अभयमृतमशोकं पाहिमापन्नमीश ! ॥२६॥

रुद्रज्वरः ।

तप्तोऽहं ते तेजसा दुःसहेन,
शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत् तापो देहिनां तेऽङ्घ्रि मूलम्,
नो सेवेरन् यावदाशानुबद्धाः ॥२७॥

नारदः ।

तं तवाङ्घ्रि युगलं जनतापवर्गम्,
ध्यादिभिर्हृदि विचिन्त्य मगाधबोधैः ।

प्रत्यगेन व्यञ्जितम् । भीतानां हि शरणेच्छा । सदस्या भगवन्तम् ॥४।७।२८ (२५)

चिरमिति । व्रजिनं दुःखम् । अनुतापैः पश्चात्तापैः । अविषड्षट् इन्द्रियाण्यमित्राणि यस्य शंसुखरूपम् । अभयमद्वितीयत्वात् । ऋतमबाध्यत्वात् । अशोकमानन्दघनत्वात् । आपन्नं शरणागतम् । मुचुकुन्दः श्लोकाभ्याम् ॥१०।५१।५७ (२६)

तप्तोऽमिति । शान्तः सदुग्रः शान्तोग्रः तेन शीतेनेत्यर्थः । रुद्रज्वरः श्लोकाभ्याम् ॥१०।६३।२८ (२७)

एवं भयानक रसेन भजतोऽनिष्टहानि रिष्टाभिषस्यादित्याह ।

संसार कूपपतितोत्तरणावलम्बम्,
ध्यायं श्चराम्यनुगृहाण यथास्मृति: स्यात् ॥२८॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
भयानकरसो नाम पञ्चदशोऽध्याय: ।

दृष्टमिति। यत्तवाङ्घ्रियुगलंध्यायेत् स्मरामोत्यतोऽन्यत् किं प्रार्थनोय मस्तीत्यभिप्राय:। जनानां समूहो जनता। तस्यापवर्गं कैवल्यम्। ब्रह्मानन्दादपि सुतरामभिलषणोयमित्याह। ब्रह्मादिभिरिति। मुक्तानां स्पृहनोयत्व मुक्ता मुमुक्षूणान्तदाह। अगाधेति। यद्यपि मदङ्घ्रि दर्शनं परमपुरुषार्थजातञ्च तत्तथापि किञ्चिदाद्रियतामिति चेत्तत्राहानुगृहाणेति। स्मृतेर्विपरिलोपोमाभूदित्यर्थ:। फलकीर्त्तनार्थमेवास्यश्लोकस्येहपाठ:। अन्यथा भयभङ्गाया अभावादनर्थक: पाठ:स्यान्नारद: श्रीकृष्णम् ॥१०।६८।१८ (२८)

इति हेमाद्रि विरचितायां कैवल्यदोपिकायां विष्णुभक्तानां
भयानकरसो नाम पञ्चदशोऽध्याय: समाप्त: ॥

NATIONAL ARCHIVES OF INDIA

षोड़शोऽध्यायः ।

वीभत्सरसे पुरुरवाः ।

क्वायं मलीमसः कायो दौर्गन्ध्यादात्मकोऽशुचिः ।
क्वगुणाः सौमनस्याद्याश्चध्यासोऽविद्ययाकृतः ॥१॥
पित्रोः किं स्वंनु भार्य्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः ।
किमात्मनः किंसुहृदामिति योनावसीयते २॥
तस्मिन् कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते ।
अहो सुभद्रं सुनसं सुस्मितञ्च मुखं स्त्रियाः ॥३॥

अथ हृद्यव्रण पूतिगन्ध कृमिकीटानां दर्शन श्रवणादिभावं अङ्ग संकोचहृल्लास नासा मुख विविक्त पानाच्छादन निष्ठीवनाद्यनुभावम् अपस्मारौग्रमोहमदादि व्यभिचारिणं जुगुप्सा स्थायिभावं विभत्स-समाह । विभत्सेति । क्वायमित्यादि । मलीमसो मलिनः । सौमनस्यं पुष्पतुल्यत्वम् । तच्चगन्धेन दौर्गन्ध्यादि व्यतिरेकात् । अध्यासः अतस्तद्रूपे तद्रूप बुद्धिः (१) ॥११।२६।१८ (१)

पित्रोरिति । नावसीयते न निष्ठीयते । अत्र पित्रादीनां क्रमाज्जननोप क्रमादाह । भक्षणाधिष्ठानो दोष योगाः स्वत्वहेतवः ॥११।२६।१७ (२)

तस्मिन्निति । तस्मिन्निश्चिते अमेध्ये अपवित्रे तुच्छेन अल्पेन

---

(१) "कोऽयमध्यासोनामेति स्मृतिरूपः परत्र पूर्व दृष्टावभासः अतस्मिंस्तद्बुद्धि रित्यवोचाम" शारीरकभाष्यम् । १।१।१। आध्यासोमिथ्याभसः अविद्या अज्ञानमिति यावत् ।

NATIONAL ARCHIVES OF INDIA

त्वङ्मांस रुधिर स्नायू मेदोमज्जास्थिसंहतौ।
विन्मूत्र पूये रमतां कृमीणां कियदन्तरम् ॥४॥
पुंश्चल्यापहृतं चित्तं कोऽन्वन्यो मोचितुं प्रभुः।
आत्मारामेश्वरस्ते भगवन्त मधोक्षजम् ॥५॥

अवधूतः।

देहो गुरुर्मम विरक्ति विवेक हेतुः,
बिभ्रत् स्म सत्त्व निधनं सतातर्त्युदर्कम्।
तत्त्वान्यनेन विमृशामि यथा तथापि,
पारक्यमित्यवसितो विचराम्यसङ्गः ॥६॥

निष्ठानाशोऽस्येति तुच्छ निष्ठम्। विषज्जते विशेषात्सङ्गं करोति तदाह ॥११।२६।२० (३)

त्वगिति। अहो इत्यादि। विड़ादीनां त्रयाणां द्वन्द्वैकत्वम्। त्वगादीनां समानां संहतिः सङ्घातो यस्मिन् विन्मूत्रपूये। तत्र रमतां प्राणिनाञ्च कृमीनाञ्च कियदन्तरं न कियदपीत्यर्थः ॥११।२६।२१ (४)

पुंश्चलो जर्व्वशी। तु अहो। आत्मनि स्वस्वरूपे सदानन्द घने। आरमन्ति सर्व्वकाल मभिव्याप्य क्रीड़न्ति मनोव्यापारयन्ति ये ते तथा। जीवन्मुक्ता इत्यर्थः। तेषामीश्वरं नित्यमुक्तत्वात्। अत्र क्वायमिति चेपार्थेण जुगुप्सा गम्यते। तस्या देहदोषा-उद्दीपन विभावाः। सञ्चारिणस्तूह्याः। जगुप्सायुक्तस्य चेतसो भगवद्विषयत्वाद् भक्तिरसत्वम्। ऐलः श्रीकृष्णम् ॥११।२३।१५ (५)

देह इत्यादि। कुतोगुरुः यतो विरक्ति हेतुः। विरक्तिहेतुत्वं कुतः यतः सत्त्वनिधनम्। जन्मनाशौ बिभ्रदिति। उदर्कं उत्तर-कालफलम्। विवेकहेतुत्वमाह तत्त्वानीति। तत्त्वानि पुरुषादीनि

NATIONAL ARCHIVES OF INDIA

जायात्मजार्थं पशु भृत्य गृहाप्तवर्गान्,
पुष्णाति यत्प्रिय चिकीर्षया वितन्वन् ।
स्वान्ते सकृच्छ्रमवरुद्ध धनः सदेहः,
स्रष्टुास्य वीज मवसीदति वृक्ष धर्म्मा ॥७॥
लब्ध्वासुदुर्लभमिदं बहु सम्भवान्ते,
मानुष्यमर्थदमनित्य मपीहधीरः ।
तूर्णं यतेत न पतेदनुमृत्यु यावत्-
निःश्रेयसाय विषयः खलु सर्व्वतः स्यात् ॥८॥

यथा यथावत् । यद्यप्येवं यथापि पारोक्ष्यम् श्वशृगालादिभक्ष्यमिदमिति निश्चितोऽयम् । अतोऽसङ्गोममत्वहीनोऽहं विचरामि ॥११।८।२५ (६)

जन्मनाशवत्तामेवाह । जायेति । यस्य देहाभिमानेन आत्मनः प्रियचिकीर्षया वितन्वन् सम्पादयन् सन् पुष्णाति सकृच्छ्रं यथास्यात्तथा । अवरुद्ध मुपार्जितं धनं येन । पुण्यपापे । अवसीदति क्लिश्यति । वृक्षधर्म्मः यथा वृक्षान्तर जनकं वीजं प्रसूय नश्यति । तथाऽयमित्यर्थः ॥११।८।२६ (७)

विवेकहेतुत्वं पुनराह लब्ध्वेति । मानुष्यं मनुष्यत्वम् । बहूनां-जन्मनामन्ते यद्यप्यनित्यं तथाप्यर्थदं मोक्षदं मोक्षादन्यस्यानर्थत्वात् । निःश्रेयसाय यतेत । अनुमृत्युः मृत्योः सम्मुखम् । ननु विषयार्थमेव प्रयततां किमन्येन अत्राह विषया इति । सर्व्वतो नरकादावपि सुलभत्वात् अत्र विभावादि (अलङ्कार) विवेक प्राग्वत् । अवधूत यदुम् ।११।८।२८ (८)

पिङ्गला।

सन्तं समीपे रमणं रतिप्रदं
वित्तप्रदं नित्य मिमं विहाय।
अकामदं दुःख भयाधि शोक-
मोहप्रदं तुच्छ महं भजेऽन्या ॥९॥
अहो मयात्मा परितापितो वृथा,
साङ्केत्य वृत्त्याति विगर्ह्य वार्त्तया।
स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात्,
क्रीतेन वृत्तं रतिमात्मनेच्छता ॥१०॥

सन्तमिति। अहमन्या इममात्मानं विहाय। अन्यं रमणं भजामि। सेव्यासेव्यत्व द्योतनाय द्वयोर्विशेषणानि। वित्तं विचारः "विद् विचारणे" *(२) इत्यस्य भावे निष्ठायां रूपम्। 'नुद विदेति' वा णत्वम्। मोहः भोगासङ्गादिविवेकाभावः अत्र मेवाह अहो इत्यादि। चित्तम् पिङ्गला ॥११।८।३१ (९)

अहो इति। धर्म्मेण अति विगर्ह्यया वार्त्तया जीविकया दुर्लभस्य वस्तुनः प्राप्तौ सुखं भवति तदपि नास्तीत्याह। स्त्रैणादिति। स्त्रीणां वश्यान्नरान्न तु देवादित्यर्थः। न च वित्तमयी-अर्थेति। अर्थतृष्णायुक्तात् कृपणादित्यर्थः। न चैवं विधेनापि सह सदैव सम्भोगोऽस्तीत्याह। अनुशोच्यादिति। मृत्युग्रस्तादित्यर्थः।

---

(२) पाणिणीय गणपाठे। धातु प्रदीपसारश्च,—
वेत्तिरूपं विज्ञाने वित्ते विंद विचारणे।
विद्यते विदसत्तायां लाभे विन्दति विन्दते ॥

यदस्थिभिर्निर्मित वंश वंश्य-
स्थूणं त्वचारोम नखैः पिनद्धम् ।
क्षरन्नवद्वार मगारमेतद्-
विन्मूत्रपूर्णं मदुपैतिकान्या ॥११॥

मुचुकुन्दः ।

विमोहितोऽयं जन ईशमायया,
तदीययात्वां न भजत्यनर्थदृक् ।
सुखाय दुःख प्रभवेषु सज्जते,
गृहेषु योषित् पुरुषश्च वञ्चितः ॥१२॥
लब्ध्वा जनो दुर्लभमत्र मानुषम्,
कथञ्चिदव्यङ्गमयत्नतोऽनघ ।

क्रीतेन विक्रीतेन आत्मना देहेनरतिं वित्तञ्चेच्छति। याऽहं त्वयेत्यर्थः ॥११।८।३३ (१०)

यदिति। यत्र विवेकात् पूर्वं वसुबुद्धिः तस्यैव विचार्यमाणत्वे वोभसतेत्याह यदित्यादि। एतदागारं गृहंमदन्या का उपैति न कापीत्यर्थः। एतत् किं यद् यदित्यादि। वंशा वेणवः वंश्यं तदाधारभूतं काष्ठं स्थूणाः स्तम्भाः। पिनद्धं बद्धम्। क्षरन्ति नवद्वाराणि यस्मिन् तत्। पिङ्गला स्वात्मानम् ॥११।८।३३ (११)

विमोहित इति। जनो योषित् पुरुषश्च निर्विवेकोजनः तदीययामायया विमोहितो वञ्चितश्च विमोहितत्वादुचिते न प्रवर्त्तते। वञ्चितत्वादनुचिते प्रवर्त्तते च पदद्वयेनाह। अनर्थं प्रपञ्चेदृग् यस्य स तथा। दुःखस्य प्रभवो जन्म येषु तेषु ॥१०।५१।४५ (१२)

NATIONAL ARCHIVES OF INDIA

पादारविन्दं न भजत्यसन्मति-
र्गृहान्धकूपे पतितो यथा पशुः ॥१३॥
ममैषकालोऽजित निष्फलोगता-
राज्यश्रियोन्नद्धमदस्य भूपतेः ।
मर्त्यात्मबुद्धेः सुतदार कोशभु-
ष्वासज्जमानस्य दुरन्तचिन्तया ॥१४॥
कलेवरेऽस्मिन् घटकुड्य सन्निभे,
निरूढ़मानो नरदेवदूत्यहम् ।
वृतोरथेभाश्व पदात्यनीकपैः-
र्गांपर्य्यटं स्त्वागणयन् सु दुर्म्मदः ॥१५॥
प्रमत्तमुच्चैरिति कृत्य चिन्तया-
प्रवृद्धलोभं विषयेषु लालसम् ।

विमोहितत्वमेव पुनः प्रपञ्चयति लब्धेति। कथञ्चित् कुतश्चित पुण्यादृष्टं अविकलं असति विषये मतिर्यस्य अहमपि तथेति द्वाभ्यामाह ॥१०।५१।४६ (१३)

ममेति। उन्नद्ध उत्कटः मदोगर्वः मर्त्ये देहे आत्मबुद्धिर्यस्य। कोशोऽर्थसञ्चयः। चिन्तया आसज्जमानस्यासङ्गंप्राप्यमानस्य ॥ १०।५१।४७ (१४)

कलेवर इति। अहमिति नरदेव इति च निरूढ़ाभिमानो गां भुवं पर्य्यटन् त्वा त्वां अगणयत् दुर्म्मदोस्मीत्यर्थः दुर्म्मदानाञ्च कामभयं द्वाभ्यामाह ॥१०।५१।४८ (१५)

NATIONAL ARCHIVES OF INDIA

त्वमप्रमत्त सहसाभिपद्यसे,
क्षुल्लेलिहानोऽहि रिवाखुमन्तकः ॥१६॥
पुरा रथैर्हेम परिष्कृतै श्चरण्,
मतङ्गजैर्वानरदेव संज्ञितः ।
सएव कालेन दुरत्ययेन ते,
कलेवरोविट् कृमि भस्म संज्ञितः ॥१७॥
निर्जित्य दिक्चक्रमभूतविग्रहा-
वरासनस्थः समराजवन्दितः ।
गृहेषु मैथुन्य सुखेषु योषिताम्
क्रीड़ामृगः पुरुष ईशानीयते ॥१८॥
करोति कर्म्माणि तपः सुनिष्ठितो-
निवृत्तभोगस्तदपेक्षयाददत् ।

प्रमत्तेति इदं क्षुल्लेदं करिष्यामीति चिन्तया प्रमादिनं उच्चैरत्यर्थं लालसं कामिनं सावधानत्वं सहसा वेगेन । क्षुधालेलिहानः सूक्ष्मभागम् अभिपद्यसे प्राप्नोसि ॥ १०।५१।४८ (१६)

परिष्कृतैर्भूषितैः । मतङ्गजा हस्तिनः । त्वया कालेन खादि भक्षिते विट्संज्ञा दग्धे भस्म संज्ञा, संज्ञित इति "नारकादित्वा" दितच् वा ॥१०।५१।५० (१७)

मनुष्यत्वेऽपि स्त्रीप्रसङ्गः क्षाप्यधर्म्मानुष्ठानं वा जुगुप्सितमित्याह निर्जित्यदिगितिद्वाभ्याम् । मैथुन्यं मिथुनस्य कर्म्म । नीयते नितरां द्रयते प्राप्यत इत्यर्थः ॥१०।५१।५१ (१८)

पुनश्च भूयास महं खराडिति,
प्रवृद्धतर्षो न सुखाय कल्पते ॥१९॥

जरासन्धबद्धराजान: ।

त एव कृष्णाद्य गभीर रंहसा,
दुरन्तवीर्य्येण विचालिता:श्रिय: ।
कालेनतन्वा भवतोऽनुकम्पया,
विनष्टदर्पा स्वरणौ स्मरामि ते ॥२०॥
अथो न राज्यं मृगतृष्णिरूपितम्,
देहेन शश्वत् पतता रुजां भुवा ।

करोतीति । तप: सुनिष्ठितो निष्टां प्राप्त: । तदपेक्षया विना भोगापेक्षया निवृत्तभोगोदर्दं दानञ्च करोति । पुनर्जन्मान्तरे महान् खराट् भूयासम् भवेयमिति । प्रवृद्धाभिलाषो न सुखाय कल्पते । मुचुकुन्द: श्रीकृष्णम् ॥१०।५१।५२। (१९)

एवं वीभत्सरूपेण भक्तिरसमनुभवतो भगवत् स्मृति रन्यास्मृतिश्च स्यादिति क्रमाद्वाभ्यामाह । तएवेति । हे श्रीकृष्ण ! ये प्रागैश्वर्य्य मदान्धा अभूम त एव वयं अद्य ते चरणौ स्मराम: । यतो विनष्ट दर्पा स्तदेव कुतो यतस्तवतन्वा कालेन श्रिय: सकाशाद् विचालिता: ॥१०।७३।१३ (२०)

अथ इति । अथस्त्वच्चरणस्मरणानन्तरं मृगतृषा मरीचिकया निरूपितं व्याख्यातम् । तत्तुल्यमित्यर्थ: । रुजां रोगाणां भुवा

उपासितव्यं स्पृहयामहे विभो !
क्रियाफलं प्रेत्य च कर्णरोचनम् ॥२१॥

इति श्रीवोपदेवशास्त्रते मुक्ताफले विष्णुभक्तानां
वीभत्सरसो नाम षोड़शोऽध्यायः ॥

आश्रयेण अनेन भोज्यभोजकयोरत्यन्तिकत्वमुक्तम् । उपासितव्यं न स्पृहयामहे । सेव्य बुद्ध्या न यष्टुमीम इत्यर्थः । यच्च प्रेत्य परलोकं क्रियाया ज्योतिष्टोमादेः फलम् तदपि न स्पृहयामहे । यत स्तत्कर्णरोचनं केवलं श्रवणमात्रेण प्रीतिजनकं न तु भोगत्वेन । अविशुद्धिः क्षयादिदोष (१) दुषितत्वादितिभावः राजानः श्रीकृष्णम् ॥१०।७३।१४ (२१)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां
वीभत्सरसो नाम षोड़शोऽध्यायः ॥

---

(१) "दुष्टवस्तुसंसर्गः सम्बन्धिसंसर्गः" "स्यादिति पद्मशिखाचार्यश्चरकव्याख्याः सङ्करः सम्बन्धिसंसर्गः समवायसंसर्गः ।" श्रीमद्दर्शनम्, १—१३।— ११

सप्तदशोऽध्यायः ।



शान्तरसे नारदः ।

तत्रान्वहं कृष्ण कथाः प्रगायता-
मनुग्रहेणाश्रृणवं मनोहराः ।
ताः श्रद्दधा मेऽनुपदं विशृण्वतः,
प्रियश्रवस्यङ्ग ममाभवद्रतिः ॥१॥
तस्मिंस्तदालब्ध रुचेर्महामते !
प्रियश्रवस्यस्खलिता मतिर्मम ।

अथ वैराग्य संसार भोगता तत्त्वज्ञान वीतराग परिशीलन परमेश्वरानुग्रह तपोवन विविक्त सेवादि विभावं यम नियमाध्यात्मशास्त्र चिन्तन सर्वभूत समत्व दर्शन परार्थकारित्वाद्यनुभावं धृति स्मृतिमति निर्वेद हर्षादि व्यभिचारिणं शमस्थायिभावं शान्तिरसमारभते । शान्तेति । तत्रेत्यादि । तत्र मुनि समीपे अशृणवं श्रुतवानहम् अनुपदं पदे पदे । पदार्थोऽपि न तिरोहित इत्यर्थः । प्रियश्रवसि श्रीकृष्णेरतिर्भक्तिः । अत्रयामेरतिर्ममेत्यकृत्रिमतार्थम् । अङ्ग अहो व्यासः ॥१।५।२६ (१)

यद्ग्राह मेतत् सदसत् स्वमायया,
पश्येममयि ब्रह्मणि कल्पितं परे ॥२॥
इत्थं शरत् प्राहृषिकाहृतू हरे
र्विशृन्वतोमेऽनुसवं यशोऽमलम् ।

ननु किंरत्येतिचेत्तत्राह । तस्मिन्निति । तस्मिन् श्रीकृष्णे प्रियश्रवसि अस्खलितामतिः निःसंशयं ज्ञानं यतैवरतिस्तत्रैवमति रित्यर्थः । ययामत्या सदसत् स्थूल सूक्ष्मम् रूपद्वयं मयैव मायया मय्येव ब्रह्मरूपे कल्पितम् आरोपितम् रज्जुभुजङ्गवत् (१) । पश्ये अद्यापि पश्यामि । एतदिदमिति पदद्वयेन यथाऽन्यत्र सत्यो भुजङ्गो रज्ज्वामारोपितः न तथा अत्रत्र सत्यं रूप (मिदं) द्वयं ब्रह्मण्यारोपितम् । किन्त्विदमिदमेव इत्युक्तम् । अनिर्व्वाच्यमित्यर्थः ॥१।५।२७ (२)

महानुभाव प्रसङ्गादचिरेनैव तत्त्वज्ञानमुत्पद्यते इत्याह इत्थमिति इत्थं अनुसवं अवसरविसरे किम्भूता भक्तिः आत्मनोऽज्ञाःकरणस्य रजस्तमसी अपहन्तीति । तया शुद्ध सत्त्वात्मिकेत्यर्थः । सात्त्वानस्यैव पराकाष्टा । "यस्यामभ्युदितायां प्रत्यूदितख्याति रेवं मन्यते प्राप्तं मे प्रापणीयं क्षीणाः क्षेतव्याः क्लेशा इति (२) । (क्लिन्नः क्लिष्टोवाभवसंक्रमो यस्याभविच्छेदाज्जनित्वा म्रियते" मृत्वाच पुनर्जायत इति) अत्रच "ते मयैवेताखिल चापत्ति" (३) इति पूर्वश्लोकेन सङ्गत

---

(१) ब्रह्मातिरिक्त वस्तुनोऽयाथार्थ्यात् मायातु ब्रह्मण्येव । रज्जुरिति यथा रज्ज्वामयं सर्पइति ज्ञानं नायं सर्प इति ज्ञानेनोत्तर कालीनेन बाधकेन बाध्यत्व पूर्वज्ञानस्यारोपित्वं वदन् इति ।

(२) यातज्जलदर्शन-भाष्यम् ।२।११।२२।१३ सूत्रम् ।

(३) भागवतम् ।१।५।२४ श्लोकः ।

संकीर्त्यमानं मुनिभिर्महात्मभि-
र्भक्तिः प्रवृत्तात्मरजस्तमोपहा ॥२॥

चापल त्यागादात्मा शमःस्थायी उक्तः। मुक्त (क्ति) सङ्गः अद्वा कथा श्रवणश्चेतुरद्दीपन विभावाः भगवानालम्बनम्। सर्वत्रामैक्य कथन मनुभावः। अस्खलिता मतिर्व्यभिचारी। एवमेव विभावानुभाव-व्यभिचारिसम्प्रयोगाद्रसः शान्तो निष्पद्यते। न च शमस्य सर्व्व चित्तवृत्त्युपरमात्मकत्वेन रत्याद्यभावरूपत्वाद्भावत्वं विप्रतिषिद्ध मिति शङ्क्यम् प्रशान्तवाहिताख्यवृत्तिसद्भावेन भावत्वोपपत्तेः। प्रशान्तमेव हि चित्तं तत्तत्कारणवशाद्रति हासादिपरिणाम मनु भवतीति रत्यादीनां मूलभूतत्वादस्य नानाभाव रूपत्वम् न हि शक्यं वक्तुम्। घटाभावो मृत्तिका पटाभावस्तन्तव इति। निरतिशया-नन्दहेतुत्वेन चास्य रसेषु श्रेष्ठत्वम्। यदाहुः "यच्चकाम सुखं लोके यच्च दिव्यं महत् सुखम्। तृष्णाक्षय सुखस्यैते नार्हतः षोड़शीं कलाम् (१) इति। (२) ननु "एतेचाष्टौ रसाः प्रोक्ता दुहित्रेन महात्मना" इति वदतोभरतस्य शृङ्गारादावष्टरसकेरसत्वमभिप्रेतम। तत्वञ्चिन्त्यते तत्कथमुच्यते। सत्यं किन्तु नाट्यविषयेऽष्टानामेव रसत्वं नान्य-स्येति तस्याभिप्रायः। अतएव (३) "अष्टौ नाट्यरसाःस्मृताः" इति तेनैवोक्तम्। सर्व्वस्यैव शान्तापलाप इति तु तद्व्याख्याने "तृष्यन्ति तृष्णाः कामे मोक्षेचापिविरागिणः (४)। धर्म्माधर्म्म प्रवृत्तानां कामः कामोपसेविनाम्" इत्यादि तत्रैव वचनं विरुध्येत।

---

(१) ब्रह्मार्थं चिन्तामणिः।

(२) भरतमुनेर्नाट्य सूत्रम्।

(३) " "

(४) नाट्यसूत्र व्याख्यानेऽभिनवगुप्त पादाचार्य कृते।

कपिलः ।

सतां प्रसङ्गान् मम वीर्य्य संविदो
भवन्तिहृत्कर्ण रसायनाः कथाः ।

अतएवाभिनवगुप्तपादैर्महतासंत्रमेण प्रतिष्ठापितः । महाभारतादौ चास्यैव साम्राज्यम् । (१) ननु तथाप्यस्य विषय जगुप्सारूपत्वात् वीभत्सस्यान्तर्भावोयुक्तो । इतिचेन्न । इहजगुप्सायाः सञ्चारित्वेनावस्थापितत्वात् । पर्य्यन्तनिर्व्याढे तस्य मूलतएव विच्छेदात् । यत्तु वीभत्सो नो विरम्यते । तत्र वीभत्सएव यथा "लालं वक्त्रासवंवेत्ति मांसपिण्डोयमीश्वरो । मांसास्थिपिण्डेजघने जनः कामज्वातुरः ।" तथा उत्तानोच्छून मण्डूक पाटितोदर सन्निभे । क्वेदिनि स्त्रोत्रयेसक्तिरक्तमेः कस्य जायत इति । नाप्यस्य धर्म्मवीरोऽन्तर्भावः । तस्याभिमानमयत्वेन व्यवस्थानात् । अस्य चाहङ्कार प्रशमैकरूपत्वात् । तथापितयोरेकत्वं परिकल्पने वीररौद्रयोरपि तथात्व प्रसङ्गः धर्म्मवीरादीनां चित्तवृत्ति विशेषानां सर्वाकाराणां अहङ्कार रहितत्वे शान्तरसभेदत्वमिति व्यवस्थाप्यमाने न कश्चिद्विरोधः । तस्माद्दीभत्सादिभ्यः पृथग्भूत शमस्थायिभाव उत्तम प्रकृतिरहङ्कार शैथिल्यात्मकोऽस्तु शान्तनामारस इत्यनिच्छताऽप्यवश्यमभ्युपेतव्यम् । नारदोव्यासम् ॥१।५।२८। (३)

सतामित्यादि । वीर्य्यं महिमानं सम्यग्वेदयतीति वीर्य्यसम्विदः "वान्तिपर्णशषोवाता" इति वदन्तर्भावितनिजर्थोऽत्रविदि रसायना अमृतोभूताः । तज्जोषणात् कथाश्रवणात् अपवर्गस्य मोक्षस्य वर्त्मनि मार्गे मयिसाकारे प्रथमं श्रद्धा प्रसन्नचित्तम् । ततोरति-

---

(१) भरतमुनेर्नाट्य सूत्रव्याख्याता अभिनवगुप्तपादाचार्यः, तेन तदलाभि ।
केषाञ्चिन्मते नाट्यसूत्र प्रणेता दुष्मन्तराजतनय भरत एव ।
नैव भरतमुनिरन्यः ।

तज्जोषणादाश्वपवर्ग वर्त्मनि
श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥४॥
भक्त्यापुमान् जात विराग ऐन्द्रियाद्
दृष्टश्रुतान्मद्रचनानुचिन्तया।
चित्तस्य यत्तो ग्रहणे योगयुक्तो-
यतिष्यते ऋजुभिर्योग मार्गैः ॥५॥
पुंसां किलैकान्तधियां स्वकानां
याःसम्पदो दिविभूमौ रसायाम्।
नराति यद्वेश (ष) उद्वेग आधि-
मंदःकलिर्यसनं सम्भयासः ॥६॥

रासक्तिः। ततोभक्तिःपरमप्रेमात्मिका। यज्ञाभेन ब्रह्मादिपदान्यपि तृणायमन्यत इत्यनुक्रमः ॥३।२५।२५ (४)

तदेवाह। भक्त्येत्यादि। ऐन्द्रियं इन्द्रियजन्यं सुखम्। दृष्टं ऐहिकं श्रुतंपारलौकिकं। ममरचनायाःसर्गविसर्गादेः अनुचिन्ता यस्यां भक्तौ। ऋजुभिर्योगमार्गैर्यमादिभिश्चित्तस्य वशीकरणे यत्तः सावधानः सन् यतिष्यते। ततो योगयुक्तः समाधिसम्पन्नोभवतीत्यर्थः। कपिलो देवहूतिम् ॥३।२५।२६ (५)

पुंसामित्यादि एकस्मिन्नीश्वरेऽन्तोबन्धनं यस्याः साधीर्येषां ते तथा। (१) इतिबन्धने इतिभुवादौ। भगवन्निष्ठानामित्यर्थः। रसाः पातालास्तेषां नराति न ददाति। यत्र यासु सम्पत्सु सम्भयोगर्वः कलिर्लेश्वर्यावलेपादन्येषामनादरः। उद्वेग-

---

(१) पाणिनीये धातुपाठे सान्तवर्गो दृश्यः (अन्तोबन्धे)

त्रैवर्गिकायासविघातमस्मात्
पतिर्विधत्ते पुरुषस्य शक्र ।
ततोऽनुमेयो भगवत् प्रसादो
योदुर्लभोऽकिञ्चन गोचरोऽन्यैः ॥७॥
अहं हरे तव पादैकमूल-
दासानुदासो भवितास्मि भूयः ।
मनः स्मरेतासुपतेर्गुणानां-
गृणीत वाक् कर्म्म करोतु कायः ॥८॥

श्चिन्ताऽनवस्थितिः । आधिश्चिन्ता (१) मदोऽहङ्कारः । कलिर्विरोधः । व्यसनं चित्तस्यतत्परत्वम् संप्रयासः सम्यक् क्लेशः ॥६।१।२२ (६)

तदेवाह । त्रैवर्गिकेति । त्रिवर्गः प्रयोजनं यस्यायासस्य । तस्य विधानं । अक्षत्यतिर्विष्णुः हे शक्र ततोविघातात् । अन्यैर्दुर्नाद्यासक्तैः ॥६।११।२३। (७)

तस्मात्स्मयादिदुष्टत्वात् सम्यदस्त्यक्ता भगवदाश्रयमभ्यर्थय इत्याह अहमित्यादि । तवपादएकोमूलमाश्रयो येषां दासानामनुदासो भवितास्मि भविष्यामि । भूयः पुनः प्राक् एकवारं चित्रकेतुत्वेन भूतत्वात् । असुपतेः प्राणाधिष्ठातुः । कर्म्म तदृग्रह मार्ज्जनादि । आद्या कर्म्मणि षष्ठी । अन्या सम्बन्धे ॥६।११।२४ (८)

---

(१) 'आधिर्व्यसन'मिति मेदिनी आधिर्मानसी व्यथा इत्यमरः ।

न नाक पृष्ठं नच पारमेष्ठ्यम्,
नसार्व्वभौमं न रसाधिपत्यम्।
न योगसिद्धिरपुनर्भवं वा,
समञ्जसत्वाविरहय्यकाङ्क्षे ॥९॥
अजातपक्षाइव मातरं खगाः
स्तन्यं यथा वत्सतराःक्षुधार्त्ताः।
प्रियं प्रियेव व्युषितं विषन्ना-
मनोऽरविन्दाक्षदिदृक्षते त्वाम् ॥१०॥

ननु किंमदाख्येन स्वाराज्यादिष्वन्यतमोब्रीयतामिति चेत्तत्राह। ननाकेति। नाकपृष्ठं ऐन्द्रं स्थानम्। सार्व्वभौमं सर्वस्याभूमेरीश्वरत्वं। पारमेष्ठं ब्राह्मं पदम्। योगसिद्धिरणिमाद्याः। अपुनर्भवोमोक्षः। समञ्जसत्वमिति हेतुगर्भंविशेषणम्। व्युत्क्रमनिर्देशोऽपि अर्थक्रमस्य बलीयस्त्वात् सार्व्वभौम-नाकपृष्ठ-पाताल परमैश्वर्य्य योगसिद्धि पारमेष्ठ्या पुनर्भवेषूत्तरोत्तर प्रकर्षो विवक्षितः। अत्र च नाकपृष्ठादीनां पञ्चानां कालकलितत्वेन मोक्षस्य च नित्यत्वेन निरतिशय सुखैकरूपत्वेन तदनुभवाभावात्। असमञ्जसतयाऽनाकाङ्क्षत्वम्। त्वां काङ्क्षदित्युक्तम्॥ ६।११।२५ (९)

तदेव प्रपञ्चयति। अजातेति। व्युषितं दीर्घप्रवासिनम्। अजातपक्षादिभिस्त्रिभिरुपमानैर्यथोत्तरम् ज्ञानप्रकर्षात् सुषुप्ताद्यवस्थात्रयं क्रमात्सूचितम्। ततश्चावस्थात्रयेऽपि तां मनोदिदृक्षत इत्यर्थः। यद्वोपमात्रयेण क्रमादुत्कण्ठया मन्द-मध्य-मोत्तमरूपावस्थात्रयमुक्तम् ॥६।११।२६ (१०)

ममात्तमःश्लोकजनेषु सौख्यं-
संसारचक्रे भ्रमतः स्वकर्म्मभिः ।
त्वन्मायया त्मात्मज दारगेहे-
ष्वासक्तचित्तस्य न नाथ भूयात् ॥११॥

अक्रूरः ।

किं मया चरितं भद्रं किं तप्तं परमंतपः ।
किंवाथाप्यर्हते दत्तं यद्भ्रात्म्यद्य क्षेशवम् ॥१२॥
ममेतद् दुर्लभं मन्ये उत्तमः, श्लोक दर्शनम् ।
विषयात्मनो यथा ब्रह्म कीर्त्तनं शूद्रजन्मनः ॥१३॥
मैवं ममाधमस्यापि स्यादेवाच्युत दर्शनम् ।
क्रियमाणः कालनद्या क्वचित्तरति कश्चनः ॥१४॥
ममाद्यामङ्गलं नष्टं फलवांश्चैव मेभवः ।
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रि पङ्कजम्॥१५॥

ननु प्राचीनकर्म्मक्षपणार्थं त्वया तत्रैव स्थेयं कुतोमद्दर्शनमिति चेत् तथापि संसृतौ भ्रमता मयापि किञ्चिदभ्यर्थ्यमस्ति इत्याह । ममेति । हे उत्तमःश्लोक आत्मजादिष्वासक्तचित्तेषुजनेषु मे सख्यं न भूयात् । आत्मा देहः त्वचो हरिम् ॥६।११।२६ (११)

किमित्यादि । अर्हते सत्पात्राय ॥१०।३८।३ (१२)

ममेति । आत्मामनः । ब्रह्म वेदः १०।३८।४ (१३)

अथवा दुर्लभमिति मैवेति ॥१०।३८।५ (१४)

मैवम् । किन्तु सुलभम् ॥१०।३८।६ (१५)

कंसोवतादाकृत मेऽत्यनुग्रहम्,
द्रक्ष्यै ऽङ्घ्रि पद्मं प्रहितोऽमुनाहरेः।
कृतावतारस्य दुरत्ययं तमः,
पूर्व्वे ऽतरन्यन्नखमण्डलत्विषा ॥१६॥
यदर्च्चितं ब्रह्मभवादिभिःसुरैः,
श्रियाच देव्या मुनिभिः स सात्वतैः।
गोचारणायानुचरैश्चरद्वने-
यद्गोपिकानां कुच कुङ्कुमाङ्कितम् ॥१७॥

•ममेति कंस इति भवोजन्म। वतेति विस्मये। अमुना कंसेन प्रहितः प्रस्थापितः। ननु किमङ्घ्रिपद्मे दृष्टेऽपि तत्राह। • दुरत्यय-मिति। पूर्व्वे सनन्दनादि योगिनः यस्याङ्घ्रि पद्मस्य हृत्पद्म कर्णि-कायामर्पितस्य त्विषा तमः पञ्चपर्व्वाविद्यां (१) अतरन् तीर्णवन्तः नचेदमङ्घ्रि यद्मं मुक्तिमात्रफलम्। किन्तुचतुवर्गमप्रिप्रसूते इत्यभि-प्रेत्याह ॥१०।२८।७ (१६)

यदिति। यदङ्घ्रि पद्ममनुचरैर्गोपैःसह ब्रह्मादिभिरर्च्चितम्। नैजैश्वर्य्यनिर्व्वाहायेत्यर्थःसिद्धिरुक्ता। श्रियेति। कामस्य मुनिभिरिति मुक्तेः सात्वतैरिति धर्म्मस्य सत्सत्त्वं विद्यते यस्मिन् ससत्त्वानुविष्णुः। सभक्तिभिर्भजनीयो येषान्ते तथा दैवाद्वा इत्यर्थः। गोचारणायेति त्रिभिर्विशेषणैः पशुपामर (स्त्रिया) स्त्र्यादिष्वपि सानुग्रहत्वात् सुप्रसन्नत्वमुक्तम् ॥१०।२८।८ (१७)

---

(१) "अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः"। योगदर्शनं २।३ सूत्रम्।
यदाह भगवान्कर्षगणिः—अविद्या पञ्चपर्व्वैषा प्रादुर्भूता महात्मनः।
इति भामती योगवार्त्तिकयोः।

NATIONAL ARCHIVES OF INDIA

द्रक्ष्यामि नूनं सुकपोल नासिकम्,
स्मितावलोकारुण कञ्जलोचनम् ।
मुखं मुकुन्दस्यगुड़ालकावृतम्,
प्रदक्षिणं मे प्रचरन्तिवैमृगाः ॥१८॥
अथवा विष्णोर्मनुजत्वमीयुषो-
भारावताराय भुवोनिजेच्छया ।
लावण्य धाम्नो भवितोपलम्भनम्,
मच्चंननस्यात्फलमञ्जसादृशः ॥१९॥

द्रक्ष्यामीति। स्मित-युक्त अवलोको यस्मिन् तथा अरुणिकञ्जवत् पद्मवत्लोचने यस्मिन्। पश्चादनयोः कर्मधारयः। कञ्जं पद्मम्। गुड़ावक्रा अलकाश्चूर्णकेशाः तै वक्रकेशैरावृत मित्यर्थः। कुतोनूनं तद्रक्ष्यसि तत्राह। प्रदक्षिणमिति। वै यस्माद् मृगा इत्यत्र-विशेषोक्तावप्ययुग्मसंख्या गौराश्चेति न्ने यम्। तथाचोक्तम् शाकुन-तन्त्रे (१) "पुरो नगत्यागमयोरयुग्मा: प्रदक्षिणं गौरमृगाः प्रयान्ति। समान शस्ता न च वाम याता: कृष्णो र्विमिश्रा न भवन्ति दुष्टाः" इति ॥१०।२८।९ (१८)

अथवेति अपि अहो ईयुषः प्राप्तस्य भविता भविष्यति। उप-लम्भनं दर्शनम्। तेन च मच्चं मम दृशः दृष्टेः फलं नस्यादिति। न किन्तु हो नञौ प्रकृतमर्थं सातिशयं गमयतः स्यादेवेत्यर्थः ॥१०।३८।१० (१९)

---

(१) शाकुन तन्त्रे यात्राकाले अङ्गस्पन्दनादीशुभाशुभ निर्णायक ग्रन्थः।
शाकुन दीपिका, वसन्तराजशाकुनम् पद्मपत्रीत्यादि। अन्यशाकुनतन्त्र, अन्यत्र
इतसंहितायां छान्दोग्य ६ ३।४। ४६।७२।७३ अः।

यईक्षिताहं रहितोऽप्यसत् सतोः-
स्वतेजसापास्त तमोभिदाभ्रमः।
स्वमाययात्मन् रचितैस्तदीक्षया,
प्राणाक्षधीभिः सदनेष्वभीयते ॥२०॥

कोऽसौ विष्णुरितिचेत्तत्राह य इति। यः सदनेषु क्षेत्रेषु अभीयते क्षेत्रतया प्रतीयते। किम्भूतेषु क्षेत्रेषु प्राणाक्षधीभिर्विशिष्टेष्वित्यर्थः। प्रान्ति पुरयति सर्वमिति प्राणः। स्थूल सूक्ष्माणि दशभूतानि प्रातेर्णद्यादि लु प्रत्ययेरूपम्। अक्षाणि दशेन्द्रियाणि धियश्चत्वार्यन्तःकरणानि च चतुर्विंशतितत्त्वरूपेष्वित्यर्थः। तत् किं एतान्यथात्मन्नित्यानि ..... नेत्याह। आत्मनिति। अधिष्ठाने। रचितैः रचिताभिरित्यर्थः। नन्वद्वितीयत्वादसहायस्य कुतः कर्तृत्वं तत्राह स्वेति। स्वशक्ति मायाद्वारेण रचितैरित्यर्थः। तथापि मायायाजड़त्वान्नोकर्तृत्वमितिचेत्तत्राह। तदीक्षयेति "स (तद्) ऐक्षतबहुस्यां प्रजायेये" त्यादि श्रुतिप्रसिद्धेक्षादर्शनं यस्यां मायायां सा तथा। अयमर्थः। अचेतनापि माया चैतन्यच्छाया पतितमात्राद्यापिपर्त्ति। अयस्कान्तमणिसन्निधानादिवलोहम्। मायासम्बन्धानन्तरभावीदमुक्तम्। ततः प्राग्भावेरूपमाह। असत्सतोः कार्य्यकारणयोः। ईक्षिता द्रष्टा। अहं रहितोऽपि इदमहं पश्यामीत्यभिमानहीनोऽपि अहंकाररहित्ये हेतुमाह। स्वतेजसेति। स्वेन तेजसाचित् प्रकाशेन अपास्तं दूरीकृतं तमोऽज्ञानं भिदातत्कार्य्यं विपर्ययो वा भ्रमः। तत् संस्कारः संशयोवा येन सतथा। अज्ञानादि संसर्गशून्य इत्यर्थः ॥१०।३८।११ (२०)

NATIONAL ARCHIVES OF INDIA

यस्याखिलामीवहभिःसुमङ्गलैः,
वाचोविमिश्रा गुणकर्म्म जन्मभिः ।
प्राणन्ति शुम्भन्ति पुनन्ति वै जगत्,
यास्तद्विरक्ताः शवशोभना मताः ॥२१॥
सचावतीर्णःकिल सात्वतान्वये,
स्वसेतुपालामरवर्य्यशर्म्मकृत् ।
यशोवितन्वन् व्रज आस्तुईश्वरो-
गायन्तिदेवा यदशेषमङ्गलम् ॥२२॥
तन्त्वद्यनूनं महतां गतिं गुरुम्,
त्रैलोक्यकान्तं दृशिमन्महोत्सवम् ।
रूपं दधानं श्रियमौप्सितास्पदम्,
द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥२३॥

यस्येति । अमीवं पापं घ्नन्तीत्यमीवहानि तैः प्राणन्ति जीवयन्ति शुम्भन्ति शोभयन्ति । अन्तर्भावितनिजर्थात्तत्र प्राणि शुम्भती ... तद्विरक्ताः विष्णुगुणादिहीनाः । शवशोभनाः शवालङ्करणानि ॥१०।३८।१२ (२१)

स इति । स विष्णुः । सात्वतान्वये यदुवंशे किल प्रसिद्धौ यद् यशः अशेषाणि मङ्गलानि यस्मिन् यशसि ॥१०।३८।१३ (२२)

तमिति । गुरुमुपदेष्टारम् । गतिं प्राप्यम् । दृशिमतांविशाल-दृष्टीनाम् । महानुत्सवोयस्माद्रूपात् । उषसः प्रातःकालस्य मध्यन्दिनः सुप्रशस्तदर्शनाः दध्याज्यदूर्व्वादयः । उषसि मयैते दृष्टा इत्यर्थः ॥१०।३८।१४ (२३)

NATIONAL ARCHIVES OF INDIA

अथावरूढः सपदीशयोरथात्,
प्रधान पुंसोश्चरणं स्वलब्धये।
धियाधृतं योगिभिरप्यहंधुवम्,
नमस्य आभ्याञ्च सखीन् वनौकसः ॥२४॥
अथाङ्घ्रिमूले पतितस्य मेविभुः,
शिरस्यधास्यन्निजहस्त पङ्कजम्।
दत्ताभयं काल भुजङ्गरंहसा,
प्रोद्वेजितानां शरणैषिणां नृणाम् ॥२५॥
समर्हणं यत्र निधाय कौशिक-
स्तथाबलिभ्याप जगत्त्रयेन्द्रताम्।
यद्दाविहारे व्रजयोषितांश्रमम्,
स्पर्शेनसौगन्धिक गन्धयापानुदत् ॥२६॥

अथेति। अथ दर्शनानन्तरम्। ईशो रामकृष्णो, प्रधान पुंसोः प्रकृतिपुरुषयोः स्वलब्धये आत्मप्राप्तये। अभ्यामनयोः ॥ १०।३८।१५ (२४)

अथेति। अधास्यत् धास्यति। किमिति काङ्क्षागम्यते ॥१०।३८। १६(२५)

समिति। यत्र हस्तपङ्कजे। कौशिक इन्द्रः। विहारेराम-क्रीडायां सौगन्धिकंकल्हारं तद्दृगम्बोप्रस्य तत्तया। अपानुदद् अयाचकीत् ॥१०।३८।१७ (२६)

NATIONAL ARCHIVES OF INDIA

न मय्युपैष्यत्यरिबुद्धिमच्युतः
कंसस्य दूतः प्रहितोऽपि विश्वहृक् ।
योऽन्तर्बहिश्चेतस एतदीहितम्,
क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥२७॥
अप्यङ्घ्रिमूलेऽवहितं कृताञ्जलिम्,
मामोक्षिता सस्मितमार्द्रया दृशा ।
सपद्यपध्वस्त समस्तकिल्बिषो-
वोढा मुदंवीतविशङ्क ऊर्ज्जिताम् ॥२८॥
सुहृत्तमं ज्ञाति मनन्य दैवतम्,
दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथमाम् ।
आत्माहितीर्थीक्रियते तदैवमे-
वम्बश्च कर्म्मात्मक उच्छ्वसित्यतः ॥२९॥

नमयोति। उपैष्यत्। उपेष्यति। यद्यपि कंसस्यदूतः प्रहितश्च तेनैवाहम्। यतोविश्वहृक्। तदेवाह योऽण्डरिति एतस्य जनस्येहितं चेष्टाम्। अमलेन चक्षुषा प्रज्ञानदृष्टया ॥१०।३८।१८ (२७)

अपीति। अवहितं अङ्घ्रिमूलं विषयेकृतावधानं ईक्षिष्यते। वोढाहं भविष्यामि। वहे स्त्रोणिरूपम्। नतुलुटि वौढाऽस्मीति हितत्व स्यात् ॥१०।३८।१९ (२८)

सुहृत्तममिति। सुहृत्तममतिमित्रम्। ज्ञातिं सम्बन्धिनम्। अनन्यदैवतं भक्तम्। परिरप्स्यते। आलिङ्गिष्यति। आत्माशरीरम्। तीर्थाक्रियते सर्व्वपावनार्थत्वात्। कर्म्मात्मकोबन्धः पुण्य पापयन्थि उच्छ्वसिति शिथिलोभवति। अतः परिरम्भात् ॥१०।३८।२०, (२९)

NATIONAL ARCHIVES OF INDIA

लब्धाङ्ग सङ्गं प्रणतं कृताञ्जलिं
मां वत्सलतेऽक्रूर ततेत्युरुश्रवाः।
तदावयं जन्मभृतोमहीयसा
नैवाद्दतो यो धिगमुष्यजन्मतत् ॥३०॥
न तस्य कश्चिद्दयितः सुहृत्तमो
न चा प्रियोद्वेष्य उपेक्ष्य एव वा।
तथापि भक्तान् भजते यथा तथा
सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥३१॥
किम्वाग्रजोभावनतंयदुत्तमः
स्मयन् परिष्वज्य गृहीत मञ्जलौ।

लब्धाङ्गेति। हे अक्रूर! हे तात! सञ्जुरुश्रवाः स्फीतकीर्त्तिः ततस्तत्कर्त्तृकं सम्भाषणमपेक्षतेत्यर्थः। जन्मभृतः श्लाघ्यजन्मानः। योहि महीयसा नाद्दतः। तस्यतत्तथाविध मपि जन्म धिक्निन्दित मित्यर्थान्तरन्यासः ॥१०।३८।२१ (३०)

नन्वस्य कुतोमहीयस्त्वम्? मित्रामित्र विकल्पवत्त्वात्। अत-आह। न तस्येति। दयितोनिरुपाधिः स्नेहस्यास्पदं सुहृत्तमः सोपाधिकस्यापिय, अरुचिमात्रस्य द्वेष्यः। अपकारस्यापि उपेक्ष्यः औदासीन्यस्यापि। कथन्तर्हिभक्तेषु वत्सलत्वम् तत्राह। तथेति। यथायथावत् यद्वत्। सुरद्रुम उपाश्रित एवार्थदः। तथातेन प्रकारेणायमित्यर्थः। सेवाकृतं वैषम्यं नतु। सङ्गकृतम् इति प्रागुक्तम् ॥१०।३८।२२ (३१)

गृहं प्रवेश्याप्त समस्त सत्कृतं
सम्पूज्यते कंसकृतं खबन्धुषु ॥३२॥
पदानि तस्याखिल लोकपाल-
किरीटजुष्टामलपादरेणोः ।
ददर्श गोष्ठे क्षिति कौतुकानि-
विलक्षितान्यब्जयवाङ्कुशाद्यैः ॥३३॥
तद्दर्शनाह्लाद विवृद्धसम्भ्रमः
प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः ।
रथादवस्कन्द्य सतेष्वचेष्टत
प्रभोरमून्यङ्घ्रि रजांस्यहो इति ॥३४॥
देहं भृतामियानर्थोहित्वादम्भं भियं शुचम् ।
सन्देशाद् योहरेर्लिङ्ग दर्शन श्रवणादिभिः ॥३५॥

किञ्चेति। अग्रजो बलभद्रः। आप्तं समस्तं सत्कृतं सत्कारो येन तथा (मया) तम् ॥१०।३८।२३ (३२)

एवं मनोरथान् कुर्व्वन् व्रजं प्राप्त इत्याह। पदानीति। तस्य विष्णोः लता लताकारा रेखा ॥१०।३८।२५ (३३)

तदिति। तेषां पदानां दर्शनादाह्लादः। अवस्कन्द्य अवतीर्य्य। सः अक्रूरः तेषु पदेषु ॥१०।३८।२६ (३४)

देहमिति। देहं भृतां देहिनाम्। सन्देशाद् वार्त्ताहरादपि हरिलिङ्गदर्शनश्रवणादिभिरियान् एतावानेवार्थः फलं यत्तेपाद पूतेरजसि विलुण्ठनमित्यर्थः। शुकः ॥१०।३८।२७ (३५)

NATIONAL ARCHIVES OF INDIA

सिद्धाः।

अयं त्वत् कथामृष्ट पीयूष नद्यां
मनो वारणः क्लेशदावाग्नि दग्धः।
तृषार्त्तोऽवगाढोनसंसार दावं
न निष्क्रामति ब्रह्म सम्पन्नवन्नः ॥३६॥

मुचुकुन्दः।

भवापवर्गो रमतो यदा भवे-
ज्जनस्यतर्ह्यच्युत सत् समागमः।
सत् सङ्गमोयर्हि तदैव सद्गतौ-
परावरेशे त्वयिजायते मतिः ॥३७॥
मन्ये ममानुग्रह ईश ते कृतो-
राज्यानुबन्धापगमो यदृच्छया।

सिद्धाः। अयमिति। मृष्टं निर्मलं मन एव वारणोगजः। क्लेशाः अविद्यादयः एव अवगाढोमग्नः। दावं प्राग्जातम्। ब्रह्म सम्पन्नवत् समाधिस्थवत्। सिद्धा भगवन्तम् ॥४।७।३५ (३६)॥

मुचुकुन्दः। एवं शान्तरसरूपेण भक्तिरसमनुभवतः सर्व्वानर्थ निवृत्तिरर्थप्राप्तिश्च स्यादित्याशयवानभ्यर्हितत्वादर्थप्राप्तिमादौ। भवेति। भवापवर्गः संसारनिवृत्तिः। तर्हितदा यर्हियदा परे ब्रह्मादयः। अपरे जीवाः ॥१०।५१।५३ (३७)

अनर्थनिवृत्तिमाह। मन्य इति। ते त्वया अनुबन्धः सम्बन्धः।

NATIONAL ARCHIVES OF INDIA

यः प्रार्थ्यते साधुभिरेकचर्य्यया
वनं विविक्षद्भि रखण्ड भूमिपैः ॥३८॥

इति श्रीवोपदेव कृते मुक्ताफले विष्णुभक्तानां
शान्तरसो नाम सप्तदशोऽध्यायः ॥

यदृच्छया अकस्मात्। विविक्षद्भि वेष्टुमिच्छद्भिः। अखण्डभूमिपैः सार्व्वभौमैः। एकचर्य्यया एकाकित्वेन। मुचुकुन्दः श्रीकृष्णम् ॥१०।५१।५४ (३८)

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां
शान्तरसो नाम सप्तदशोऽध्यायः ॥

NATIONAL ARCHIVES OF INDIA

अष्टादशोऽध्यायः ।

अद्भुतरसे श्रीदामा ।

नूनं ध्रुवं तन्ममदुर्भगस्य
शश्वद्दरिद्रस्य समृद्धि हेतुः ।
महाविभूतेरवलोकतोऽन्यो
नैवोपपद्येत यदुत्तमस्य ॥१॥
नन्वब्रुवाणोदिशते समक्षं
याचिष्णवे मूर्ध्न्यपि भूरिभोजः ।

अथ दिव्यदर्शनेप्सित मनोरथावाप्त्युपबृंहक देवकुलादिगमनसभाविमान माहेन्द्रजालातिशायि शिल्पकर्मादि विभावं नयन विस्तारा निमेषेक्षण रोमाञ्चाश्रु स्वेद साधुवाद दान हाहाकरण वेलाङ्गुलि भ्रमणाद्यनुभावं हर्षावेग जड़तादि सञ्चारिणम् चित्तविस्तारात्मविस्मय-स्थायिभावं अद्भुतरसं प्रस्तौति । अद्भुतेति । श्रीदामेति । नाममूलेऽप्रयुक्तमपि (१) "श्रीदामारङ्गभक्त्यर्थं भूम्यांनीतेन्द्र वैभवम्" इति पद्मपुराणस्य महत्त्वनाम दृष्ट्वेहप्रयुक्तम् । नून मित्यादि । ध्रुवेति विस्मयद्योतकोनिपातः । एतन्नूनं एतत् (किं) यद् यदुत्तमस्यावलोकादन्यो मम समृद्धे हेतुर्नोपपद्येत न घटेतैव । विभूतिरैश्वर्यम् । अन्यस्य समृद्धि-हेतुत्वाभावे कारणमाह । दुर्भगस्येति । "भगोभाग्यम् अतएव दरिद्रः ॥१०।८०।३१ (१)

नन्वेवम्भूतस्येदस्यावलोकस्तर्हिकिमिति विद्याभ्यासमये

---

(१) पद्मपुराणे श्रीविष्णोः सहस्रनामसु ।

NATIONAL ARCHIVES OF INDIA

पर्जन्य वत्तत्खयमीक्षमाणो-
दाशार्हकाणा ऋषभः सखा मे ॥२॥
किञ्चित्करोत्यु र्व्वपि यत् स्वदत्तं
सुहृत् कृतं फल्ग्वपि भूरिकारी ।
मयोपनीतं पृथुकैकमुष्टिं
प्रत्यग्रहीत् प्रीतियुतो महात्मा ॥३॥
तस्यैवमे सौहृदसौख्य मैत्री-
दास्यं पुनर्ज्जन्मनि जन्मनि स्यात् ।

तव सम्यक्षाभूत् इत्यत् आह । नन्विति । भोजवंश्यत्वाद्भोजः (१) श्रीकृष्णः । अभूरि अल्पमपि याचिष्यवे याचमानाय । समर्च्छ-ददामीत्यनुवाणोऽर्थात् परोक्षं भूरि प्रचुरंदिश्यते ददाति । यथा पर्ज्जन्यः स्तोकमप्यर्थितोमहाशयतया भूर्य्येव प्रयच्छति । तथाऽयं यत् याचनं स्वयमेव याचकं प्रतीक्षमाण इत्यर्थः । दाशार्हकाः क्षत्रिय विशेषाः ऋषभः श्रीकृष्णम् ॥१०।८०।३४ (२)

दृष्टान्तव्यंजितां महाशयतां एव पुनराह किञ्चिदिति । अहं वहपि स्वदत्तं किञ्चित्तुच्छं करोति । सुहृद्मम स्वत्कृतं फल्गुपि भूरिकारी भूरिकरिष्यामीत्येवं शीलः । यतो मयोपनीत मानीतं पृथुकानां चिपिटकानां एकमुष्टिं स्वीकृतवान् ॥१०।८०।३५ (३)

यस्मादयमेवंभूतस्तस्मादिदमस्तीत्याह । तस्येति । सौहृदादीनां द्वन्द्वैकम् । सौहृदं परोरसम्बन्धः । सख्यं सहवासः ।

---

(१) भागवतम् १०।२।१८ इत्यस्मिन् श्लोके भोजेन्द्र पदेन कंस एवोद्दिष्टः । तस्यैव तद्देशाधिपतित्वं भोजवंश्यत्वमनुभोयते । अतएव भगवतोऽपि भोजवंश्यत्वं । यदुवंशस्य शाखा-भूतोभोजवंशः । अत्रि स्वात्मत भोज यदुरिति पर्य्यायः ।

महानुभावेन गुणालयेन
विषज्जतस्तत् पुरुषप्रसङ्गः ॥४॥
भक्ताय चित्वा भगवान् हि सम्पदो
राज्यं विभूतीर्नसमर्थयत्यजः।
अदीर्घ बोधाय विचक्षणः स्वयं
पश्यन् निपातं धनिनां मदोद्भवम् ॥५॥

शुकः।

इत्थं सतां ब्रह्म सुखानुभूत्या
दास्यं गतानां परदैवतेन।

मैत्री परस्परोपकार कर्तृत्वम्। गुणालयः प्रधानम्। महानुभावो महदादिकार्य्यरूपः प्रभावोयस्यतेन। विषज्जतः उच्चावच योनिर्गच्छतः। प्रकृतिवश्यात् संसरत इत्यर्थः। तत्पुरुषा वैष्णवाः ॥१०।८०।३६ (४)

ननु भक्तवत्सलत्वे दयं तर्हिस्वयमेव सम्पदः किंभक्तेभ्यो न वितरतीत्यत आह भक्तायेति। सम्पदोगजतुरगादयः। राज्यं राज्ञः कर्म्म नियन्तृत्वादि। पाटवं विभूतिमणिमाद्यैश्वर्य्याणि। न सम्वर्द्धयति। अदीर्घबोधायापक्वज्ञानाय भक्ताय। पक्वज्ञानस्य तु इच्छैव नास्ति। यदृच्छया चागताः सम्पद स्तंनाभिभवितुं क्षमन्ते। स्वयं विचक्षणः प्राज्ञः। सम्पत्सङ्गादेवतत्त्वविमुखो माभूदिति विमर्शवत्त्वात् विचक्षणत्वम्। यत्र (अतएव) वतेति द्योतितोविस्मयः। स्त्रायो मनोषिताऽवाप्तिविभावः। साधुवादोऽनुभावः। सञ्चारिण ऊह्या एव मन्यत्र ॥१०।८०।३७। (५)

मायाश्रितानां नरदारकेण
साकं विजह्रुः कृत पुण्यपुञ्जाः ॥६॥
यत् पादपांशुर्बहुजन्म कृच्छ्रतो-
धृतात्मभिर्योगिभिरप्यगम्यः ।
स एव यद्दृग् विषयः स्वयं स्थितः
किं वर्ण्यते दिष्टमतोव्रजौकसाम् ॥७॥
नैतद्विचित्रं मनुजार्भमायिनः
परावराणां परमस्य वेधसः ।
अघोऽपि यत् स्पर्शनधौत पातकः
प्रापात्मसाम्यं त्वसतां सुदुर्लभम् ॥८॥
सकृद्यदङ्गप्रतिमान्तराहिता
मनोमयी भागवतीं ददौ गतिम् ।

मिति। गोपाः श्रीकृष्णेन सार्द्धं विजह्रुः। इत्थं अङ्ग-स्पर्शनादिभिः। सतां ब्रह्मविदाम्। ब्रह्मसुखानुभूत्या ब्रह्माख्य-सुखानुभवरूपेण। नरदारको नन्दनन्दनः॥१०।१२।११ (६)

यदिति। बहुषु जन्मसु यत्कृच्छ्रान्तपः प्रभृतिः तैन धृतात्मभिः जितेन्द्रियैः। यत्पादपांशु र्यत्पादरजः स एव यद्दृग्विजयः। न तु पांशुःदिष्टं (अदृष्टम्) देवं। अहो आश्चर्ये॥१०।१२।१२ (७)

नैतदिति। एतद्गोपैः सहक्रीड़नम्। मनुजार्भमायिनः मनुष्यबालरूपाः मायाः स्वीकृतवन्तः। परावराणां कारणकार्य्यानां। वेधसः कर्त्तुः। परमस्य कर्त्रन्तररहितस्य। अघो अघासुरः साम्यमित्येवोक्ते सारूप्यंस्यादत उक्तं आत्मेति॥१०।१२।१३ (८)

स एव नित्यात्म सुखानुभूत्यभि-
व्युदस्तमायोऽन्तर्गतो हि किंपुनः ॥९॥

ब्रह्मा।

तदस्तुमे नाथ स भूरिभागो
भवेऽत्रवात्यत्रतुवातिरश्चाम्।
येनाह मेकोऽपि भवज्जनानां
भूत्वानिषेवे तव पादपल्लवम् ॥१०॥
अहोऽतिधन्या ब्रजगोरमण्यः
स्तन्यामृतं पीतमतीव ते मुदा।

सङ्गदिति। यदङ्ग प्रतिमा यत् स्वरूप प्रकृतिः। भागवतीं-स्थितिं ददाति। स एव साक्षात् दृष्टो ददातीति किंपुनः अन्तर्हृदये आहिता निश्चिप्ता। मनोमय्यपि मनः परिणाम रूपापि। नित्यस्वात्मसुखस्यानुभूत्या अभितोव्युदस्ता यथा पुनर्नोदिति। तथा हिंसिता माया येन स तथा। अत्र च गोपानामलौकिकेन भगवता-सह विहारिणाघासुरस्य भगवत्सायुज्येन विभावेन जातविस्मयः। शुकेनानुभूतस्तत् साधुवाद स्वात्रानुभावः। शुकः ॥१०।१२।३८ (९)

तदिति। तत् तस्मात् यस्मादभक्त्या सुलभत्वं (स्वम्) भूरिभागो बहुभाग्यः भवोजन्म। अत्र गोकुले येन भवेन तिरश्चां तिर्यग् जातीयानां भवज्जनानां मध्ये अहमप्येकोभूत्वा तव पाद-पल्लवम् निषेवे ॥१०।१४।३० (१०)

अहोइति। रमण्यो गोप्यः। गवां वत्सरूपेण रमणीनामात्म-रूपेण यस्य तव स्तन्ये अप्वरा अद्यापिनालं समर्थाः ॥१०।१४।३१(११)

NATIONAL ARCHIVES OF INDIA

यासां विभो वत्सतरात्मजात्मना
यत्तृप्तयेऽद्यापि न चालमध्वराः ॥११॥
अहो भाग्यमहोभाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णब्रह्मसनातनम् ॥१२॥
एषान्तु भाग्यमहिमाच्युत तावदास्ता
मेकादशैव हि वयं बतभूरिभागाः ।
एतद्धृषीकचषकै रसकृत्पिबामः
शर्व्वादयोऽङ्घ्रिदजमध्वमृतासवं ते ॥१३॥
तद्भूरिभाग्यमिहजन्मकिमप्यटव्यां
यद्गोकुलेऽपि कतमांघ्रिरजोऽभिषेकं ।

अहो इत्यादि वीप्सा आदरार्थः। यत् येषां पूर्णंव्यापकम् ॥ १०।१४।३२ (१२)

एषामिति। एषां व्रजौकसां। महिमामहत्त्वम्। शर्व्वादयोवयम्। बत आश्चर्य्यं। भूरिभागाः बहुभाग्याः। शर्व्वोरुद्रः। कृतो भूरिभागाः। हि यस्मात् वयं एकादश साहङ्कारेन्द्रिय देवताः। तास "दिग्वातार्क प्रचेतोऽश्वि वह्नीन्द्रोपेन्द्रमित्रकाः"। अहङ्कारोरुद्रः। एतद्धृषीकचषकैः एषामिन्द्रियैरेवपानपात्रैः। असकृत्सदा अङ्घ्रिदजं मधु, अङ्घ्रिकमलं मकरन्दएवामृतं निर्वृतिहेतुत्वात्। आसवोमद्यं अवस्थान्तरजनकत्वात् ॥१०।१४।३३ (१३)

तदिति। इहाटव्यांयत्किमपि तर्व्वादिरूपेण जन्म तद् भूरिभाग्यम्। किम्भूतं यत्कृतमस्य किंजातीयस्य कस्यापि गोकुलवासिनः। अङ्घ्रिरजसोऽभिषेको यस्मिन् तर्व्वादिजन्मनि। किम्भूतः

NATIONAL ARCHIVES OF INDIA

यज्जीवितन्तु निखिलं भगवान् मुकुन्द-
स्त्वद्यापि यत् पदरजः श्रुतिमृग्यमेव ॥१४॥
एषां घोषनिवासिनामुतभवान् किन्देव रातेति नः,
चेतो विश्वफलात् फलं तदपरं कुत्रापि यं मुह्यति ।
सद्वेषादिव पूतनापि सकुलात्वामेव देवापिता,
यद्वामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥१५॥

कतमः यस्य जीवितं मुकुन्दः । जीवितवन्मुकुन्दोयस्य प्रियतमः इत्यर्थः । किम्भूतोमुकुन्दः यस्य पादरजः श्रुतिभिर्वेदैर्मृग्यमेव । अत्रैवशब्दोहि सन्दिग्धार्थवाचि एव शब्दात्र तु कदाप्यगितमित्यर्थः ॥ १०।१४।३४ (१४)

एषामिति । उत अहो । देवघोषे गोकुले । किं फलं एतदाख्यत्यस्मिन्नर्थे । अस्माकं चेतोमुह्यति । यतोविश्वस्य फलभूतात् त्वदृमवतः सकाशादपरं फलम् अयत् (न) गत्यर्थानां धातूनां ज्ञानार्थत्वादजानदित्यर्थः । इनः शतरिरूपम् । आत्मानमेवदास्यामीति चेत्तत्राह । सदिति । सतः प्रशस्तात् सम्पूर्णात् द्वेषात् विरोधादिति यावत् । एवशब्दोऽप्यर्थे । पूतनात्वामेवापिता प्राप्ता अपिः चुरादौ (दिः) । भादौपठ्यमानोहिसेट् (धातुः) किं एकाकिन्येव प्राप्ता नेत्याह । अपि सकुलेति । कुलंवकोऽघासुरश्च येषां घोषनिवासिनाम् । धामाद्यास्त्वत्कृते त्वदर्थम् । धामगृहम् अर्थः पश्वादि । ततः सुहृत् पिताऽनेन माताऽप्युपलक्षिता । आत्माजीवः प्राणा इन्द्रियाणि प्राप्तोतिव्युत्पत्त्या । आशया अन्तः-करणानि । य एवात्मादिपदार्थो दीयते स एवानुरक्तेभ्यो दीयत इत्यनुचितमित्यर्थः ॥१०।१४।३५ (१५)

NATIONAL ARCHIVES OF INDIA

तावद्रागादयःस्तेना स्तावत् कारागृहं गृहम्।
तावन्मोहोऽङ्घ्रिनिगड़ो यावत् कृष्ण न ते जनाः ॥१६॥

उद्धवः।

एताः परं तनुभृतो भुवि गोपवध्वो,
गोविन्द एव निखिलात्मनि रूढ़भावाः।
वाञ्छन्ति यत् भवभियो मुनयो वयञ्च
किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥१७॥
क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः
कृष्णे क्वचैष परमात्मनि रूढ़भावः।

तावदिति। रागादीनां स्तेनत्वादिकं तावदेव। यावत् त्वत्-कथा नास्ति प्रवृत्तायां कथायान्तु तन्नास्तीत्यर्थं कारागृहं बन्धन स्थानम्। ब्रह्मा श्रीकृष्णम्। अत्राङ्घ्रितहेतुः प्राग्वत् ॥१०।१४।३६ (१६)

एता इति। परं केवलं भुवि एतास्तनुभृतो नान्ये शरीरधारणा मासामेव सुफलमित्यर्थं यतो गोविन्द एव रूढ़भावाः। मुनयोवाचं यमत्वादिगुणयुक्ताः। वाञ्छन्ति परं न सहसा प्राप्नुवन्ति। भवभियः संसारभीरवः। वयञ्चमुनयोऽपि दास्यमात्रनिष्ठाः। तनु मुनीनां ब्राह्मणत्वादिना युज्यते रूढ़भावो नतु तद्रहितस्य तव गोपीनां चेत्यत आह किमिति। ब्रह्मजन्मभिर्ब्राह्मणजातिभिः। बहुवचनेन वेदा (ध्ययना)ध्ययनादि ब्राह्मण गुणैरपि किमित्यूक्तम्। नाग्नि-होत्रादिवदभक्तौ विप्रादिरेवाधिकारी किन्तु सर्व्वेऽपीति भावः अत-एवोक्तम् "नालं द्विजत्वं देवत्व" मित्यादि ॥१०।४७।५८ (१७)

तदेवाह क्वेमा इति। नन्वहो अनुद्धृत्या भजत अविदुषोऽपि

नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षात्
श्रेयस्तनोत्यगदराज इवोपयुक्त: ॥१८॥
नायं श्रियोऽङ्ग उ नितान्तरते: प्रसाद:
स्वर्योषितां नलिनगन्धरुचां कुतोन्या:।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-
लब्धाशिषां य उदगाद् व्रजवल्लवीनाम् ॥१९॥
आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम्।
यादुस्त्यजं स्वजनमार्य्यपथञ्च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥२०॥

प्रमादमजानतोऽपि गतानुगतिकया सेवमानस्यापि साक्षाच्छ्रेय: कैवल्यम्। यथाऽगदराजो रस रसायनादिरुपयुक्तो गृहीत: सन्नविदुषोऽपि श्रेय: पुष्टयारोग्यादि तनोति। तथैवायं वस्तुशक्तिरेवेहगीतिभाव: ॥१०।४७।५८ (१८)

नायमिति। उरसि नितान्तमत्यर्थम्। रति: रमणं यस्या:। श्रिय: व्यतायि स्मरणात् संहिता:। नलिनवद्गन्ध: परिमलोरुचि: कान्तिश्च यासां पद्मिनीनामित्यर्थ:। रासोत्सवे रासक्रीड़ायाम्(इत्यर्थ:) अस्य श्रीकृष्णस्य य: प्रसादो व्रजवल्लवीनां गोपीनामुदगादुदितः। भुजदण्डैर्गृहीता आश्लिष्टा: कण्ठायासां अतएव लब्धाशिष: प्राप्त मनोरथ फला: ॥१०।४७।६० (१९)

आत्मनो गोपीतुल्यत्वं दुर्लभं मत्वा तत्पादरज: सम्यक् मम्याशास्ते। आसामिति। गुल्मादीनां मध्ये किमपिस्यां भवेयमिति

यावै श्रियार्च्चितमजादिभिराप्तकामै-
र्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम् ।
कृष्णस्य तद्भगवतश्चरणारविन्दं
न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥२१॥
वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनातिभुवनत्रयम् ॥२२॥

प्रह्लादः ।

नेमं विरिञ्चो लभते प्रसादं
नश्रीर्नरेश्वर्यः किमुता परेऽन्ये ।
यन्नोऽसुराणामसि दुर्गपालो
विश्वाभिवन्द्यै रभिवन्दिताङ्घ्रिः ॥२३॥

प्रार्थनायांलिङ्। गुल्मादयो हि गोपीनां चरणरेणून्जुषन्ते। अहमपि तथा भविष्यामीत्यर्थः। गुल्मः स्तम्बः। याः गोप्यः। आर्यपथं साधुमार्गम् ॥ १०।४७।६१ (२०)

अजो ब्रह्मा आत्मनिबुद्धितत्वे योगेश्वरैरर्च्चितं ध्यातमित्यर्थः। चरणारविन्दस्य कामार्थमोक्षदातृत्वमश्नोति क्रमात् श्रियादिभिस्तृतीयान्तैरुक्तम्। आप्तकामा अपि प्राप्तैश्वर्यस्य निर्व्वाहार्थं भजन्ते। तत्तथाविधं स्तनेषु न्यस्तं संलग्नं यथास्यात्तथा परिरभ्य गाढमालिङ्गेत्यर्थः ॥१०।४७।६२ (२१)

किं बहुनेद मत्र युक्तमित्याह वन्द इति। अभीक्ष्णशः वारंवारम्। उद्गीतं (थं) उद्गानम् ॥ १०।४७।६३ (२२)

नेममिति। ते तव प्रसादं अपरे इन्द्रादयः। विरिञ्चादिभि-

यत् पादरञ्जमकरन्द निषेवणेन
ब्रह्मादयः शरणदाश्नुवते विभूतीः।
कस्माद्वयं कुरुतयः खलयोनयस्ते
दाक्षिण्य दृष्टि पदवीं भवतः प्रणीताः ॥२४॥
चित्रंतवेहित मिहोऽमित योगमाया-
लीलाविसृष्ट भुवनस्य विशारदस्य।
सर्व्वात्मनः समदृशो विषमः स्वभावो
भक्तप्रियोयदसि कल्पतरुस्वभावः ॥२५॥

स्त्रिभिः प्रथमान्तैः पुत्र मित्र कलत्रेषु अपि तेनैवंविधं प्रसाद इत्युक्तम्॥ ८।२३।६ (२३)

विख्यामि (सि) वन्द्यतामेवाह यत्पादेति। हे शरणद। अश्नुवते प्राप्नुवन्ति। वभुतीरैश्वर्य्याणि। खलयोनयः कुजन्मानः। कुकृतयो दुराचाराः। एवं भूता अपि वयं ते त्वया॥ ८।२३।७ (२४)

चित्रमिति। अहोदेव एतत्तवेहितं चेष्टितं चित्रं यत् समदृशोऽपि तव विषमः स्वभावः। कुतः समदृक्त्वम् यतः सर्वात्मा। तदेव कुतः यतोऽमितत्वच्चक्तो भेदादिभिरगिरुक्ता यायोगमाया तया लीलार्थम् क्रीड़ार्थं विसृष्टं भुवनं एव येन सतथा। तव मायया-ऽभिभूतत्वात् वैषम्य माचरसि (जीवा यथाभिभूता आचरन्ति तथा नच मायया) यतो विशारदः अविप्लुत (लुप्त) ज्ञानः। किन्तु-वैषम्यम्? यत् सर्व्वमयत्वेऽपि भक्तेषु प्रीतिर्न चैतद्दोषाय यतः कल्प-

अक्रूरः ।

अद्येशनो वसतयः खलुभूरि भागाः
यः सर्व्वदेव पितृभूत नृदेवमूर्त्तिः ।
यत् पादशौच सलिलं त्रिजगत् पुणाति
स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः ॥२६॥
कः पण्डितस्त्वदपरं शरणं समीयाद्
भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
सर्व्वान् ददाति सुहृदो भजतोऽभिकामा-
नात्मानमप्युपचयापचयौ न यस्य ॥२७॥

तरुस्वभावः त्वं सहि सेवकस्यैव (कस्येव) फलं ददानोऽपि न विषमः । प्रह्लादो भगवन्तम् ॥८।२३।८ (२५)

अद्येति । हे ईश ! अद्यनो वसतयोगृहाः । खलु निश्चितं न मृतिमात्रम् । नरोमनुष्यः । तव प्रवेशात् पञ्च महायज्ञा निर्वाप्यन्ते योऽस्माभिर्लभ्यं । इति वेदादिभिः पञ्चभिरुक्तम् । त्रिजगत्त्रिभुवनम् । जगतोगुरुः पिता । या वसतोः ॥१०।४८।२५ (२६)

क इति । त्वत्तः (त्वद्) भगवतः सकाशात् अपरं पुरुषं शरणं रक्षकं पण्डितोभूत्वा कः समीयात् गच्छेत् न कोऽप्यित्यर्थः । त्वं हि भक्तप्रियः सेवकवत्सलः न तथान्यः न च स्नेहलोपिभूत्वा सेवातारतम्यं नवेत्सि । यतः कृतज्ञः । न च कृतज्ञोऽपि प्रतिक्षुनं न प्रयच्छति । यत ऋतगीः सत्यवाक् । न च कलुषितेन मनसा ददासि । यतः सुहृत् । नचामर्षः यतो भवान् सुहृदः सुहृद्हृदयस्य भजतः सर्व्वान् कामान् ददाति (सा) आत्मानञ्च यस्यात्मनः उपचयापचयौ वृद्धिनाशौ नस्तः तं कूटस्थमित्यर्थः ॥१०।४८।२६ (२७)

NATIONAL ARCHIVES OF INDIA

दिष्ट्या जनार्दन भवानिह नः प्रतीतो
योगेश्वरैरपि दुरापगतिः सुरेशैः।
चित्रं ततो नु सुत कलत्र धनाप्तगेह-
देहादिमोहरशनां भवदीय मायाम् ॥२८॥

अक्रूरः।

नैवम्विधः पुरुषकार उरुक्रमस्य
पुंसां तदङ्घ्रिरजसाजितषड्गुणानाम्।
चित्रं विदूर विगतः सकृदाददीत
यन्नामधेयमधुना सजहाति बन्धम् ॥२९॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां
अद्भुतरसोनामाष्टादशोध्यायः ॥

दिष्ट्येति दिष्ट्यादेवेन इह जग्मिनः। अस्मान् प्रति इतः आगतः प्रकटीभूत इत्यर्थः। कुतोदिष्ट्या यतो योगेश्वरैरपि सुरेशैरपि दूरापगतिः। समाधि सम्यक्ते देवैरपि दुर्ज्ञातः कावार्त्ताऽन्येषाम् आशु शीघ्रं। जन्मान्तरे सुतादि मोह एव रसनारज्जुः। तां साद्धि भवदीया माया त्वदायत्ता। त्वञ्च जनार्दनः। जनसुत्पत्तिं आर्दयसि मोचयसि मोचद इत्यर्थः। जनेऽर्घञ् "जनिबध्योश्चेत्यृद्धिः ॥१०।४८।२७ (२८)

अक्रूरः भगवन्तम्।

एवम्भूतरसेन भजतो वैराग्यादिगुणा भवन्तीत्याह। नैवमिति।

उरुक्रमस्य सम्बन्धिनां पुंसाम्। प्रियव्रतादिनामेवम्विधोरजन्यां अपि दिनत्वकरणादिः पुरुषकारः सामर्थ्यं न चित्रं जिताः षष्ठा-मिन्द्रियाणां गुणाः विषयाः शब्दादयो यैस्ते तथा। कुतो न चित्रम्। यतो यस्य उरुक्रमस्य नामधेयम्। यः सकृदाददीत। स विदूर विगतो जात्यपकर्षं प्राप्तः। अन्यजोऽपि स्वस्यान्येषां बन्धं (बान्धवम्) अधुना कलिकालेऽपि किंपुनः कृतादौ जहातीत्यस्य चित्रतमत्वात् न पूर्व्वस्य चित्रत्वमिति भावः। शुकः ॥५।१।३५ (२९)

इति हेमाद्रिकृतायां कैवल्यदीपिकायां विष्णुभक्तानाम्
अद्भुतरसोनामाष्टदशोऽध्यायः।

NATIONAL ARCHIVES OF INDIA

ऊनविंशोऽध्यायः ।

वीररसे बलिः ।

मनस्विनः कारुणिकस्य शोभनं
यदर्थि कामोपनयेन दुर्गतिः ।
कुतः पुनर्ब्रह्मविदां मवादृशां
ततो वटोरस्य ददामि वाञ्छितम् ॥१॥

एवं हास्यादि भङ्गि भिन्न भक्तिरसानुभवावच्छेदादष्टौ भक्तान् अभिधाय सम्प्रति नवमं भक्तमभिधातु मुत्साहस्थायिनं प्रति नायक-वर्त्तिनयविनया सम्मोहाध्यवसाय बलशक्ति प्रताप-प्रभाव विक्रमा-धिक्षेपादि विभावं स्थैर्य्य धैर्य्य-शौर्य्य-गाम्भीर्य्य आग वेशारद्याद्यनुभावं धृति स्मृत्यौग्रगर्व्वामर्षमत्यावेग-हर्षादि सञ्चारिणं महेन्द्र दैवतं गौरदेहं सत्त्व प्रधानं वीररसमारभते। वीरेति। नरादि लक्षणं तु अभिनव गुप्तापादौ (१)। स च वीरस्त्रेधा युद्ध-दान-धर्म्म-भेदात्। तत्र युद्धवीरोयथा "एतां पश्यपुरस्थली मिहकिल क्रीड़ा-किरातो हरः, कोदण्डेण किरोटिना सरभसं चूड़ान्तरे ताड़ितः। इत्याकर्ण्य कथाङ्गुतं हिमनिधावद्रौ सुभद्रायते। मन्दं मन्द मकारि येन निजयोर्हीर्दण्डयोर्मण्डनम्।" दानवीरोद्वेधा। यत्र स्थिता एव सकल सम्पदः कीर्त्याद्यनुसन्धानेन स्वयमर्थिसात्क्रियन्ते। स एकः। यथा "दधिक्षीर घृताम्भोधि व्यञ्जने स्पृहनीयया। महा-

---

(१) भरतमुनेर्नाट्य शास्त्रीयव्याख्यानेऽभिनवगुप्तपादाः।

NATIONAL ARCHIVES OF INDIA

दानोत्सवे यस्य इन्तकारायितं भुजा"। य एतु परितुष्टे दिवादिभि दीयमानाः साम्राज्यादि विभूतयः। सत्व प्रकर्षात् परिक्रियन्ते स उप (रि) स्थित परिहार नामा द्वितीयः। यथा सन्तुष्टेतिसृष्टां पुरामपिरिपौ कण्डूलदोर्मण्डलम्। क्रीड़ाक्रान्तः पुनः प्ररूढ़शिरसो वीरस्य लिप्सोर्व्वरान्। यास्यादैन्यपरान्वित यस्य कलहायन्ते मिथस्त्वंहृण। त्वं दुखित्वभितोमुखानि सदृश ग्रीवः कथंवर्णते।" धर्म्मवीरोऽपिधर्म्मस्य सकाम निष्काम भेदात् द्वेधा। यथा "अजित्वा सार्ण्वामुर्व्वीं मनिष्टा विविधैर्मखैः। अदत्वाचार्थमर्थिभ्योभवेयं पार्थिवः कथम्। इत्यत्रमखैरनिष्टेति। यत्तु राज्ञा वीरस्य दया-वीराख्यमपरं भेदं ब्रुवता (१) "सत्वं मदीयेन शरीरवृत्तिं, देहेन निर्व्वर्त्तयितुं प्रसीद। दिनावसानोत्सुकबालवत्सा, विमुच्यतां धेनुरियं महर्षे" इत्युदाहृतम्। तत्तु न सम्यक् तत्र हि वत्सान्तर-वद्देहस्यापि देयत्वेन प्रसक्तनाद्दानवीर एवायं। अतएवायं प्रकारो दानवीर एवान्यैरुपदर्शितः। यथा "कर्णस्वङ्गं शिविर्मांसं जीवं जीमूतवाहनः। ददौदधीचिरस्थीनि किमदेयं महात्मना" मिति। दयायाः कृपात्वेन करुणात्वात्। करुण प्रभेद एवाय मित्येके। तस्मादस्योक्तं भेद त्रयं एवरम्यम्। अतएवेदं सावधारणमुक्तं भरतेन। "दानवीरं धर्म्मवीरं युद्धवीरं तथैवच। रसवीरमपि प्राह ब्रह्मा त्रिविध मेवहीति (२) युद्धवीरे ("आपत्पङ्कनिमग्नानां खल्य सन्तोष मिथ्या ज्ञानं च यस्य।" य (स) स्तत्त्वनिश्चयरूपोऽसंमोहा-ध्यवसायः स एव प्रधानतयोत्साह हेतुः। रौद्रे तु ममता प्राधान्या दशास्त्रान्वितानुचितयुद्धाद्यपीति मोहविस्मय (प्राधान्य) मिति तयोर्व्विविक्तः पन्थाः। मनस्विन इति। तदेवम्भूतान् वीर प्रभेदान्

(१) रघुवंशे द्वितीय सर्गे ४५ श्लोकः।

(२) विश्वनाथीय दर्पणे वीराणां लक्षणानि सन्ति ३।२२४।

यजन्ति यज्ञं क्रतुभिर्यमादृता
भवन्त आम्नाय विधान कोविदाः।
स एव विष्णुर्वरदोस्तु वा परो
दास्याम्यमुष्मै क्षितिमीप्सितां मुने ! ॥२॥

मनसिकृत्वा तत्र युद्धवीररूपेण भक्तिरसानुभवमशक्यं मन्यमानो दानवीरं दर्शयन् तस्य प्रथमभेदे बलिं भक्तमाह। बलिरिति। अर्थिनां कुयाचकानां कामोऽभिलाषः। तस्योपनयेन पूरणेन या दुर्गतिः दारिद्र्यम् तदपि शोभनं श्लाघ्यं। अर्थीति कुत्सायामिनिः यदाहुः "भूमनिन्दा प्रशंसायां नित्ययोगेऽतिशायने। संसर्गेऽस्ति विवक्षायां भवन्मितुवादयः" इति। कारुणिकस्य परदुःखेन व्यथितस्य। मनस्विनः धीरस्य। महान्तमर्थराशिं दत्वाप्यनुशयहीनस्येत्यर्थः। यदर्थिमात्रस्यापि कामपूरणेन दुर्गतिः श्लाघ्यते तदाकिमु वेदविदामित्याह। कुतः पुनरिति। भवादृशामित्यनेन त्वत्तुल्योयंवटुरिति उक्तम्। ततोदारिद्र्यस्य श्लाघ्यत्वादस्य वटोर्वामनस्य वाञ्छितं पदत्रयम् ॥ ८।२०।१०। (१)

नायमर्थी किन्तु वटुवेषच्छन्नो विष्णुरिति चेत्तत्राह। यजन्तीति। क्रतवः प्रसिद्धाः ज्योतिष्टोमादयः। ससोमा यज्ञाः पाकयज्ञादयः प्रसिद्धाः। निःसोमाइतिहि (१) क्रतुयज्ञेभ्यश्चेति सूत्रवृत्तिकारादिभिर्विवृतम्। भवन्तो भवादृशाः। आम्नायस्यविधाने इतिकर्त्तव्यतायां। को विदाः वरं श्रेष्ठं ददातीति वरद उपकर्त्ताऽपरोऽपकर्त्ता हे मुने शुक्र ! अचलेर्दामोत्यसंमेहाध्यवसायी ब्रह्मविदा मित्युपलक्षिताः। पात्रगुणाश्रमनस्विनया सूचितास्यात्साऽस्य विभावाः दुर्गतावति श्लाघ्यत्वबुद्धि रित्युपलक्षिताः। धैर्य्यादयोऽनुभावाः। एवमिति हर्षादिकाः सञ्चारिणो ज्ञेयाः। बलिः शुक्रम् ॥८।२०।११ (२)

---

(१) पाणिनिः ४।२।६८ सूत्रम्।

पृथः ।

वरान् विभो त्वद्वरदेश्वराद्बुधः
कथं वृणीते गुण विक्रियात्मनाम् ।
ये नारकानामपि सन्ति देहिनां
तानीश कैवल्यपते वृणे नच ॥३॥
न कामये नाथ तदप्यहं क्वचित्
न यत्र युष्मच्चरणाम्बुजासवः ।
महत्तमान्तर्हृदयान्मुखच्युतो
विधत्स्व कर्णायुतमेष मेवरः ॥४॥

वरानिति द्वितीयेऽस्मिन् दानवीर प्रभेदे पृथुर्भक्तः इत्यभिप्रेत्याह पृथुरिति। (१) "वरञ्च मत्तश्चन मानवेन्द्र) वृणोष्वतेहं गुणशील यन्वित" इति भगवदुक्तिं निशम्याह वरानिति। गुणविक्रियात्मनां गुणविकाररूपाणां ब्रह्मादीनां वरान् वरदेश्वरतयात्वत्तः कथं वृणीते। ब्रह्मपदादीनां विषय सुखात्मकत्वात्। विषय सुखानि च नारकानां नरक निवासिनामपि सन्ति। अतस्तान् ब्रह्मपदादिरूपान् वरान् नैव वृणेऽहम् यत स्वमीशः समर्थः। कैवल्यपतिस्त्व कैवल्यञ्च-तवाधीनम्। तर्हि कैवल्य मेववृणीष्वेति चेत्तत्राह ॥४।२०।२३ (३)

न कामये इति। तदपि न कामये यत्र कैवल्येयुष्मच्चरणा-म्बुजस्यासवो मकरन्दः। क्वचिदेकदेशेऽपि नास्ति भक्ति सुखं नास्तीत्यर्थः। सहिमहत्तमानां अन्तर्हृदय अर्तति सततं गच्छ-तीति महत्तमान्तर्हृदयात्। अत क्रीरूपम्। तद्हृदयान्तवर्त्ती

---

(१) श्रीमद्भागवत ४।२०।१६ श्लोकः।

स उत्तमःश्लोक महन्मुखच्युतो
भवत्पदाम्भोज सुधाकणानिलः।
स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां
कुयोगिनां नो वितरत्वलं वरैः ॥५॥
यशः शिव सुश्रव आर्य्यसङ्गमे
यदृच्छया चोपशृणोति ते सकृत्।
कथं गुनन्नो विरमेद्विना पशुं
श्रीर्यत् प्रवव्रे गुणमङ्ग्रहेच्छया ॥६॥

तन्मुखच्युतं आस्वाद्यन्तेऽन्यैः अतो बहुभ्योयुगपत् तदाकर्णनार्थं करणायुत मेव मेमह्यं विधत्स्व एष एव वरः ॥४।२०।२४ (४)

मुक्ति सुखे भक्तिसुखाभावात् भक्ति सुखे मुक्तिसुखाभावो नास्तीत्याह। स उत्तमेति। सुधाकणानां अमृतविन्दुनामनिलो दूरादपि श्रवणमित्यर्थः। विस्मृतं तत्त्ववर्त्म यैः तेषां कूयोगिनामस्माकं तत्स्मृतिं वितरति स्वरूपानुभवसुखरूपां मुक्तिन्ददातीत्यर्थः। विषय सङ्गेऽपि मोक्षकामत्वात् कुयोगित्वम्। मुक्ति सुखेन सह भक्तिसुखं स्वभक्ताना मस्तीत्यर्थः ॥४।२०।२५ (५)

श्रवणस्य दुःसंपादकत्वात् सुसंपादकत्वेपि परिणति विरसत्वात् भक्तिसुखं दुर्लभमिति चेत्तत्राह यश इति। हे सुश्रवः सुकीर्त्ते। यदृच्छया गुरु शिष्यभावं विनापि उपशृणोति। उपश्रोतृतयाप्यवधारयति। (अवध्यायति)। किम्पुनः श्रोतृतयाऽसङ्गद्वारम्वारम् च शब्दस्वेदं पशुं विनाऽन्यः कथं विरमेत् यतो गुणज्ञः। मुक्ति सुखेऽपि गुणाः सन्तीति चेत्तत्राह। श्रीरिति। श्रीः भूतिः (भक्ति) सुखं स्वामिनी यद्भक्ति सुखं प्रकर्षेण वव्रे। भक्तिगुणान् संगृह्य

अथाभजेत्वाखिलपुरुषोत्तमं
गुणालयं पद्मकरेव लालसः ।
अथावयो रेक पतिस्पृधोः कलि-
र्नस्यात् कृतत्वच्चरणैकतानयोः ॥७॥
जगज्जनन्यां जगदीशवैशसं
स्यादेव यत् कर्म्मणि नः समीहितम् ।

मुक्तिगुणेष्वाधातुमिच्छया । अत्र यशसः शिवत्वात् निर्विघ्नत्वम् । सुश्रव इति निर्देशस्य सम्बोधनपरत्वेऽपि विशेषणप्रधानत्वात् शोभनत्वेन सुखग्राह्यत्वं । आर्य्यसङ्गमहेतुत्वात् सुलभत्वमुक्तम् ॥ ४।२०।२६ (६)

शतक्रतुत्वे शक्रस्य गर्ववत् विष्णुभक्तत्वे लक्ष्मीसर्वादोषोऽस्तित्याह अथेति । अथशब्दः प्रश्ने । अथ कलिर्न्स्यात् । अभजमिति । भजनारम्भभूतत्वाल्लट् प्रयोगः । लालस उत्कण्ठावान् । पद्मकरेति विशेषणप्रधानो निर्देशः भगवदुपायनार्थं लोलाब्जमलधारिणीत्यर्थः । सा यथा अभजत् । त्वं हि प्रकृत्या सर्व्वपुरुषेषु उत्तमः गुणाश्च गुणाः सौन्दर्य्यादयः । अपि अहो । अहञ्च सावावामिति विरूपत्वेऽपि त्वदादेर्मिथोद्वन्द्वे यद् यत् परं तत् स्वस्य इति वार्त्तिकादस्मच्छब्दः शिष्यते । यतः आवामेकस्मिन् वस्तौ सस्पृहौ एकपति स्पृहत्वेऽपि स्पृहायाः भिन्नप्रदेशविषयत्वेन नविरोध इति चेत् तदपि नास्तीत्याह ॥ कृतेति एकतानत्वमनन्यवृत्तित्वम् । एवं कलिविषये संशय्य स्वयमेव निश्चिनोति ॥ ४।२०।२७ (७)

जगदित्यादि । जगतो जनन्यां मातरि लक्ष्म्याम् । वैशसं चित्तव्यथा विशसनतुल्यत्वात् । यस्याः कर्म्मणि चरणसेवायां समीहितम् । सम्यग्वाञ्छा । ननु स्वस्याप्यकत्वं मत्वा बलवद्विरोधात् भिभेति-

NATIONAL ARCHIVES OF INDIA

करोषि फल्गूत्रुरुदीनवत्सलः
स एव विष्णोऽभिरतस्य किन्तया ॥८॥
भजन्त्यथ त्वामतएव साधवो
व्युदस्त माया गुणविभ्रमोदयम्।
भवत् पदानुस्मरणादृते सतां
निमित्तमन्यत् भगवन् न विद्महे ॥९॥
मन्ये गिरं ते जगतां विमोहिनीं
वरं वृणीष्वेति भजन्त मात्ययत्।

चेत्तर्हि विरम्यतां अस्मादिति चेत्तत्राह। करोषीति। त्वं हि दीनेषु पक्षपातित्वात् प्रगल्भमपि सेवकं स्व संसर्गात् (स्वसर्गात्) पृथक् करोषि। श्रीरेवात्रनिदर्शनमिति भावः। तथापि तस्याः प्रेममात्रत्वे नात्यन्तं सुखसाधनत्वात्। तव च (नच) भृत्यमात्रत्वे न बहिरङ्गत्वादयुक्तः। तया सहविरोध इति चेत्तत्राह। स एवेति। स्त्रीप्रमाणेष्वन्यपुरुषेष्वेषा वार्त्ता। न तु नित्यनिरतिशयानन्दघन-ब्रह्मस्वरूपसुखसन्तुष्टे त्वयीति भावः। धिष्ण्यं पदम्॥ ४।२०।२८ (८)

अतएव देवतान्तरं हित्वा महान्तं त्वामेव सेवन्त इत्याह। भजन्तीति अभज्याभज्य निर्धारणानन्तरम्। अतएवेति दीन-वत्सलत्वात् स्वरूपसुखसन्तुष्टत्वाच्च तदेवाह। व्युदस्तेति। व्युदस्तो दूरीकृतो माया गुणानां रजःप्रभृतीनां विभ्रमो विलासो हि। कार्यं रागद्वेषादि। तस्योदयोत्पत्तिर्भावो येन तम्। किमर्थं भजन्तीति चेत्तत्राह। भवत्पदेति। भवत्पदानुस्मरणमेव सतां निमित्तम् नान्यत् किञ्चित्। नित्य निरतिशयानन्दानुभवरूपत्वात् तस्येति भावः॥ ४।२०।२९ (९)

NATIONAL ARCHIVES OF INDIA

वाचानुतन्त्र्या यदितेऽजनोऽसितः
कथं पुनः कर्म्म करोति मोहितः ॥१०॥
त्वन्मायया ऽध्वा जन ईश खण्डितो
यदन्यदाशास्त ऋतात्मनोऽबुधः ।
यथाचरेद् बालहितं पिता स्वयं
तथा त्वमेवार्हसि नः समीहितुम् ॥११॥

सनकः ।

नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
किम्वन्यदर्पित भयं भ्रुव उन्नयस्ते ।

एवं प्रसक्तोऽनुप्रसक्त्या निरूप्य प्रकृतमनुसन्धत्ते । मन्ये गिरमिति । भजन्तं भजनादेवलब्धसर्व्वोत्कर्षम् । नू अहो ते तव वाचां तन्त्र्या पशुबन्धनोतुल्यया जनो यदयमितः अवद्यः स्यात् । तर्हि कथं पुनः पुनः कर्म्मकरोति ? दृष्ट रिपवो हि तद्भजनम् विहाय ॥ ४।२०।३० (१०)

यत एवं दृष्टवाग् विलासो भवान् अतो भवता भक्तान् प्रत्येवं न वाच्यं किन्तु पितृवद्धितमेव वाच्यमित्याह । त्वन्मायेति । अध्वा तत्त्वतः । खण्डितः पृथक्कृतः । ऋतात्मनः सन् पदात्मरूपादबुधः देहेऽहं बुद्धिः सन्नान्यद्विषयसुखमाशास्ते वाञ्छति । अतः स्वहितं न वेत्ति । अतः स्वयमेव समीहितुं स्वहिते चेष्टयितुं भवानर्हति । सोऽयं प्रसङ्गेन भगवदादीयमाने स्वर्गापवर्गादावपि उर्ज्जस्वलत्वादनभिरुचेः पृथोरुत्साहस्थायिभावः प्रकरणेनावगम्यते । न हि लोकचेतसा तथाविधा वराः परिहर्त्तुं शक्याः । पृथुर्भगवन्तम् । ४।२०।३१ (११)

NATIONAL ARCHIVES OF INDIA

येऽङ्गत्वदङ्घ्रि शरणा भवतः कथायाः
कीर्त्तन्य तीर्थयशसः कुशला रसज्ञाः ॥१२॥
कामं भवः स्वव्रजिनैर्निरयेषु नस्ता
चेतोऽलिवद् यदि नु ते पदयोरमेत।
वाचश्च न स्तुलसि वद् यदि तेऽङ्घ्रिशोभाः
पूर्य्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥१३॥
नोत्तमःश्लोकवार्त्तानां जुषतां त्वत् कथामृतम्।

नत्यन्ति केति। ये भवतः कथायां रसज्ञाः ते आत्यन्तिक-मपि तव प्रसादं मोक्षाख्यं न गणयन्ति। किन्तु किमुतान्यद् ब्रह्मादि स्थानम् यतो (ते) भूवलयरत्नैर्भूषैः कालाख्यैरर्पितभयं जनित भयं। कीर्त्तन्यं कीर्त्तनीयम्। रम्यत्वात् कृतार्थं कृत्यार्थं तवैकेन कैश्चित्वनः इति कृत्यप्रत्ययः। तीर्थं पावनत्वादृश्यश्च। अतएव कथा श्रवणे परिणामे च सुखदा। तदङ्घ्रि शरणत्वान्नकालभयम्।। कुशलत्वान्नासारग्रहणम् ॥३।१५।४८ (१२)

काममिति। कामं यथेष्टं निरयेषु भवस्त्वात्। अवस्थानस्तु स्वव्रजिनैरस्मत् पापे र्यदि ते पद्मवत् पदयोरलिवत् चेतोरमेत यदि तुन्नसोवहाचः तदङ्घ्रि सङ्गजनित शोभाः। यदि च कर्णरन्ध्रं तव गुणगणैः पूर्य्येत एवं सतिनरकोऽपि सुखदः। अन्यथा स्वर्गोऽपि दुःखद इत्यर्थः। काममित्यनेन कापिशूरता गम्यते। कुमारा भगवन्तं ॥३।१५।४८ (१३)

नोत्तम इति। उत्तमः श्लोको वार्त्ताभक्तिर्येषां ते तथा। अतएव तत् कथामृतं सेवनेनैवाजरामरत्वम्। अतएवान्तकालेऽपि नोसम्भ्रमः

स्यात् सम्भ्रमोऽन्तकालेऽपि स्मरतां त्वत्पदाम्बुजम् ॥१४

ध्रुवः ।

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो
भूयादनन्तमहताममलाशयानाम् ।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं
नेष्ये भवद्गुणकथामृतपानमत्तः ॥१५॥

मैत्रेयः ।

तस्मिन् प्रसन्ने सकलाशिषां प्रभौ
किं दुर्लभं ताभिरलं लवात्मभिः ।

---

* व्याकुलत्वं देहस्यानात्मत्वात् कुत्सित देहान्तर लाभ इति । चेतसा तां तत् पदाम्बुजम् । तत् स्मरणस्यान्तकालेऽपि अक्लोपात् । ं पीतासु (२) "यं यंवापीति" सूतः ॥१।१८।४ (१४)

भक्तिमिति । प्रकृष्टः सङ्गः प्रसङ्गः । भक्तत्वादिष्णु कथाश्रवक (श्।८) त्वं महत्त्वादाश्रित वत्सलत्वं अमलाशयत्वाद्बोधकत्वम् । नेष्ये अतिक्रमिष्यामि ॥४।८।११ (१५)

तस्मिन्निति । तस्मिन्विष्णौ ताभिराशीभिः अणिकाभिः यद्यपि भक्तस्याशिषः सुलभाः तथापितानकर्त्तव्या इत्यर्थः । यतो-भजनादन्यत्र फलकामनायां दृष्टिं विहाय भजतां स्वयमप्रार्थित एव स्वगतिं स्वपदप्राप्तिं विधत्ते नाच परा सर्व्वेभ्यः फलेभ्यः । सद्धिपरः सर्वेभ्यः फलप्रदेभ्यः । न च शुद्धां अशुद्धां वा भक्तिं न जानाति

अनन्यवृत्त्या भजतां गुहाशयं
स्वयं विधत्ते स्वगतिं परः पराम् ॥१६॥
नवैमुकुन्दस्य पदारविन्दयो
रजो जुषः तात भवादृशा जनाः।
वाञ्छन्ति तद्दास्य मृतेऽर्थमात्मनो
यदृच्छया लब्धमनः समृद्धयः ॥१७॥
भक्तिं हरौ भगवतिप्रवहन्नजस्र-
मानन्दवाष्पकलया मुहुरर्द्यमानः।
विक्लिद्यमानहृदयः पुलकाचिताङ्गो
नात्मानमस्मरदसाविति मुक्तलिङ्गः ॥१८॥

कविः।

शृण्वन् शुभद्राणि रथाङ्गपाणे

यतोगुहाशयः। सर्व्वान्तःकरणस्य। मैत्रेयो विदुरम् ॥३।१३।४९ (१६)

नवैदृति। रजोरेणुः भवादृशा विदुरादयः। आत्मनोऽर्थे आत्मनः सुख साधनं ते दास्यन्ति विष्णुदास्यं मनः समृद्धीनां मनसः सुख साधनानां यदृच्छयालब्धत्वात् तान् (न) वाञ्छन्ति। निर्म्मनस्कात्मभोग्यं हि निर्विषयं सुखं। तच्च विष्णुदास्यादेव ॥४।८।३६ (१७)

भक्तिमिति। असावहमित्यात्मानं नास्मरत्। यतोमुक्तलिङ्गः तत्यक्तलिङ्गं शरीराभिमानः ॥४।१२।१८ (१८)

जन्मानि कर्म्माणि च यानि लोके ।
गोतानि नामानि तदर्थकानि
गायन्विलज्जो विचरेदसङ्गः ॥१९
एवं व्रतः स्वप्रियनामकीर्त्या
जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायः

मृगवचिति । एवं दानवीरं दर्शयित्वा (१) क्रमप्राप्तं धर्म्मवीरं दर्शयितुमभ्यर्हितत्वात् निस्कामधर्म्मवीरमेव पञ्चदशभिःपद्यै रुदाहरति । कविरित्यादिभिः । कविः । ऋषभ पुत्रे योगी हरिश्च रथाङ्गं-चक्रम् सरथाङ्गपाणि रथो वाच्या येषां गोतानां नाम्नाञ्च तानि तथा । नाम्नां गानं कीर्त्तनं विचरेद्विचरति । सभावलेलिङ् असङ्गो विलज्ज इत्याभ्यां लोकापवगणनया चित्तगतं किमप्यौदार्य्यमुक्तम् । तेनचात्रै यात्मक उत्साहोऽवगम्यते । अयमेवास्य शान्ताद्भेदः । शान्तेहिनात्यन्तं लज्जादेस्तिरस्कारः । धर्म्मेतुभगवज्जन्मादानुसन्धान रूपः ॥११।२।३९ (१९)

आविर्भूत धर्म्मवीरस्यानुभावानाह । एवमिति । स्वप्रियो विष्णुः । द्रुतं भक्तिरसेनक्लिन्नम् । निरीहस्य जगज्जनमादिषटमान मिव पश्यन् हसति रोदित्वानन्दाश्रूणि मुञ्चन्ति । रौतीति भगवन्तं पुरःस्थितमिव मन्यमानो गोष्ठीं करुते । भक्त्यावेशाद् गायति उत्तीर्णोऽस्मिभवाम्बुधिमिति नृत्यति । तत् किंनटवत्ख्यापनाय नेत्याह उन्माद वदिति । (उन्माद इत्यर्थः) । उन्मादं इत्यर्थं-

त्युन्मादवन् नृत्यति लोकवाह्यः ॥२०॥
खं वायुमग्निं सलिलं महीञ्च
ज्योतींषि सत्त्वानि दिशो द्रुमादीन्।
सरित् समुद्रांश्च हरेः शरीरं
यत्किञ्चभूतं प्रणमेदनन्यः ॥२१॥

शुकः।

योदुस्त्यान् क्षितिसुतं स्वजनार्थदारान्
प्रार्थ्यां श्रियं सुरवरैः सदयावलोकान्।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्
सेवानुरक्तमनसामभवोऽपि फल्गुः ॥२२॥
यज्ञाय यज्ञपतये विधिनैपुणाय
योगाय सांख्यशिरसे प्रकृतीश्वराय।

आद्यच् प्रत्ययः (१)। लोकवाह्य इत्यनेनासङ्गादित्वमुक्तम् ॥११।२-४० (२०)

खमिति। ज्योतींषि नक्षत्राणि। सत्त्वानि गवाश्वप्रभृतीनि। हरेः शरीरमिति बुध्या यत्किञ्चभूतं प्रणमति अनन्य सर्व्वत्र हरि दृष्ट्या कविः निमिम् ॥११।२।४१ (२१)

य इति। यां श्रीः सुरवरैः सदयावलोकं प्रार्थ्यते तां यो भरतः नैच्छत् तद्रुचितं यतोविष्णुभक्तानां मोक्षोऽपि फल्गुः श्रीशुकः ॥५।१४।४४ (२२)

यज्ञायेति। यञ्च भरतो मृगत्वं हास्यन् त्यक्ष्यन् इति समुदाजहार उच्चारितवान्। कर्म्मज्ञान—भक्तिभेदात् नमस्कारः। तत्र

नारायणाय हरये नम इत्युदारं
हास्यन् श्वगत्वमपि यः समुदाजहारः ॥२३॥

गजेन्द्रः।

एकान्तिनो यस्य न कञ्चनार्थं
वाञ्छन्ति ये वै भगवत् प्रपन्नाः।

कर्म्मयोगि यज्ञाय उपासनारूपाय धर्म्मपतये उपास्यरूपाय विधो नैपुण्यं यस्य तस्मै उपासकरूपाय प्रकृतीश्वराय उपास्यरूपाय (सांख्य शिरसि यस्यादरेण ग्रहीतत्वात् तस्मै उपासकरूपाय) भक्तियोगि। नारं नमरमूहः अयनं यस्य तस्मै। उपास्यरूपाय नररूपेनोपासकरूपाय नामोच्चारणे उपासनारूपाय हरये हृदये इति सर्व्वत्र विशेष्यम्। अपरः प्रकारः यज्ञाय स्मृत्यर्थरूपाय। धर्म्मपतये स्मृत्यर्थरूपाय। विधिनैपुणाय सदाचाररूपाय। एभिस्त्रिभिः त्रयोमार्गैः उक्तः। योगाय योगेन समाधिना प्राप्याय क्लेशादि चतुष्टयाय परामृष्टाय पुरुषाय। योगाय इति साध्यसाधनयोरभेदोपचारादुक्तम्। सांख्येषु पुरुषप्रकृत्यादितत्त्वेषु शिरसे शिरोवत् प्रधानभूताय पुरुषाख्य तत्त्वरूपायेत्यर्थः। प्रकृत्या स्वभावेन न तूपाधिना ईश्वराय नियन्त्रे नित्यैश्वर्य्याय। पशुपति महादेवादि शब्दवाच्यायेत्यर्थः। नारायणांय पञ्चरात्रादितन्त्रेषु निरूप्याय तदैवमार्गं पञ्चकेन प्राप्याय नम इत्यर्थः। शुकः ॥५।१४।४५ (२३)

एकान्तिन इति। यस्यैकान्तिनः अन्यभिचारिणः सेवकाः (यस्य) यस्मात्। कञ्चनमर्थं न वाञ्छन्ति। ये भगवद्भक्ताः (सर्व्वात्मना प्रयत्नेन भगवद्भक्ताः) अत्यद्भुतं तस्य विष्णोश्चरितं

अत्यद्भुतं तच्चरितं सुमङ्गलं
गायन्त आनन्दसमुद्रमग्नाः ॥२४॥

मुचुकुन्दः।

न कामयेऽन्यं तवपादसेवना-
दकिञ्चन प्रार्थ्यतमाद्वरं विभो।
आराध्य कस्त्वां ह्यपवर्गदं हरे
वृणीत आर्य्यो वरमात्मबन्धनम् ॥२५॥
तस्मादिच्छाम्यहं शिष ईश सर्वतो
रजस्तमः सत्त्वगुणानुबन्धनाः।
निरञ्जनं निर्गुणमद्वयं परं
त्वां ब्रह्मभावं पुरुषं व्रजाम्यहम् ॥२६॥

विश्वसृष्ट्यादिकरणं एकत्रस्थिता गायन्ते। गानफलमाह। आनन्द समुद्रमग्ना इति। गजेन्द्रः भगवन्तम् ॥८।३।२० (२४)

नेति। क आर्यः ज्ञात्वा (नो) त्वनो बन्धनं वरं वृणीतेनकोऽपीतार्थः। सर्व्वत्रचैतेषु श्लोकेषु अन्यान (न्या) पेक्षया भजन धर्म्मासक्त्या कोऽप्युत्साहः पुष्यतीति मन्तव्यम् ॥१०।५१।५५ (२५)

तस्मादिति। तदेवं सप्रभेदं वीररसं निरूप्य तद्भङ्ग्या भक्तिरसानुभवितुः फलसम्बन्धं दर्शयन् उपसंहरति। तस्मादिति। तस्माद्वराणामनर्थरूपत्वात्। आशिषः आशास्यमानानि फलानि सर्व्वेशः लोकत्रयवर्त्तिनोरपि। निर्गुणं त्वां व्रजामि। निर्गुणः कुतः यतो निरञ्जनः। अञ्जनं प्रकाशावरणं मायाख्यम्। सगुणोहि

NATIONAL ARCHIVES OF INDIA

नारदः।

नामान्यनन्तस्य गतव्रपः पठन्
गुह्यानि भद्राणि कृतानि च स्मरन्।
गां पर्य्यटन् तुष्टमना गतस्पृहः
कालं प्रतीक्षन् नमदो विमत्सरः ॥२७॥

कुन्तौ।

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः
स्मरन्ति नन्दन्ति तवेहितं जनाः।

मायासम्बन्धात्त्वंपदार्थः। माया सत्त्वभेदि सहितीयत्वंख्यात् कुतोऽद्वयः। यतोऽप्रमितावः। (मायायाः) सत्ता सत्ताभ्यामनिर्व्वाच्यत्वादित्यर्थः (१) भक्तमहिमानुभक्तिमहिम्नैवोक्त इति अतनोक्तः। सुचुकुन्दः श्रीकृष्णम् ॥१०।५१।५६ (२६)

नामानीति। ईदृशस्य च कृतकृत्यतया प्रियातिथिवत् मृत्युं प्रतीक्षकत्वात् न किञ्चिद्दे (कृतं) कर्त्तव्यमस्ति इत्याह। नामानीति। व्रपा लज्जा। कृतानि कर्म्माणि। कालं मृत्युम्। अपदः अस्वीकृत स्थानविशेषः। इत आरभ्य नारदः कुन्तीत्यादि शब्दो वक्ष्य निर्देशमात्र विवक्षया न तु भक्ति विवक्षयेति ज्ञेयं विष्णु ग्रहस्य ज्ञापकत्वात् ॥१।५।११ (२७)

शृण्वन्तीति। एवं भक्तस्य मुख्यत्वाद् ब्रह्मसायुज्यमुक्ता तस्यैव भगवत् सामीप्यादि मुक्तिलिप्सोः स्वाः प्रदर्शयितुकामत्वाह। कुन्तीति। अभीक्ष्णशः पुनःपुनः। नन्दन्ति प्रशंसन्ति। ईहितं

---

(१) सांख्य भाष्य-धृतम् १।२६। "नासदूपानसदूपामायानैर्वोभयात्मिका। सदसद्भ्यामनिर्व्वाच्या मिथ्या सृष्टा सनातनी।

एवंवपश्यन्त्यचिरेण तावकं
भवप्रवाहोपरमं पदाम्बुजम् ॥२८॥

ब्रह्मा ।

यच्च व्रजन्त्यनिमिषा ऋषभानुवृत्त्या
दूरे यमाः क्षुपरिनः स्पृहणीयशीला ।
भक्तिर्मिथः सुयशसः कथनानुरागः
वैक्लव्यवाष्पकलया पुलकीकृताङ्गाः ॥२९॥

कर्दमः ।

लोकांश्च लोकानुगतान् पशूंश्च
हित्वा श्रितास्ते चरणातपत्रम् ।

कर्म्मत एव ये भवधादिरताः नान्ये । भवः संसारः । सएव प्रवाहः । जलप्रवाहवत् पतितं नमुञ्चन्ति । उच्चावचेषु स्थानेषु पातयतीति प्रवाहः । तस्योपरमोविनाशो यत्र पदाम्बुजे तत्तथा । एतेन सामीप्यरूपा मुक्तिरुक्ता । कुन्ती श्रीभगवन्तम् ॥१।८।३६ (२८)

सालोक्यरूपामाह । यच्चेति । यद्वै कुरुठं व्रजन्ति दूरेऽमः (यमाः) दूरीकृताद्धारः । अनिमिषां देवानां ऋषभोविष्णुः । तस्यानुवृत्त्यानो यमाकं उपरता एतावतस्तो यथापूर्व्व मन्तरङ्गाः । एवं सार्ष्टि सारूप्येऽपिज्ञेये ॥३।१५।२५ (२९)

किञ्च सिद्धं पुरुषं भगवत्सालोक्यादि मुक्ति मासादयन्तं विभूतयिवः सर्व्वाण्यिव एवमुपमन्त्रयन्ते । तथाहि "अहो अहोचतां स्वर्गं एते ते कस्य पादपाः । इमा अप्सरसः साध्याः सेवरूति पुनः पुन" रित्यादि । तत्रैवमस्तीति चेतसा सङ्कोनकार्य्यः । नाप्यहं

परस्परं त्वद्गुणवादशौधु-
पीयूषनिर्वापितदेहधर्माः ॥३०॥

कविः ।

गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न हृष्यति ।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ॥३१॥

देहेन्द्रियप्राणमनो धियां यो
जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ।
संसारधर्मैरविमुह्यमानः

योग्य इति गर्वः । पुनर्दुःख प्रसङ्गात् । तथाच सूत्रम् "स्यान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्" (१) इति । तदेतदभिप्रेत्याह । लोकानिति । लोका इन्द्रभवनादयः । लोकानुगतास्तद्वासिनः । तेषां पशुवदाहार मैथुनमात्र वेदित्वात् पशुतुल्यत्वम् । तान् हित्वा अर्थात् प्रार्थयमानानिति ये श्रिताः तवगुणवाद एव वासनान्तरोत्पादकत्वात् । शौधुर्मद्यम् । रुचिप्रदत्वात् पीयूषं । तेन निर्वापितो निष्कासितो देह धर्मो विषय वासनारूपोऽसन्तोषरूपश्च यैः तैतथा । मुख्यं य एवं प्राप्नुवन्तः श्रिता इत्यादि (२) तदुक्तं गीतासु "मच्चित्ता" इत्यादि (ये एवं श्रितास्ते प्राप्नुवते इत्यादि योज्यम्) कर्दमः कपिलम् ॥३।२१।१७ (३०)

गृहीत्वेति । एवं वैभजमानस्य विदेह कैवल्यमुक्ता सम्प्रत्यारब्ध कर्मवशात् देहेसत्यपि विष्णुपद प्राप्ति लक्षणां जीवन्मुक्तिं दर्शयितु मुत्तरग्रन्थ मारभते । कविः ॥११।२।४८ (३१)

स्पष्टं देहेति । इदं जगत् देहस्य जन्माप्ययौ इन्द्रियाणांतर्वी

---

(१) योगदर्शनेषु ३।५० सूत्रम् ।
(२) श्रीमद्भगवद्गीता १०।९ श्लोक ।

NATIONAL ARCHIVES OF INDIA

स्मृत्वा हरेर्भागवतप्रधानः ॥३२॥
नकामकर्म्मबीजानां यस्य चेतसि सम्भवः।
वासुदेवैकनिलयः सवैभागवतोत्तमः ॥३३॥
न यस्य जन्मकर्म्मभ्यां न वर्णाश्रम जातिभिः।
सज्जतेऽस्मिन्नहम्भावो देहे वैसहरेः प्रियः ॥३४॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः सवैभागवतोत्तमः ॥३५॥

त्रिभुवनविभवहेतवेऽप्यकुण्ठ
स्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविन्दात्
लवनिमिषार्द्धमपि यः स वैष्णवाग्र्यः ॥३६॥

विषयलिप्सारूपः प्राणस्य क्षुत्मनसो भयं धियः क्लेशम् खिन्नत्वम् विवेचनाशक्तिरित्यर्थः ॥११।२।४८ (३२)

न कामेति। कामा एव कर्म्म बीजानि। अथवा बीजं अविद्यादि (१) नित्यनिरतिशय सुखात्मकस्वरूपस्यान्यथा ग्रहणमिति यावत्। ततो वाञ्छा सुखाभिलाषः कामः। तत् सिद्धये व्यापारः कर्म्म ॥११।२।५० (३३)

नेति। जन्मनाकुलं लक्ष्यते। अहंभावो गर्व्वः ॥११।२।५१ (३४)

नेति। आत्मनि शरीरे स्वः अहं परः नाहमिति भिदा जाता-वेकवचनम्। स्वः मम परो नममेति ॥११।२।५२ (३५)

त्रिभुवनेति। त्रिभुवन विभुर्ब्रह्मा। तद्धेतवे ब्रह्म पदार्थ

---

(१) "अत्रस्थिन् तद्बुद्धिरविद्या" आदिपदेन अभिनार्दर्शनम्। सा त्रिधा, पारमार्थिकी व्यवहारिकी, प्रातिभासिकी चेति।

NATIONAL ARCHIVES OF INDIA

भगवत उरुविक्रमाङ्घ्रि शाखा
नखमणिचन्द्रिकया निरस्ततापे ।
हृदिकथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदितेऽर्कतापः ॥३७॥

विसृजतिहृदयं न यस्य साक्षात्
हरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरशनयाधृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥३८॥

श्रीविष्णुः

निष्किञ्चना मय्यनुरक्तचेतसः
शान्तामहान्तोऽखिललोकवत्सलाः ।
कामैरनालब्धधियो भजन्ति ते
यन्नैरपेक्ष्यं न विदुः सुखं मम ॥३९॥

मपि न चलति। यतो भगवत्पदं ब्रह्मपदादपि अधिकं तदाह। अजितेति। अजितेविष्णौ आत्मा मनो येषां तैः ॥११।२।५३ (३६)

भगवत इति। सन्तमस्य चलनं स्यादिति चेत्तत्राह। भगवत इति। उरुर्विक्रमो यस्याङ्घ्रि स्तस्य शाखाः अङ्गुलयः तासां तस्यां नखाएव अत्यन्तोज्ज्वलत्वाद्दृतत्वाद्दामणयः तेषां चन्द्रिका प्रभा उपसीदतां भजतां ससन्तापः ॥११।२।५४ (३७)

विसृजतीति। यस्य हृदयं साक्षादनाच्छ्वरूपोहरि र्न विसृजति यतः प्रणय रसनया प्रेमगुणेन धृताङ्घ्रि पद्मः। कविः निमिम् ॥११।२।५५ (३८)

NATIONAL ARCHIVES OF INDIA

वाग् गद्गदाद्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसते क्वचित् क्वचित्।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥४०॥

राजा।

पुनश्च भूयाद् भगवत्यनन्ते
रतिः प्रसङ्गश्च तदाश्रयेषु।
महत्सु यां यामुपयामि सृष्टिं
मैत्रस्तु सर्वत्र नमो द्विजेभ्यः ॥४१॥

ध्रुवः।

यानिर्वृतिस्तनुभृतां तव पादपद्म-
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्।

निष्किञ्चना इति। अनालब्धाः अस्पृष्टाः नैरपेक्ष्यं निरपेक्षैर्लभ्यम्। श्लोकाः उद्धवम् ॥११।१४।१७ (३८)

वागिति। गद्गदाक्खलिताक्षराः ॥११।१४।२४ (४०)

पुनश्चेति। एवं जीवन्मुक्तं लक्षयित्वा तन्माहात्म्यं ब्रुवाणः तत्सङ्गिनः सुरुषान् स्तौति। पुनश्चेति। पुनर्जन्मान्तरे तदाश्रयेषु भगवदाश्रयेषु। प्रकृष्टसङ्गोयां यां सृष्टिं सुपयामि तत्र तत्र महत् सङ्गी भूयात्। तज्ज्ञविशेषं प्रार्थयन् नमोद्विजेभ्य इति पुरःस्थितान् ऋषीन् राजानमपि। परीक्षित ऋषीन् प्रति ॥१।१८।१६ (४१)

यानिं। भगवज्जना जीवन्मुक्ताः। स्वमहिमन्यपि स्वाधीन

सा ब्रह्मणि स्व महिम्न्यपि नाथ माभूत्
किं वान्तकासिलुलितात् पततांविमानात् ॥४२॥
ते न स्मरन्त्यतितरां प्रियमीशमर्त्यं
येचान्वदः सुतसुहृद्गृहवित्तदाराः ।
येत्वजनाभ भवदीय-पदारविन्द
सौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥४३॥

सूतः ।

तदोपसंहृत्यगिरः सहस्रणी-
र्विमुक्तसङ्गं मन आदिपुरुषे ।
कृष्णे लसत्पीतपटे चतुर्भुजे
पुरःस्थितेऽमीलितदृग्व्यधारयत् ॥४४॥

माहात्म्येऽपि किन्तु किंपुनः। अन्तकस्यासिनालु (तु) लिता दिमानात् पततां पराधीन माहात्म्यानामित्यर्थः ॥४।८।१० (४२)

तेनेति। मर्त्यं शरीरं प्रियमपि नस्मरन्ति। ये च अदो मर्त्यं अनु अमुना देहेन सहस्थिताः। तत्सम्बन्धात् सम्बन्धिनः सुतादयः तानपि नस्मरन्ति। के ये भगवद्भक्तेषु कृत प्रसङ्गः ध्रुवो भगवन्तम् ॥४।८।१२ (४३)

एवं जीवन्मुक्तं लक्षयित्वा स्तुत्वा चेदानीं अवसिताधिकारस्य तस्य शरीर पातमाह। तदेति। तदा तस्यां दशायां सहस्रणीः (स्राणि) सहस्रेण व्यापाराणां लब्धबलाः गिरः उपसंहृत्येतेन सर्वेन्द्रियोपरतिरुपलक्षिता। अतएव विमुक्त सङ्गं मीलिताद्दृग्बुद्धी-

विशुद्धया धारणया हृता शुभ-
स्तदीक्षयैवाशुगतायुधव्यथः।
निवृत्तसर्वेन्द्रियवृत्तिविभ्रम
स्तुष्टाव जन्यं विसृजन् जनार्दनम् ॥४५॥

रुद्रः।

प्रत्युद्गमप्रश्रयणाभिवादनं
विधीयते साधुमिथः सुमध्यमे

न्द्रियवृत्तिः यस्मिन् मनसि निधाय मनः क्षणे व्यधारयदित्यर्थः अनेन प्रत्याहार पूर्व्वा धारणोक्ता (१) ॥१।८।३० (४४)

विशुद्धा निष्कामाः अशुभं पूर्व्वभवं तस्य श्रीकृष्णस्य ईक्षया साक्षात्कारेण गतानि आयुधव्यथानि यस्य सतथा। आयुधवत्-व्यथयन्ति इत्यायुधव्यथानि उत्तर पापानि। तथाचोक्तम् तदधिगम उत्तरपूर्व्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् (२)। श्रुतिश्च यथेषीका तूलमग्नौ प्रोतं प्रदूयते एवंहास्य सर्व्वे पाप्मानः प्रदूयन्ते (३) इति। विभ्रमो विविधं भ्रमणं। तच्च तत्रासन्तोषात्। तस्य-निर्वृत्तिरपूर्व्वं क्षणाख्य विषयलाभात् जन्यं शरीरं विसृजन् त्यजन्। जनार्दनं कैवल्यदातारं पुरुषमित्युचित पदप्रयोगः। सूतः शौनकम्। स्तुतिरिह मनसा भगवद्गतसाधुत्वानुसन्धानम्। वाचिकस्तु व्यवहारदशा विषयत्वात्तदेवाह ॥१।८।३१ (४५)

प्रत्युद्गमेति। प्रश्रयणं विनयः। प्रत्युद्गमादिकं सत्कारोपलक्षणम्। हे सुमध्यमे दाक्षायणि। तत्सर्व्वं प्राज्ञैः प्रज्ञाऽत्र-

---

(१) योगदर्शनम् "देशबन्धश्चित्तस्य धारणा" ३।१ सूत्रम्।

(२) वेदान्तदर्शनम् ।४।१।१३ सूत्रम्।

(३) कौषीतकीयोपनिषत् ५।२४।२

प्राज्ञैः परस्मै पुरुषाय चेतसा
गुहाशयायैव न देहमानिने ॥४६॥
सत्त्वं विशुद्धं वसुदेवशब्दितं
यदीयते तत्र पुमानपावृतः ।
सत्त्वे च तस्मिन् भगवान् वासुदेवो
ह्यधोक्षजो मे नमसा विधीयते ॥४७॥

शुकः ।

उरुगायतोनामरविन्दलोचनं

ऋतम्भराख्या सास्ति येषां तैः । परस्मै तुरीयाय । चेतसव विधीयते । अर्थादन्यैस्त्वन्यथेत्यर्थः । ऋतम्भरालक्षणन्तु (१) भेव्यक्तं पुरुषं बुद्धिसङ्गविवर्ज्जितम्, यादर्शयति बोधार्कंसा-यादृतम्भरा" इति । एवमियता प्रबन्धेन विष्णुादि प्रकरण र्यी साङ्गां सकलां च निरूप्यायग्रन्थकृत् प्रकरण प्रतिपाद्या-ाद्द देवतां प्रणमति । सत्त्वमित्यादि । मे मया भगवानधोक्षजो वासुदेवो हि (च) मनसाविधीयते । नमस्क्रियते । अधःकृतमक्ष-जमिन्द्रियजं ज्ञानं येन सतथा । निराकार इत्यर्थः । कथन्तर्हि वासुदेव स्तत्राह । सत्त्वे चेति । तस्मिन् वासुदेवाख्ये उपाधौ अ (य) स्वसत्त्वे सद्भावे अधिष्ठाने स (ऽ) ति । अथ वासुदेवशब्दस्य कोऽर्थ स्तत्राह ॥४।३।२२ (४६)

सत्त्वमिति । यद् यस्मात्तत्र विशुद्धे सत्त्वे पुमान् विष्णुरपावृत ईयते । प्रत्यक्षः प्रतीयते । अनेन वसत्यस्मिन् रमणीयत्वादिति वसु । द्योव्यतिद्योततेऽस्मिन् प्रकाशकत्वादिति देव इति शुद्धसत्त्वे

---

(१) पातञ्जले समाधिपादे ४७।८८ सूत्रे ऋतम्भरातत्र प्रज्ञा ।

व्रजाङ्गनानां दिवमस्पृशद्ध्वनिः।
दध्वस्य निर्मन्थनशब्दमिश्रितो
निरस्यते येन दिशाममङ्गलम् ॥४८॥
स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं मिथो धिया।
मनश्च भद्रं भजताद्धोक्षजे
ह्यविष्यतां नो मतिरप्यहैतुकी ॥४९॥

इति श्रीवोपदेव विरचिते मुक्ताफले विष्णुभक्तानां
वीररसो नामैकोनविंशोध्यायः।

वसुदेवशब्दस्य प्रवृत्तौ हेतुरुक्तः। तदेवं साकार निराकारे भगवतोर्द्वे रूपे नमस्कृते भवतः। रुद्रः उमाम् ॥४।३।२३ (४७)

अथास्य ग्रन्थस्यप्रचय परिपन्थि विघ्न विघाताय भगवद्गुणमाहात्म्य परं पद्यमुदाहरति। उद्गायतीनामिति। दध्नश्चध्वनिः। निर्मथ्यतेऽनेनेति निर्मन्थनं कुठरादि। कूट (ठ) रोमश्च विष्कम्भेतस्य शब्देनमिश्रितः। येन ध्वनिना निरस्यतेतिरस्क्रियते। अमङ्गल मित्येतन्निर्विघ्नत्वे द्योतकं शुकः ॥१०।४६।४६ (४८)

स्वस्तीति एवं जगदपवर्गहेतुं ग्रन्थं प्रणीय तज्जनित सुकृतवासनासनाथ।, तत्र तत्र भगवानाचार्यो विश्वस्य स्वस्य च समीहितमाशास्ते। स्वस्त्यस्तु इति। स्वस्तीति क्षेमवाचकमव्ययम्। ननु खलेषु सत्सु कुतः स्वस्ति तत्राह। खल इति। खलो दुर्जनः। प्रसादः स्वच्छत्वम्। विश्वस्य स्वस्तिप्रतिज्ञाभङ्गभयात् खलस्य प्रसादमात्रमस्तम् नं तु विनाशः। एवं योग्यतामुक्त्वा परस्परोपकारे प्रवृत्तिमाह

ध्यायन्तीति। शिवं मङ्गलम् स्वागतमाशास्ते मनश्चेति। नः अस्माकं च मनो भद्रं सात्त्विकं वस्तु भजताम्। अपि शब्दः समुच्चये। अधोक्षजे नो मतिरावेश्यताम्। आवेशं प्राप्नोति आवेशयतीति। "प्रातिपदिकत्वात् धात्वर्थे बहुलमिष्टवच्चेति" णिच्। अहैतुकी-निष्कामा। प्रह्लादः नृसिंहम् ॥ ५।१८।९ (४९)

इति हेमाद्रि विरचितायां कैवल्यदीपिकायां विष्णुभक्तानां

वीररसोनामैकोनविंशोध्यायः।

———

NATIONAL ARCHIVES OF INDIA

ग्रन्थोपसंहारः

चतुरेण चतुर्व्वर्ग चिन्तामणि वणिज्यया ।
हेमाद्रिणार्ज्जितं मुक्ताफलं पश्यत कौतुकात् ॥५०॥
निर्म्मथ्यपयसांराशिं मन्दरः कौस्तुभं न्यधात् ।
हेमाद्रिर्वचमां मुक्ताफलं रत्नं हृदि प्रभोः ॥५१॥

ग्रन्थोपसंहार वार्त्तादीनाम्। इहच स्वकर्त्तृकेऽपि यदुराज महामन्त्रिणा हेमाद्रिणाऽभ्यर्थित आचार्य्य स्तत्कर्त्तृकत्वं ख्यापितवानिति प्रागुक्तम्। तदेतत्पर्य्यन्तं तत्कीर्त्तिं ख्यापयन्नाह चतुरेणेति चतुर्वर्ग चिन्तामण्याख्या ग्रन्थमहोदधेर्वणिज्यतया चतुरेण विदित ग्रन्थरचनारीतिविशेषेण। यथाहि वणिज्यायां तत्तद्देशेभ्यस्तानि तानि प्रियवस्त्वन्याहृत्यपुमान् तत्तद्विषये चतुरोभवति। तथैतेन तत्तत्स्मृतीतिहास पुराणादिभ्य स्तानि निःशेष व्रत-दान-तीर्थ-मोक्षादिप्रतिपादन पराणि वाक्यान्याहृत्य ग्रन्थरचनायां कौशलमासादितम्। तत स्तस्यैवरेखया भागवतस्य तत्तत्स्कन्धेभ्य स्तानितानि विष्णुादि वस्तुचतुष्टय प्रतिपादन पराणि पद्यान्युद्धृत्य (आहृत्य) मुक्ताफलाख्यं प्रकरणं कृतम्। तदेतत् कौतुकात्पश्यत हे कुतूहलिनः इतिशेषः। अस्मिन् विलोकिते सकल कौतुकमवाप्स्यथेतिभावः। अन्यत्र चतुर्णाम्वर्गाः देशच्छायाः समूहास्तेषां चिन्तापरीक्षा तयोपलक्षिताः मणयो रत्नानि तेषां वणिज्या क्रय विक्रय स्थितिः। तया चतुरेण निपुणेन हेमाद्रिणा बहुसुवर्णेन वणिजा अर्ज्जितं मुक्ताफलम् मौक्तिकानि। जातावेकवचनम्। पश्यतेत्यर्थः। मुक्ताफलशब्दः पद्यद्वयेऽपि प्राग्व्याख्यातः ॥५०॥

एवं तस्य वणिग्रूपेण कुशलतांव्यञ्जय सुमेरुसाम्येन स्थैर्य्यादिगुणान्व्यनक्ति। निर्म्मथ्येति। पयसांराशिम् क्षीरोदंमन्दरोमहाचलः

NATIONAL ARCHIVES OF INDIA

हेमाद्रि माद्रियत एव गुणेन येन
तेनैव पूरित सुखेन सुवद्ध मेतत् ।
मुक्ताफलं प्रतिफलज्जगदीशरूपं
यत्कर्णकण्ठ कूहरे सुषमास्य काचित् ॥५२॥
इे एव चित्रे रामस्य सिन्दुर्व्वङ्गः पुराधुना ।
हेमाद्रिः स्वमुपानीतः सुर्य्यावर्त्तं प्रदक्षिणः ॥५३॥

न्यधानिक्षिप्तवान्। हेमाद्रिर्मेरुः कामदेवात्मजस्य वचसां राशिं भागवतास्यं निर्म्मथ्य मुक्ताफलाख्यं रत्नं ग्रन्थञ्च प्रभोः श्रीकृष्णस्य हृदिन्यधादित्यर्थः। विष्णोरयमलङ्कार इतिभावः ॥५१॥

हेमाद्रि मित्यादि। येन सकल कथा कौशलरूपेण गुणेन हेमाद्रिजन आद्रियते सत्कुरुते तेनैव गुणेन पूरितं तत्साधन सम्पादनार्थिनां सुखं येन गुणेन। अर्थिजनेषु कल्पतरवोद्धितस्य गुणाः। एतत्प्रकरणं सुवद्धं सुघटितं प्रतिफलन् बुद्धिदर्पणे प्रतिबिम्बीभवत् जगदीशस्य विष्णोः रूपं येन यस्मिन् ग्रन्थेन तत्तथा। तुल्याधिकरणाद्वहुव्रीहेः प्रथमायां रूपप्रत्ययो वा सर्व्वथा राजालङ्करणमित्यर्थ। तदेतत् यस्य कर्णे श्रवणे कण्ठे घोषेण हृदये तदर्थविन्तनेनास्य तस्य पुंसः काचित् स्वसम्वेद्याद्या सुषमा परमात्म प्रकाशरूपा परमशोभा भवतीत्यर्थः अन्यच्च येन गुणेन सूत्रेण हेमाद्रेः सुमेरोर्मानस्य शोभा आद्रियते। मेरुविकारस्य सुवर्णस्य निकटस्थतया स्वीक्रियते तेनपूरितं भृतं (श्रृतं) स्वप्रवेशेन सुखं मौक्तिकवेध्यस्थानं येन गुणेन तेनैव एतद्ग्रन्थरत्नं सुवद्धं सुयन्त्रितं प्रतिफलन् निर्म्मलतया प्रतिविम्बो भवत् जगदेव ईशस्यरूपं यस्मिन् मौक्तिके। यद्वाप्रतिफलन् जगदीशस्य राज्ञोरूपं यस्मिन् तत्तथा ॥५२॥

NATIONAL ARCHIVES OF INDIA

विद्वद्वनेश-शिष्येण भिषक् केशव सूनुना।
हेमाद्रिर्व्वीपदेवेन मुक्ताफल मचीकरत् ॥५४॥
स्वर्गे गीर्व्वाणिनार्य्यः सुरपतिमभितः शाब्दिकामां वरेण्यः
पातालेनागराजः फणिपतिसदृशो यस्यगायन्तिकीर्त्तिम्।
यस्तीर्णः शास्त्रपाथोनिधिमखिल मथो ग्रन्थरत्नं सुवृत्तम्,
चक्रे शिष्यैर्धनेशः कविकुलतिलकः केशविर्व्वीपदेवः ॥५५॥

हे एवेति। रामोदाग्ररथिर्देवगिरोश्वरश्च। तस्य पुरा त्रेतायां चरित्रेषु मध्ये हे एव चरित्रे यत्सिन्धुः स्वसुद्रोवहः। यच्च हेमाद्रिः मेरुः स्वसुपानोतः स्वस्य निकटीकृतः। क्रियमाणः सूर्य्यस्यवेः आवृता व्याप्तत्तिंगता प्रदक्षिणा परिभ्रमणा (णा) यस्मिन् मेरौ मतथा व्यधिकरण बहुव्रीहीतु प्रागुक्तम्। कार्य्यकारणयोरभेदोपचारेण ताटस्थ्य (तच्छब्द) विवक्षया हेमाद्रिशब्देन तज्जं सुवर्णं लक्ष्यते। अर्थिभ्यः प्रदातुं भूयान् सुवर्णराशिरानीत इत्यर्थः। अन्यत्रैवतस्य तु रामस्य अधुना यदुकुलेऽवतीर्णस्य हेएवचित्रे यत् सिन्धुर्गजमदोवहः। अत्र सिन्धुशब्देन तद्वन्तोगजालक्ष्यन्ते। सिन्धुरिति जातावेकवचनम्। प्रत्यर्थिनोराज्ञः परामृश्य तत्सिन्धुराः स्वगृहे वहा इत्यर्थः। यच्च हेमाद्रिर्द्विजविशेषः। स्वमुपानोतः स्वसाम्राज्यस्य महामात्यस्य पदेऽधिकर्त्तुमित्यर्थः। कीदृशः सूरिषु पद वाक्यप्रमाणादि प्रबोधेषु आवृताः यतश्च क्रियमाणत्वादावृत्तिंगता। प्रकृष्टादक्षिणा दानं यस्य सतथा। कोहि नाम हृहस्पतिमपि प्रश्नवा प्रहसत स्तादृशस्यमन्त्रिशिरोमणे र्निजनिकटीकरणान्न चित्रीयते ॥५३॥

विद्वद्वनेश शिष्येणेति अतिरोहितार्थम् ॥५४॥

NATIONAL ARCHIVES OF INDIA

सकल विबुधमानः श्रीनिकेतं वदान्यः,
समद विबुध सिंहः श्रीनिवासाङ्घ्रि से(से)वः ।
जयति विनयसिन्धु वामनेशः सुबन्धुः,
प्रणत-सकल भूपः कृष्णवंशैकदीपः ॥५६॥

इति श्रीवोपदेव विरचितं मुक्ताफलं

समाप्तम् ॥

इति ग्रन्थोपसंहारः ।

सकलान् विबुधान् मानयतीति तथा श्रीनिकेतं ऐश्वर्य्याधारं वदान्यः दानशीलः । समदा ये विबुधा स्तेषां सिंहः कविकेशरी । भगवच्चरणारविन्दे स्नेहो भक्तिः तदयुक्तःवामनः ईशोयस्य सुबन्धवः (सुशोभना बन्धवः बान्धवाः) सभासदो यस्य एतादृशो देवगिरीश्वरो रामो यतिः ॥५५॥५६॥

श्रीनित्य शुद्ध सुखबोध वपुर्णितान्तं,
जागर्त्ति चोमिति पदं यमिहापवर्ग्यम् ।
यो योगिनां हृदि चकास्ति विधूत पङ्के,
सोऽस्माकमस्तु शरणं पुरुषः पुराणः ॥१॥
यत्किञ्चिदत्र भवतः खलु वोपदेव,
शब्दः कृतिर्निजधिया परिचर्य्यते मे ।
तद्दिश्य कोविदजनोपकृतिं तदारात्,
आराधनं भगवतः परमेश्वरस्य ॥२॥
आयावतो मम्मतदामपिनैकचित्राम्,
कृष्णप्रयामिव भुवि प्रथितां तदीयाम् ।

NATIONAL ARCHIVES OF INDIA

বিজ্ঞাপন।

বেদান্ত সূত্র বা বেদান্ত দর্শন।

মূল্য ৪৲ চারি টাকা মাত্র।

পরলোক ও ঈশ্বর-তত্ত্ব নিরূপণের নিমিত্ত ত্রিকালজ্ঞ মহর্ষিগণ যে সকল উপায় মানবের ঐহিক অশেষবিধ কল্যাণ ও পারত্রিক পরম শান্তি নির্ব্বাণের জন্য আবিষ্কার করিয়া গিয়াছেন, তন্মধ্যে বেদান্তদর্শন বা ব্রহ্মবিদ্যা অন্যতম। এই ব্রহ্মবিদ্যার প্রকাশক ভগবান্ বেদব্যাস। তিনি বেদ ও উপনিষদের সকল সার সংগ্রহ করিয়া ব্রহ্মসূত্র বা শারীরক সূত্র প্রণয়ন করিয়াছেন। এই সূত্রের উপর পুরাকাল হইতে বহু ভাষ্য এ পর্য্যন্ত রচিত ও প্রকাশিত রহিয়াছে। ভাষ্য নিচয়ের মধ্যে ভগবান্ শঙ্করাচার্য্যের ভাষ্যই অতি রহস্য পূর্ণ এবং প্রসন্নগম্ভীর ঈশ্বর-ভাবের উদ্দীপক। এই ভাষ্যানুসারে উক্ত ব্রহ্ম সূত্রের উপরে পরমহংস পরিব্রাজক শ্রীমৎ শঙ্করানন্দ স্বামীর সরল মধুর প্রাঞ্জলবৃত্তি ও সূত্রের সরল বঙ্গানুবাদ, সরলভাবে প্রতি অধিকরণের বাঙ্গালা অর্থ ও তাৎপর্য্য, শ্রীমদ্ মাধবাচার্য্যের বৈয়াসিক ন্যায় মালা এবং তাহার বিশদার্থ, বিবিধ টীকা, টীপ্পনী সহ উল্লিখিত সম্পূর্ণ বেদান্তদর্শন জনৈক ষড়্দর্শনবিৎ পণ্ডিত দ্বারা বহু অর্থ ব্যয় করিয়া মুদ্রিত ও প্রকাশিত করিয়াছি। ইহা দ্বারা যাহারা বাঙ্গালা ভাষায় অভিজ্ঞ তাহারাও বেদান্তদর্শনের মর্ম্ম অতি সহজে হৃদয়ঙ্গম করিতে পারিবেন। এই পর্য্যন্ত এইরূপ সরল বৃত্তি প্রভৃতি সহ বেদান্তদর্শন কেহ প্রকাশিত করেন নাই। আমাদের এই বেদান্ত সূত্র এই নব ভাবে প্রথম প্রকাশিত, বেদান্তামৃত পিপাসুগণের এক এক খণ্ড গ্রহণ করিয়া পরিতৃপ্ত ও পরম শান্তি লাভ করুন ইহাই বিনীত প্রার্থনা। ইতি

বিনীত নিবেদক

শ্রীউমাচরণ রক্ষিত।

৯নং শিবনারায়ণ দাসের লেন, কলিকাতা।

NATIONAL ARCHIVES OF INDIA

NATIONAL ARCHIVES OF INDIA

टीकां प्रियां परमहंस जनस्य दृष्ट्वा,
ग्रन्थः कृतोऽत्र कृतिनां कुदुपेतु (ति) तोषम् ॥३॥
अतत्वे तत्वधीर्येषां तत्वेचातत्त्व धीर्नृणाम्।
नतानानन्दयन्ग्रन्थे ता वोपदेवस्य सूनवः ॥४॥
यस्य व्याकरणे वरेण्य घटना स्फोताः प्रबन्धादय,
प्रख्यातानव वैद्य केऽथतिथि निर्द्धारार्थ मेकोद्भुतः।
साहित्येऽपय एव भागवत तत्त्वोल्लिरेक स्तथा,
भव्यादृवाणी शिरोमणेरिहगुणाः के के न लोकोत्तराः ॥५॥
टीकामुक्ताफलस्येमां नाम्ना कैवल्यदीपिकाम्।
हेमाद्रिः कण्ठके चक्रेरा (का) मराजस्य वेश्मनि ॥६॥

इति श्रीमत् प्रौढ़ प्रतापचक्रवर्त्ति—महाराजाधिराज
सोमयदुःशोद्भव रामराज-मन्त्रिवर्य्य हेमाद्रि
विरचिता मुक्ताफलटीका समाप्ता ॥

NATIONAL ARCHIVES OF INDIA

00049372

NATIONAL ARCHIVES OF INDIA

NATIONAL ARCHIVES OF INDIA

NATIONAL ARCHIVES OF INDIA

(NSDL)

NATIONAL ARCHIVES OF INDIA

Digitized with financial assistance from

NSDL
Technology, Trust & Reach

on 16 November, 2018

NATIONAL LIBRARY OF INDIA